शास्त्रसंदेश-४०

# स्तोत्रसंदेशमाला

## सामान्यजिनस्तोत्राणि

१४



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-४०

# स्तोत्र संदेशमाला- १४

## सामान्यजिनस्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૧૪

## सामान्यजिनस्तोत्राणि

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૬ + ૩૧૨ + ૮

સ્તોત્ર : ૧૪૦

શ્લોક : ૨૦૭૭

**: પ્રમાર્જના :**

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!    અનુમોદનીય...!    અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૩-૧૪ ના
## દ્રવ્ય લાભાર્થી



## શ્રી ચિંતામણી પાર્શ્વનાથ જૈન
## શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ સંઘ
## નાશિક

*આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની*
*અમો ભૂરિ ભૂરિ અનુમોદના*
*કરીએ છીએ.*
*ટ્રસ્ટીગણ ના અમો આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*



**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ
*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका



| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | त्वत्सेवानिरतांस्त्वदर्पितदृश- | पू.आ.श्री हरिभद्रसूरि | १ |
| २ | अङ्गुलिदलाभिरामं सुरनर- | पू.आ. श्री हरिभद्रसूरि | ५ |
| ३ | यस्य सङ्क्लेशजननो रागो | पू.आ. श्री हरिभद्रसूरि | ६ |
| ४ | शान्तो वेषः शमसुखफलाः | पू.आ.श्री बप्पभट्टसूरि | ७ |
| ५ | येऽर्हन्! प्रभातसमये तव | पू.आ.श्री मुनिचन्द्रसूरि | ८ |
| ६ | जय श्रीजिनकल्याण-वल्ली- | पू.आ.श्री मुनिसुन्दरसूरि | १० |
| ७ | जयश्रियां धाम सुधामधारिन्! | पू.आ.श्री मुनिसुन्दरसूरि | ११ |
| ८ | समवाप्य जयश्रियं जग- | पू.आ.श्री मुनिसुन्दरसूरि | १२ |
| ९ | जगतां प्रभुतां प्राप, यो | पू.आ.श्री मुनिसुन्दरसूरि | १३ |
| १० | आनन्दाद्वैतदातारं, जयश्रीद्धं | पू.आ.श्री मुनिसुन्दरसूरि | १३ |
| ११ | परानन्दपदायार्हन् भवाऽमित्र- | पू.आ.श्री मुनिसुन्दरसूरि | १४ |
| १२ | शिवपदप्रभुतां दधतं जय- | पू.आ.श्री मुनिसुन्दरसूरि | १५ |
| १३ | प्रभुतां शिवसम्पदामवाप्या- | पू.आ.श्री मुनिसुन्दरसूरि | १६ |
| १४ | परं श्रियःपदं प्राप्तं,सकलारि- | पू.आ.श्री मुनिसुन्दरसूरि | १७ |
| १५ | प्रभुरक्षरशर्मसम्पदं, भगवान् | पू.आ.श्री मुनिसुन्दरसूरि | १७ |
| १६ | यैर्भवन्ति हृदयस्थितैर्बुधा, | पू.आ.श्री मुनिसुन्दरसूरि | १८ |
| १७ | त्रिभुवनाधिप! मोहजयश्रिया, | पू.आ.श्री मुनिसुन्दरसूरि | १९ |
| १८ | जयश्रीदायकंविश्वनायकं - | पू.आ. श्री मुनिसुन्दरसूरि | २० |
| १९ | आनन्दं यः परं प्राप रागा- | पू.आ. श्री मुनिसुन्दरसूरि | २६ |
| २० | त्रिजगत्प्रभुताप्रतिष्ठितं, | पू.आ.श्री मुनिसुन्दरसूरि | ३३ |
| २१ | भूरिभक्तिवशतः कृतोद्यमो | पू.आ.श्री जयशेखरसूरि | ३४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २२ | सर्वेषु सत्त्वेषु विशेषबुद्ध्या | पू.आ. श्री जयशेखरसूरि | ३७ |
| २३ | जयन्ति पादा जिननायकस्य | पू.आ.श्री जिनप्रभसूरि | ३९ |
| २४ | जितभावद्विषां सर्वविदां | पू.आ.श्री जिनप्रभसूरि | ४१ |
| २५ | ............. रञ्जयति प्रतीतम् । | पू.आ.श्री जिनप्रभसूरि | ४२ |
| २६ | शुभभावानतः स्तौमि सर्वज्ञ ! | पू.आ.श्री सोमतिलकसूरि | ४६ |
| २७ | सर्वज्ञ ! सर्वामरराजपूजितं | पू.आ.श्री जिनसुन्दरसूरि | ४७ |
| २८ | जयश्रियां हेतुरमर्त्यपूजित ! | पू.आ.श्री जिनसुन्दरसूरि | ४९ |
| २९ | श्रेयांसि विश्राणयितारमश्रमं | पू.आ.श्री जिनसुन्दरसूरि | ५० |
| ३० | श्रीवीतराग ! विगतस्मर ! | पू.आ.श्री सोमप्रभसूरि | ५१ |
| ३१ | व्यधित साधितसाधुतपाः | पू.आ.श्री सोमप्रभसूरि | ५३ |
| ३२ | श्रीमन् ! धर्मं श्रय मम मनः | पू.आ.श्री सोमप्रभसूरि | ५४ |
| ३३ | मिथ्यादृशां तेषां विनिपाताः | पू. आचार्यश्री देवभद्रसूरि | ५६ |
| ३४ | विश्वत्रयैकदर्शन ! सहस्रदर्शन- | पू.आ.श्री धर्मघोषसूरि | ५९ |
| ३५ | एकीभावं गत इव मया यः | पू.आ.श्री वादिराजसूरि | ६० |
| ३६ | जिनपतेर्वरगन्धसुपूजनं, जनि- | पू.आ. श्री विबुधविमलसूरि | ६५ |
| ३७ | कल्पद्रुमाद्यतिक्रान्ता, त्वदाज्ञा | पू.आ. श्री देवेन्द्रसूरि | ६६ |
| ३८ | देवाः प्रभो यं विधिनाऽऽत्म- | पू.आ. श्री जयानन्दसूरि | ६७ |
| ३९ | प्रणम्यासमहं कुर्वे, द्विवर्णरत्न- | पू.आ.श्री पुण्यरत्नसूरि | ६८ |
| ४० | प्रातरेव समुत्थाय तीर्थनाथ ! | पू.आ.श्री चन्द्रप्रभसूरि | ७४ |
| ४१ | तटीध्रतटताटनत्रुटितकोटि- | पू.आ. श्री हर्षचन्द्रसूरि | ७६ |
| ४२ | इष्टानिष्टवियोगयोगहरिणी | पू.आ.श्री ज्ञानविमलसूरि | ७८ |
| ४३ | प्रशान्तं दर्शनं यस्य, सर्वभूता- | पू.आ.श्री हेमचन्द्रसूरि | ७९ |
| ४४ | कला भवन्तं सकला भवन्तं | पू.आ.श्री देवसुन्दरसूरिः | ८३ |
| ४५ | मौनेनोर्वीं व्यहृतपरितो वत्स- | पू.आ.श्री चन्द्रप्रभसूरि | ८४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४६ | जयति जङ्गमकल्पमहीरुहो | पू.आ.श्री कनकप्रभसूरि | ८६ |
| ४७ | सरति सरति चेतः स्तोतुमेत– | पू.आ.श्री नरचन्द्रसूरि | ८७ |
| ४८ | श्रेयः श्रियां मङ्गलकेलिसद्म ! | पू.आ.श्री रत्नाकरसूरि | ८९ |
| ४९ | अर्हत्तत्वं स्तुमो विश्वशासनो– | श्रीप्रभावकचरित्र अन्तर्गत | ९३ |
| ५० | नतनाकिनिकायनरप्रमदं | पू.आ. श्री विजयप्रभसूरि | ९४ |
| ५१ | नित्ये श्रीभुवनाधिवासिभव– | पू.आ.श्री धर्मसूरि | ९५ |
| ५२ | संसारसारं शैवश्रीसरसीसर– | पू.आ.श्री अमरचन्द्रसूरि | ९८ |
| ५३ | प्रातिहार्यकलितासनशोभं त्वां | पू.आ.श्री पार्श्वचन्द्रसूरि | ९९ |
| ५४ | रचितरुचिरचन्द्रनागेन्द्रलेखे– | पू.आ.श्री जयचन्द्रसूरि | ९९ |
| ५५ | नमस्ते जगदानन्द !, मोक्ष– | पू. श्री सिद्धर्षिगणि | १०३ |
| ५६ | अपारघोरसंसार–निमग्नजन– | पू. श्री सिद्धर्षिगणि | १०५ |
| ५७ | परमात्माऽज्योतिः, परमेष्ठी | पू.उपा. श्री यशोविजयगणि | १०९ |
| ५८ | विमलकेवलदर्शनसंयुतं, | पू.श्री वीरविमलगणि | १११ |
| ५९ | श्रीदेवेन्द्रनरेन्द्रमौलिकमुकुटो– | पू.मु.श्री लक्ष्मीकल्लोलगणि | ११२ |
| ६० | आम्बाऽरायण सेलडी खड– | महामहोपाध्यायसाधुराजगणि | ११७ |
| ६१ | कुखगोऽघङच्छोऽजाझोऽञट ! | पू.पं.श्री देवचन्द्र वि. | ११९ |
| ६२ | कखगाऽघं ङचाछाऽज | पू.पं. लक्ष्मीकल्लोलगणि | १२० |
| ६३ | मुनीन्द्रहृदयानन्दकन्दकन्दल– | पू.मु.श्री. उदयवीरगणि | १२२ |
| ६४ | जिनराज ! तवासनं बभौ | मुनिप्रवरश्री विनयहंसगणि | १२३ |
| ६५ | स्वस्ति श्रियं यच्छतु नाभि– | पू.मु.श्री भानुचन्द्रगणि | १२३ |
| ६६ | श्रीसर्वज्ञं जिनं स्तोष्ये, छन्दसां | पू.उपा.श्री समयसुन्दर वि. | १३४ |
| ६७ | प्रभुस्नात्रकृते देवानीयमानान् | पू.उपा. श्री समयसुन्दर वि. | १३७ |
| ६८ | तस्मै नमः श्रीजिनशासनाय, | पू.पं. पद्मसागरगणि | १३८ |
| ६९ | मानवा जिनवर ! त्वयि शश्वन् | पं.श्री हर्षवर्द्धनगणि | १४० |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ७० | श्रीपृथ्वीधरसाधुना सुविधिना | पू.आ.श्री सोमतिलकसूरि | १४४ |
| ७१ | वन्दारुसुन्दरपुरन्दरमौलिमाला- | पू.मु.श्री पद्मसुन्दर वि. | १४७ |
| ७२ | ॐकारस्फाररूपं परमपदगतं | पू.मु.श्री चारित्रसुन्दर वि. | १५२ |
| ७३ | शङ्के नृलोकं कलिभीमसिन्धो- | पू.मु.श्री आनन्दवल्लभ वि. | १५५ |
| ७४ | सकलसुरेश्वरमुख्या विबुधाः | श्री महीमेरुमुनि | १५७ |
| ७५ | जय वीतमोह ! जय वीतदोष ! | मुनिश्री रूपचन्द्र वि. | १६२ |
| ७६ | इन्द्रे-भा-श्व-शुक-प्लवाऽहि- | पू.मु. श्री विवेकसागर वि. | १६३ |
| ७७ | शान्तं शिवं शिवपदस्य परं | पू.आ.श्री जैत्रसूरिशिष्य | १६४ |
| ७८ | नमस्ते सदानन्दसन्दोहकारिन् | पू.मुनिश्री रत्नसिंह वि. | १६६ |
| ७९ | चिदानन्दं नत्वा विशदविधिना- | पू.मु. श्री रत्नसिंह वि. | १६७ |
| ८० | अम्ब ! त्र्यम्बकभाल- | पू.मु. श्री साधुरत्न वि. | १७१ |
| ८१ | मुखे-लेषु-वाक्-दृग्(क्)- | पू.मु.श्री तेजसिंह वि. | १७४ |
| ८२ | सारङ्गधरं सुवृषास्तहर्रिं, | पू.विबुध पर्वत | १७५ |
| ८३ | यस्य प्रसाद-वशतो वृषभा- | पू.मू.श्री पद्मनन्दि वि. | १७७ |
| ८४ | दृष्टं जिनेन्द्रभवनं भवतापहारि | पू.मु.श्रीसकलचन्द्रवि. | १८१ |
| ८५ | अर्हंस्त्रिलोकमहितो हित- | श्री जटासिंहनन्दी | १८३ |
| ८६ | विनष्टकर्माष्टकबुद्धिगोचरं | श्री जटासिंहनन्दी | १८४ |
| ८७ | जिनेन्द्र ! गुणसंस्तुतिस्तव | श्री पात्रकेसरिस्वामि | १८५ |
| ८८ | मुक्ताऽमुक्तैकरूपो यः कर्मभिः | भट्ट अकलङ्कदेव | १९५ |
| ८९ | नम्राखण्डल-सन्मौलि-श्रस्त- | | १९७ |
| ९० | नम्राखिलाखण्डलमौलिरत्न- | श्री कुमारपालभूपाल | १९९ |
| ९१ | नतस्ते चरणानीश ! शिशिर- | श्री जम्बूकवि | २०३ |
| ९२ | मुनीनां दुस्तर्क्यः खलु दुरधि- | श्रमणोपासक श्री दलपतराय | २०४ |
| ९३ | अनाद्येयं मुक्तिर्ध्रुवमुपगतास्तां | श्री दलपतराय | २०८ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ९४ | सत्वेषु मैत्रीं गुणिषु प्रमोदं | अमितगति | २१० |
| ९५ | परमानन्द-संयुक्तं, निर्विकारं | | २१६ |
| ९६ | भविक जन भज जिनवरचरणं, | | २१८ |
| ९७ | विघ्नव्रातलतानेमिं, श्री नेमिं | | २१९ |
| ९८ | नागेन्द्र-देवेन्द्र नमस्कृताय, | | २२० |
| ९९ | जिनपते ! द्रुतमिन्द्रियविप्लवं | | २२१ |
| १०० | एकस्माद् रणरणकः, | | २२२ |
| १०१ | शिवशिरसि निवासं यः | | २२२ |
| १०२ | स रसासारसंसारं, संसारं | | २२४ |
| १०३ | काश्मीरैर्मलयोद्भवैर्मृगमदैः | | २२५ |
| १०४ | श्री वीतरागसर्वज्ञ जिनेश ! | | २२७ |
| १०५ | असमसम्मददायिवचःप्रथं, | | २२८ |
| १०६ | अर्हंस्तनोतु स श्रेयः श्रियं यद् | | २३० |
| १०७ | नित्यं निःस्वेदत्वं निर्मलता | | २३१ |
| १०८ | शिवं शुद्धबुद्धं परं विश्वनाथं, | | २३४ |
| १०९ | अताम्रनयनोत्पलं सकलकोप- | | २३५ |
| ११० | प्राचीमेकां पुनाना मिह सुर- | | २३६ |
| १११ | जगन्नाथ ! जगत्रात ! कृपाकर | | २३७ |
| ११२ | जयति भगवान् हेमाम्भोज- | | २३८ |
| ११३ | सर्वज्ञ ! सर्वहित ! सर्वद ! | | २३९ |
| ११४ | यत्स्वर्गावतरोत्सवे यद भवज्ज- | | २४० |
| ११५ | अद्य मे सफलं जन्म, नेत्रे च | | २४३ |
| ११६ | श्रीमन्नम्रसुरासुरेन्द्रमुकुट- | | २४४ |
| ११७ | भज सर्वज्ञं भज सर्वज्ञं, | | २४६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ११८ | निरामयं निर्मलरूपमङ्गं | | २४८ |
| ११९ | लक्ष्मीरद्यानवद्य-प्रतिभ- | पू.आ.श्री वर्धमानसूरि | २४९ |
| १२० | नमिऊण वद्धमाणं धम्म- | पू.आ.श्री सिद्धसेनदिवाकरसूरि | २७३ |
| १२१ | सिरिआइजिणं वंदे अजिअ- | पू.आ.श्री मुनिसुन्दरसूरि | २७५ |
| १२२ | लोणेण पिछिय सुनाण | पू.आ.श्री जिनदत्तसूरि | २७६ |
| १२३ | नयगमभंगपहाणा विराहिआ- | पू.आ.श्री.जिनप्रभसूरि | २७८ |
| १२४ | सिरिवीरराय देवाहिदेव | पू.आ.श्री जिनप्रभसूरि | २७९ |
| १२५ | लोयालोयविलोयण, वर- | पू.आ. श्री जिनवल्लभसूरि | २८३ |
| १२६ | विरजिणभुवणविस्सुय पव- | पू.आ.श्री धर्मघोषसूरि | २८६ |
| १२७ | रिसहाइ जिणवरिंदे चउवीस | पू.आ.श्री धर्मघोषसूरि | २८९ |
| १२८ | जम्म-जरा-मरण-दर-रोय- | पू. श्री वीरविजयगणि | २९० |
| १२९ | जय जय जयजणवच्छल ! | पू.आ.श्री मुनिचन्द्रसूरि | २९३ |
| १३० | सुरअसुरखयरमहियं महिय- | | २९४ |
| १३१ | जय भवतिमिरदिवायर ! | | २९७ |
| १३२ | गयरायं गयरायं गयरायं | पू.मु.श्री शिवश्रितिलक वि. | २९९ |
| १३३ | थोस्सामि जिणवरिंदे, | | ३०० |
| १३४ | तुंगु वट्टलु मसिणु थुड-नालु | | ३०२ |
| १३५ | जम्म-मज्जणु भणऊँ | | ३०४ |
| १३६ | तं णिएवि भुवणु भुवणेसरहो। | | ३०५ |
| १३७ | 'जयट्ठ-कम्म-दारणा। | महाकविस्वयम्भू | ३०६ |
| १३८ | 'जय जय जिणवरिन्द धरणिन्द- | महाकविस्वयम्भू | ३०७ |
| १३९ | लोयग्गहों सिव-सासय- | महाकविस्वयम्भू | ३०८ |
| १४० | सुखं संमुखं नयणले देव | पू.मु. श्री विनयप्रभोपाध्याय | ३१० |

## અરિહંત પરમાત્માના સ્તોત્રપાઠનું મહત્વ શું ?

અનાદિ કાળથી આપણા આત્માએ અજ્ઞાનતાદિના કારણે જે જે પ્રવૃત્તિઓ મન-વચન-કાયાથી કરી તેના કારણે આત્માના અસંખ્ય પ્રદેશ પર આઠ કર્મોની અનંતી અનંતી કાર્મણવર્ગણા અડ્ડો જમાવીને બેઠી છે જેના કારણે જીવ દુઃખપૂર્વક સંસારમાં ભટકી રહ્યો છે. દુઃખી થઈ રહ્યો છે. આત્માની પરેશાનીનું મૂળ કર્મ બંધ છે. એવું ગુરુગમથી જાણ્યું, અનુભવ્યું. હવે ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત થવાનો ઉપાય શું ? રત્નત્રયીની આરાધના તેમાં જ્ઞાન અને ચારિત્રને સમ્યગ્ બનાવનાર સમ્યગ્દર્શન છે. જેની પ્રાપ્તિ દર્શન મોહનીયાદિ સ્વરૂપ પ્રધાનકર્મના ક્ષય આદિથી થાય અને તે અરિહંત પરમાત્માની સ્તોત્ર ભક્તિ દ્વારા થાય છે.

પ્રતિક્રમણ હેતુપ્રકાશ ગ્રંથમાં પ્રશ્ન છે. 'લોગસ્સ'નો કાઉસ્સગ્ગ વારંવાર કેમ ? તેના ઉત્તરમાં જણાવ્યું.

**अरिहंतपरमात्मस्मरण-प्रधानकर्मक्षयकारणत्वात्** – અરિહન્ત પરમાત્માનું સ્મરણ પ્રધાન કર્મક્ષયનું કારણ છે. તેથી પૂર્વના મહાપુરુષોએ પોતાના હૈયામાં પ્રભુ પ્રત્યે જાગેલા બહુમાનભાવના કારણે હૃદયમાં પ્રગટેલી સ્ફુરણાઓને અક્ષર દેહ આપી પોતાના આત્માને કર્મમુક્ત બનાવવાનો પુરુષાર્થ કર્યો છે. તો આપણે પણ તેઓની કૃતિના આલંબને આપણા આત્મામાં સમ્યગ્દર્શન પ્રાપ્ત કરી જ્ઞાનપૂર્વકના ચારિત્ર દ્વારા કર્મક્ષય સાધી આત્માને ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત બનાવવા દ્વારા આત્માનું સામ્રાજ્ય પ્રાપ્ત કરીએ.

पू.आ.श्री हरिभद्रसूरिविरचितम्

# १. ॥ श्रीसाधारणजिनस्तोत्रम् ॥

(शार्दुलविक्रीडितम्)

त्वत्सेवानिरतांस्त्वदर्पितदृशस्त्वत्सङ्कथासु स्थितान्
त्वद्भक्तांस्त्वदनन्यसक्तमनसस्त्वत्तो न चान्यार्थिनः ।
देवास्मांश्च रुजादिभिः परिगतानालोक्य नोपेक्षितुं
युक्तं ते पशवो यतो जिनपते ! सर्वेऽनुकम्प्यास्तव ॥ १

त्वद्रूपैकनिरूपणप्रणयिताबन्धो दृशि त्वद्गुण-
ग्रामाकर्णनरागिता कर(श्रव)युगे त्वत्कीर्तनं वाऽपि नः ।
त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्त्तनं वाऽपि नः
कुत्रापि त्वदुपासनव्यसनिता मा नाथ ! विश्राम्यतु ॥ २

सर्वज्ञोऽसि विमर्शकोऽसि विदिताशेषाशयोऽसि प्रभुः
सर्वस्यापि दयान्वितोऽसि भगवन्तस्तेनेह पूत्कुर्महे ।
अस्मान्नाथ ! हठात् त्वदेकमनसो भक्ताननाथानिव
प्रोन्मथ्नन्त्यधिकाधिकं मुनिपते ! पश्याऽऽधयो व्याधयः ॥३

स्वामिन् ! न प्रणतोऽसि न स्तुतिपथं नीतोऽसि नासि स्मृतो
न ध्यातोऽसि भवत्वनेन भगवन् ! स्वप्नेऽपि नाभ्यर्थितः ।
एकस्मिन्नपि नाथ ! तेषु विहिते कुत्रापि जन्मान्तरे
प्रोन्मथ्नन्ति कदाचिदेव नियतं नैवंविधा व्याधयः ॥ ४

एतानि नाथ ! चटुलानि दुराशयानि
लुब्धानि रम्यविषयोपनिबन्धनानि ।
दुर्दान्तवाजिसदृशान्यविधेयभावाद्
वश्यानि मे कुरु सदैव षडिन्द्रियाणि ॥ (व.ति.) ५

मूढो विवेकविकलो विधृतोर्ध्वबाहु-
र्न त्वं शृणोषि यदहं जिन ! रारटीमि ।
मां तत्र कर्मणि नियोजय येन देव !
संसारचक्रगहनं न पुनर्विशामि ॥ (व.ति.) ६

सर्वापदां निलयमध्रुवमस्वतन्त्र-
मासन्नपातमविवेकमसारमज्ञम् ।
यावच्छरीरकमिदं न विपद्यते मे
तावन्नियोजय विभो ! कुशलक्रियासु ॥ (व.ति. ७

अज्ञस्य मे हृतविवेकमहाधनस्य
चौरैः प्रभो ! बलिभिरिन्द्रियनामधेयैः ।
संसारकूपकुहरे विनिपातितस्य
देवेश ! देहि कृपणस्य करावलम्बम् ॥ (व.ति.) ८

दीने भोजनतत्परेऽथ कृपणे निद्राभिभूतेऽलसे
व्याधिव्याकुलिते कुभूषणरते धृष्टे च दुष्टे शठे ।
मिथ्यावादिनि कामकोपसहिते क्रूरे कुरूपे जडे
कारुण्यं मयि नाथ ! नाऽथ कुरुषे भावैकयुक्ते सदा ॥ ९
(शा.वि.)

जाने निरञ्जनमहं तव तत् स्वरूप-
माडम्बरं परमसौ रचना स्तवाय ।
भूमेः स्वभारभरभङ्गुरतां विचिन्त्य
नाकुञ्चितैकचरणः किमु लावकोऽपि ? ॥ (व.ति.) १०

निर्वाणामृतमग्न ! भग्नमदन ! व्यालग्नबोधावधे !
चिन्तामात्रफलोपलेन समतां ब्रूतेऽत्र धन्यो जनः ।

केनाऽप्यत्र समं न नाथ ! यदियं मुग्धा मतिर्मन्यते
तन्मे वीतकषाय ! सारनिकष ! क्षन्तव्यमेतत् त्वया ॥ ११
(शा.वि.)

मया मार्गे मार्गे निभृतनिभृतं सम्भृतदृशा
शरण्यो नैवान्यस्त्वमिव जिन ! दृष्टः क्वचिदपि ।
तदन्येषां मार्गं सकलमपि हित्वा हतधियां
तवाङ्घ्रौ संलग्नो जिगमिषुरहं निर्वृतिपुरीम् ॥ १२
(शिखरिणी)

हे लोचने ! पश्यतमस्तनिद्रे !
आश्चर्यभूतां महिमां जिनस्य ।
न ज्ञायते ध्वंसिनि जीवलोके
किं जीवतामेष्यति वा न वेति ? ॥ (इन्द्रवज्रा) १३

अर्हन् ! जिनेन्द्र ! जितमन्मथ ! तीर्थनाथ !
विध्वस्तदोष ! विषयान्तक ! वीतराग ! ।
स्वामिन् ! समुद्धृतभवोदधिमग्न विश्व !
विश्वज्ञ ! निर्वृतिरमारमणीय ! जीयाः ॥ (व.ति) १४

कामं कामकरालितं स्फुरदुरुक्रोधाग्निकीलेन्धनं
मायाकल्पवितुद्यमानमनसं मानाहिनाऽभ्याहतम् ।
ग्रस्तं ग्रस्तसमस्तविग्रहधिया लोभेन भीमेन मां
त्रायस्वोत्तमपादनं (?नः) जिनपते ! पादद्वयं ते श्रितम् ॥ १५
(शा.वि.)

प्रशान्तानामीश ! प्रथममविधेयेषु करुणां
वितन्वानेनाहं नियतमवधूतोऽस्मि भवता ।
इदानीं त्वापन्नं जननमरणादिव्यतिकरैः
प्रसीद स्वामिन् ! न मां निजपदविधेयं कुरु चिरात् ॥ १६
(शिखरिणी)

त्वदीयायां स्वामिन् ! जिनवृषभ ! वाचि स्थिररुचे-
र्जनस्य व्यामोहो न खलु भवति क्वापि विषये ।
मयि त्वेकान्तेन स्थगितहृदये मोहतमसा
महामायाजालैर्निबिडमिव नद्धो विजयते ॥ (शिखरिणी) १७

प्रसीद कुरु कारुण्यमनुकम्पां विधेहि नः ।
येन शाम्यन्ति दुर्वाराः सद्य एव महारुजः ॥ (अनुष्टुप्) १८

ये दारिद्र्योपहतवपुषो ये च दौर्भाग्यदग्धा
ये वा शत्रुव्यसनविकला ये च दौस्थ्योपतप्ताः ।
ये वा केचिज्जिनवर ! भृशं पीडिता दुःखभारै-
स्तेषामेकस्त्वमसि शरणं तर्षितानामिवाम्भः ॥ (म.क्रा.) १९

नान्यं स्तौमि न चार्चयामि न मनस्यारोपयाम्यर्थये
न स्वप्नेऽपि जिन ! त्वदङ्घ्रिकमलद्वन्द्वादृतेऽन्वेमि वा ।
नाथैतन्मम कुर्वतः प्रतिदिनं यत् किञ्चिदप्यस्ति तद्
यन्नास्त्येव हि नास्ति तत्तदपि च त्यक्ष्यामि नैतद् व्रतम् ॥२०
(शा.वि.)

पू.आ. श्री हरिभद्रसूरिविरचितम्

## २. ॥ श्रीजिनसाधारण-स्तवनम् ॥

(विषमवृत्तम्)

अङ्गुलिदलाभिरामं सुरनरनिवहालिकुलसमालीढम् ।
देव ! तव चरणकमलं नमामि संसारभयहरणम् ॥ १

कामकरिकुम्भदारण ! भवदवजलवाह ! विमलगुणनिलय ! ।
किंकिल्लिपल्लवारुणकरचरण ! निरुद्धचलकरण ! ॥ २

मायारेणुसमीरण ! भवभूरूहसिन्धुर ! निरीह ! ।
मरणजरामयवारण ! मोहमहामल्लबलहरण ! ॥ ३

भावारिहरिणहरिवर ! संसारमहाजलालयतरण्ड ।
कलिलभरतिमिरत्रासुररविमण्डल ! गुणमणिकरण्ड ! ॥ ४

अमरपुरन्दरकिन्नर-नरवरसन्दोहभसलवरकमल ! ।
करुणारसकुलमन्दिर ! सिद्धिमहापुरवरनिवास ! ॥ ५

स्वसमयकमलसरोवर ! सुरगिरिवर-सारसुन्दरावयव ! ।
चिन्तामणिफलसङ्गम ! रागोरगगरुड ! वरचरण ! ॥ ६

हरहासहारहिमकरहिमकुन्दकरेणुधवल ! समचित्त ! ।
अकलङ्क ! सुकुलसंभव ! भवविरहं देहि मम देव ! ॥ ७

एवं संस्कृतवचनैः प्राकृतवचनैश्च सर्वथा साम्यम् ।
विदधानैर्विनुतो मे जिनेश्वरो भवतु सुखहेतुः ॥ ८

पू.आ. श्री हरिभद्रसूरिकृतम्

## ३. ॥ श्रीमहादेवाष्टकम् ॥

(अनुष्टुप्)

यस्य सङ्क्लेशजननो रागो नास्त्येव सर्वथा ।
न च द्वेषोऽपि सत्त्वेषु शमेन्धनदवानलः ॥ १

न च मोहोऽपि सज्ज्ञान-च्छादनोऽशुद्धवृत्तकृत् ।
त्रिलोकख्यातमहिमा, महादेवः स उच्यते ॥ २

यो वीतरागः सर्वज्ञो, यः शाश्वतसुखेश्वरः ।
क्लिष्टकर्मकलातीतः, सर्वथा निष्कलस्तथा ॥ ३

यः पूज्यः सर्वदेवानां, यो ध्येयः सर्वयोगिनाम् ।
यः स्रष्टा सर्वनीतीनां, महादेवः स उच्यते ॥ ४

एवं सद्वृत्तयुक्तेन, येन शास्त्रमुदाहृतम् ।
शिववर्त्म परं ज्योतिः, त्रिकोटीदोषवर्जितम् ॥ ५

यस्य चाराधनोपायः, सदाज्ञाभ्यास एव हि ।
यथाशक्ति विधानेन, नियमात्स फलप्रदः ॥ ६

सुवैद्यवचनाद् यद्वद् व्याधेर्भवति सङ्क्षयः ।
तद्वदेव हि तद् वाक्याद् ध्रुवसंसारसङ्क्षयः ॥ ७

एवम्भूताय शान्ताय, कृतकृत्याय धीमते ।
महादेवाय सततं, सम्यग्भक्त्या नमो नमः ॥ ८

पू.आ.श्री बप्पभट्टसूरिविरचितम्

# ४. ॥ 'शान्तो वेषः' इत्यपराभिधानम् साधारणजिन-स्तवनम् ॥

शान्तो वेषः शमसुखफलाः श्रोतृरम्या गिरस्ते
कान्तं रूपं व्यसनिषु दया साधुषु प्रेम शुभ्रम् ।
इत्थम्भूते हितकृतपतेस्त्वय्यसङ्गा विबोधे
प्रेमस्थाने किमिति कृपणा द्वेषमुत्पादयन्ति ? ॥ (म.क्रा.) १

अतिशयवती सर्वा चेष्टा वचो हृदयङ्गमं
शमसुखफलः प्राप्तो धर्मः स्फुटः शुभसंश्रयः ।
मनसि करुणा स्फीता रूपं परं नयनामृतं
किमिति सुमते ! त्वय्यन्यत् स्यात् प्रसादकरं सताम् ? ॥ २
(हरिणी)

निरस्तदोषेऽपि तरीव वत्सले कृपात्मनि त्रातरि सौम्यदर्शने ।
हितोन्मुखे त्वय्यपि ये पराङ्मुखाः
पराङ्मुखास्ते ननु सर्वसम्पदाम् ॥ (वंशस्थ) ३

सर्वसत्त्वहितकारिणि नाथे, न प्रसीदति मनस्त्वयि यस्य ।
मानुषाकृतितिरस्कृतमूर्त्ते-रन्तरं किमिह तस्य पशोर्वा ? ॥ ४
(स्वागता)

त्वयि कारुणिके न यस्य भक्ति-र्जगदभ्युद्धरणोद्यतस्वभावे ।
न हि तेन समोऽधमः पृथिव्या-
मथवा नाथ ! न भाजनं गुणानाम् ॥ ५

एवंविधे शास्तरि वीतदोषे, महाकृपालौ परमार्थवैद्ये ।
मध्यस्थभावोऽपि हि शोच्य एव,
प्रद्वेषदग्धेषु क एष वादः ? ॥ (उपजाति) ६

न तानि चक्षूंषि न यैर्निरीक्ष्यसे
न तानि चेतांसि न यैर्विचिन्त्यसे ।
न ता गिरो या न वदन्ति ते गुणान्
न ते गुणा ये न भवन्तमाश्रिताः ॥ (वंशस्थ) ७

तच्चक्षुर्दृश्यसे येन, तन्मनो येन चिन्त्यसे ।
सज्जनानन्दजननी, सा वाणी स्तूयसे यया ॥ (अनुष्टुप्) ८

न तव यान्ति जिनेन्द्र ! गुणा मितिं
मम तु शक्तिरुपैति परिक्षयम् ।
निगदितैर्बहुभिः किमिहापरै-
रपरिमाणगुणोऽसि नमोऽस्तु ते ॥ (द्रुत. वि.) ९

पू.आ.श्री मुनिचन्द्रसूरिविरचिता

## ५. ॥ प्रातःकालिक-जिनस्तुतिः ॥

(वसन्ततिलका)

येऽर्हन् ! प्रभातसमये तव पादपद्म-
मापन्महार्णवसमुत्तरणैकसेतुम् ।
पश्यन्ति नश्यति ततस्ततमाशु सर्व-
मेनोऽतितीव्रभवदाहशमाम्बुवाह ! ॥ १

उद्भूतभूरिसुकृता भविनो भवन्ति
ये केचन च्युतमदप्रसराः प्रगे ते ।

उत्फुल्लपङ्कजदलोपमनेत्रपात्रा-
स्त्राणप्रदौ तव पदौ प्रविलोकयन्ते ॥ २

प्रातः प्रसन्नवदना भुवनावतंस-
मासन् सितोज्ज्वलपदा भवदीयरूपम् ।
ये केचिदीक्षणपथं प्रथमं नयन्ति
ते फेनपाण्डुरयशोभवनं भवन्ति ॥ ३

उद्भूतभाग्यभवभाजनमाननीय-
मालोक्य भास्वदुदये चलनद्वयं ते ।
भव्या नयन्ति वशमत्र जगत्त्रयेऽपि
भद्राणि चन्द्रकिरणोत्करनिर्मलानि ॥ ४

चिन्तामणिर्न च नवा नवकामधेनुः
कल्पद्रुमोऽपि न न भद्रघटः प्रसन्नः ।
आविःकरोति फलमर्कविलोककाले
यत्ते पदाम्बुरुहमीक्षितमात्रमेव ॥ ५

ताराविरामसमये कमलाकरेषु
यातेषु बोधमुदितामलसौरभेषु ।
धन्या विनिद्रितदृशः सुदृशः प्रभाव-
मालोकयन्ति कमलाऽऽकुलमाननं ते ॥ ६

भिन्दन्ति दुर्गतिभयानि समानयन्ति
स्वःसम्भवानि शिवजानि च मङ्गलानि ।
भानूदये तव नमन्ति नुवन्ति येऽङ्घ्री
पापाम्बुराशिपरिशोषसमीर ! धीर ॥ ७

तेषां न जन्म न च जीवितमीशभाव-
मुच्चं यशश्च फलवन्न वदन्ति सन्तः ।
यैरुत्थितैर्बहलहर्षजलाविलाक्षै-
र्निध्यायते क्रमकजं न तव प्रभाते ॥ ८

एषा प्रभातसमयस्तुतिरादरेण
पापठ्यते भगवति प्रहितैर्मनोभिः ।
यैस्तेऽत्र कुन्दकलिकोज्ज्वललाभभाजो
जायन्त एव मुनिचन्द्रपदप्रपन्नाः ॥ ९

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

## ६. ॥ मङ्गलशब्दार्थस्तवनम् ॥

(अनुष्टुप्)

जय श्रीजिनकल्याण-वल्लीपल्लवनाम्बुद ! ।
मुनीन्द्रहृदयाम्भोज-विलासवरषट्पद ! ॥ १

तव नाथ ! पदद्वन्द्व-सपर्यारसिका जनाः ।
सर्वसम्पत्सुखश्रीभि-र्विलसन्ति सदोदयाः ॥ २

नृलोके चक्रिताद्या याः, स्वर्लोके चेन्द्रतादयः ।
शिवेऽनन्तसुखाद्यास्ता-स्तव भक्तिवशाः श्रियः ॥ ३

सर्वश्रेयःश्रियां मूलं, ददद्धर्मं समग्रवित् ।
योगक्षेमकरो नाथस्त्वमेव जगतामसि ॥ ४

त्वमेव शरणं बन्धुस्त्वमेव मम देवता ।
तन्मां पाहि भवात्तात !, कुरु श्रेयःसुखास्पदम् ॥ ५

पू.आ.सहस्त्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## ७. ॥ मङ्गलशब्दार्थस्तवः ॥

(उपजातिः)

जयश्रियां धाम सुधामधारिन् !,
सुत्रामदामार्चित ! देवदेव ! ।
त्रिलोकपूजातिशयाभिराम !,
प्रकाममानन्दननन्दनेतः ॥ १

वर्गत्रयस्यार्जनबद्धचेतसः,
सुचेतसः कर्मसु सत्सु सूद्यमाः ।
ददात्यदो नाथ ! तव स्तवोऽत्र तद्,
बुधा यतन्ते सकलाः फलार्थिनः ॥ २

अयं महानन्दपदाऽऽप्तये सतां,
हेतुर्विशुद्धः प्रथितो मनीषिषु ।
इति प्रवीणा मुनयोऽपि ते स्तवे,
रतिं दधन्ते भवभोगनिःस्पृहाः ॥ (वंशस्थ) ३

प्रवर्द्धमानोत्तममङ्गलावली,
श्रियः सदानन्दरसोर्मिवर्मिताः ।
सुखानि विश्वाशयविश्रमास्पदं,
प्रभो ! वशत्वं नयते तव स्तवः ॥ (वंशस्थ) ४

त्रातारमेकं परमं वदन्ति यं,
मनस्विनोऽभीष्टदधर्मदानतः ।
जिनेन्द्र ! तस्मै भवते सदा जग-
त्पितामहाय प्रभुतात्मने नमः ॥ ५

स्तुतिमिति तनुते यस्ते मघवमहामुनिसुन्दरसुताङ्घ्रे ।
स भवति गुणसम्पदा समस्ते
कलभि(मि?)ति तद्वितराचिरान्ममाऽपि ॥ ६

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## ८. ॥ मङ्गलशब्दार्थस्तवः ॥

(वैतालीयम्)

समवाप्य जयश्रियं जग-त्त्रितयीजित्वरमोहभूपतेः ।
त्रिजगत्प्रभुताश्रियां पदं, समभूद्यस्तमहं जिनं स्तुवे ॥ १

इदमौपयिकं शिवश्रियां, कृपणानामपि मादृशां सुखम् ।
जगदे कृपया महात्मभिः, करवै तेन तव स्तुतिं विभो ! ॥ २

त्वयि हृद्युदिते सतां रवा-विव खे स्युः कमला विकस्वराः ।
वितमःप्रसराः प्रभो ! धियः, पुनराशा इव सर्वतो जिन ! ॥३

वशगा धृतिकान्तिकीर्त्तयो, नरदेवप्रभुतादयः श्रियः ।
विभवो विभवस्तवाऽपि यः स्तुतिवल्लेर्भवतः फलानि ते ॥४

सुपरीक्ष्य समग्रदातृषु, प्रभुरेकोऽर्थितदायकः श्रितः ।
मयकाऽर्थितया त्वमेव तत्, परमानन्दपदं ददस्व मे ॥ ५

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## ९. ॥ मङ्गलशब्दार्थस्तवः ॥

(अनुष्टुप्)

जगतां प्रभुतां प्राप, यो भावारिजयश्रिया ।
शाश्वतानन्दरूपं तं, श्रीसर्वज्ञं स्तुवे मुदा ॥ १

प्रातिहार्यश्रिया वाणी-गुणैश्चातिशयोच्चयैः ।
योऽनन्तज्ञानऋद्ध्या च, त्रैलोक्यस्योपकारकः ॥ २

शाश्वतं मङ्गलं नित्य-सुखं तं विश्वदैवतम् ।
त्रिलोक्याः शरणं त्राणं, नाथमेकं जिनं भजे ॥ (युग्मम्) ३

यस्य नेतुः पदाम्भोज-पूजयाऽभीष्टसम्पदः ।
जायन्ते सर्वतोऽम्भोद-वृष्ट्येव भुवि वीरुधः ॥ ४

मम देवाधिदेवोऽयं प्रभुरेको भवे भवे ।
भूयाद्देयाच्च कल्याणमचिराच्छाश्वतं परम् ॥ ५

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## १०. ॥ श्रीजिनमङ्गलस्तवः ॥

(अनुष्टुप्)

आनन्दाद्वैतदातारं, जयश्रीद्धं जगत्पतिम् ।
श्रीजिनं भक्तितः स्तौमि, दिष्टविष्टपमङ्गलम् ॥ १

तानाऽऽयुश्चिरमारोग्य-मष्टावपि महर्द्धयः ।
इन्द्रश्रीः शिवसम्पच्च, श्रयन्ति त्वां स्तुवन्ति ये ॥ २

सुराः किङ्करतां यान्ति, मन्त्राः सिद्ध्यन्त्यभीष्टदाः ।
ग्रहाः स्युर्वरदास्तेषां, येषां त्वं हृदि तिष्ठसि ॥ ३

दुःस्वप्नं दुर्निमित्तं वा दृष्टा भूपाः सुरादयः ।
अनुकूलत्वमेवाशु, त्वन्नतेर्दधतेऽङ्गिनाम् ॥ ४

सर्वे श्रेयोऽर्थिनो विघ्नाः, श्रेयोमूलं च ते स्तुतिः ।
इति त्वां स्तुवतो मेऽर्हन्निष्टश्रेयःप्रदो भव ॥ ५

(स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराऽचिरान्ममापि ॥) (पुष्पिताग्रा) ६

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## ११. ॥ श्रीजिनब्रह्मस्तवः ॥

(अनुष्टुप्)

परानन्दपदायार्हन् भवाऽमित्रजयश्रिया ।
त्वदनन्तगुणाम्भोधौ, रमयामि निजां गिरम् ॥ १

विकल्पास्पृष्टरूपाय, निर्द्वन्द्वपरमेष्ठिने ।
निरुपाधिपरानन्द–शालिने ते विभो ! नमः ॥ २

ध्यानेन त्वन्मयीभावं, कथञ्चिद्याति यः सुधीः ।
तत्त्वदैक्यपथेनैव, स महानन्दमश्नुते ॥ ३

तव सम्यक्स्वरूपस्याप्यनुभूत्यक्षमा वयम् ।
कविडम्बरिणोऽनन्तांस्त्वद्गुणान् स्तुवतः स्तुमः ॥ ४

तात ! तत्प्रार्थये देहि, मम काञ्चन तां कलाम् ।
याथात्म्यात्त्वत्स्वरूपस्यैवानुभूतिर्भवेद्यथा ॥ ५

पू.आ.सहस्त्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## १२. ॥ श्रीजिनमहिमस्तवः ॥

(द्रुतविलम्बितम्)

शिवपदप्रभुतां दधतं जय-
श्रियमवाप्य महाऽऽन्तरविद्विषाम् ।
जिनपतिं भवभीतिविभेदनं,
सकलवाञ्छितसिद्धिकरं स्तुवे ॥ १

त्रिभुवनोपकृतिक्षमवैभवा,
जिनपतेऽतिशयादिगुणोच्चयाः ।
इह वदन्ति तवैव शिवश्रियां,
वितरणे शतधा स्तवनार्हताम् ॥ २

किमपि नाथ ! तवाद्भुतमङ्गना-
गणवशीकृतिपाटवमीक्ष्यते ।
त्वदभिधाऽपि हि यत्र भवेदिमं,
भजति मुक्तिरपीष्टसमृद्धिवत् ॥ ३

तव दृगम्बुजयोरखिला रमा,
जिन ! वसन्त्यनुभूतिमियत्त्र्यदः ।
निपततः खलु येषु नरेष्विमे,
प्रविलसन्ति सदापि यदेषु ताः ॥ ४

दृगतिथिस्त्वमभूर्मम शैवलो-
ल्बणमहाह्रदवासितिमेरिव ।
जिनशशीव विमोहतमोहृते-
र्वितर केवलबोधसुखोदयम् ॥ ५

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचित:

## १३. ॥ श्रीजिनमङ्गलस्तव: ॥

(औपच्छन्दसिकम्)

प्रभुतां शिवसम्पदामवाप्या-
न्तरविद्वेषिजयश्रिया कृतार्थम् ।
स्मृतिवन्दनपूजनस्तवेभ्यो,
भुवनाभीष्टकरं जिनं स्तवीमि ॥ १

सुरपादपधेनव: फलं यद्,
विविधाराधनतोषिता ददन्ते ।
ददते स्मृतिमात्रमीश ! किञ्चित्,
तव नामाप्यवहीलना यतोऽस्मिन् ॥ २

सकलेप्सितशर्मदानदक्षं,
स्पृशति त्वां मनसापि यो मनीषी ।
विपदो न कदापि संस्पृशन्ति
स्पृशतोऽर्कं न तमांसि भीतये यत् ॥ ३

तव रूपमनन्तमेव शर्मे-
त्युदितं योगिवरैर्विभाति चेदम् ।
त्वयि येन हृदैकतां प्रपन्नेऽनुभव:
स्यात्किल तस्य भक्तिभाजाम् ॥ ४

अखिलं प्रवितर्क्य दैवतौघं,
त्वयि देवाऽध्यगमं प्रभुत्वबुद्धिम् ।
इति संस्तुवत: पदौ तव द्वौ,
मम देया: पदमेकमेव तेऽर्हन् ॥ ५

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## १४. ॥ श्रीजिनमङ्गलस्तवः ॥

(अनष्टुप्)

परं श्रियःपदं प्राप्तं,सकलारिजयश्रिया ।
स्तुवेऽर्हन्तं स्वजन्मादि, सुखाकृतजगत्त्रयम् ॥ १

संस्पृशत्कृतिनां चेतो, यं शुद्धैकगुणात्मकम् ।
रज्यते नितरां रक्तानप्यन्यांस्तु विरज्यते ॥ २

केवलं केवलं यस्य, ज्ञातुं महिमवैभवम् ।
क्षमतेऽक्षमतेनैव, विषयस्तत्परं हि यत् ॥ ३

यस्य नेतुः पदाम्भोजं,संस्मरन्तोऽपि भाविनः ।
सर्वापत्तापनिर्मुक्ताः, शीतीभावं भजन्त्यहो ! ॥ ४

जिनः स जगतां नेता, प्रणेता पुण्यसम्पदाम् ।
शरणं शरणं शैव-सुखस्याभीष्टदोऽस्तु मे ॥ ५

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## १५. ॥ श्रीजिनभक्तिस्तवः ॥

(वैतालीयम्)

प्रभुरक्षरशर्मसम्पदं, भगवान् मोहजयश्रियाऽऽप यः ।
भुवनार्थितकल्पपादपं, तमहं स्तौमि जिनं जगद्गुरुम् ॥ १

जिन ! कल्पितसम्भवे फले,
स्पृहया केऽपि परान् स्तुवन्ति चेत् ।
स्तवने तव तत् सुनिश्चिता-
ऽक्षरशमौघफलेऽपि कोऽलसः ? ॥ २

पशवोऽपि मुदोल्लसन्ति यां, गिरमद्वैतगुणां निशम्य ते ।
हृदयं न तयापि तोष्यते,
जिन ! येषां तु न वेद्मि के तु ते ? ॥ ३

जगतामसि पालने प्रभुः, करुणा क्वापि न हीयते च ते ।
जहतो विषयं तयोस्तथाऽप्यधियः क्लेशजुषः कथं भवे ? ॥४

तव लाययतां मनः स्तवे, कृतिनां किन्नु तपस्क्रियादिभिः ? ।
कनकोद्भवकर्मवेदिनां, धनलाभौपयिकैर्हि किं परैः ? ॥ ५

तव गोचरतां स्तुतेर्गुणा, दधतेऽनन्ततया न कस्यचित् ।
सफलोऽत्र मम श्रमः पुन–र्जनुषः स्वस्य फलेग्रहित्वतः ॥ ६

भगवन् ! प्रमितापि ते स्तुतिः,सकलेष्टार्थविधायिनीति मे ।
कलयन्नसि यां स्वयं कलां, परमानन्दमयीं प्रयच्छताम् ॥ ७

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## १६. ॥ श्रीजिनराजभक्तिमङ्गलस्तवः ॥

(रथोद्धता)

यैर्भवन्ति हृदयस्थितैर्बुधा,
मोहराजविजयश्रियां पदम् ।
तान् स्मरामि जिननाथ ! ते गुणान्,
कांश्चनाऽर्थितकरांस्तवाध्वना ॥ १

कामधेनुमणिपादपादयो, गौरवा जगति ये प्रतिष्ठिताः ।
त्वत्प्रसादजनितोच्चसम्पदां, तेऽपि भान्ति पशुशर्करोपमाः ॥२

यः समृद्धिनिचयोऽत्र चक्रिणो, यो भरोऽपि सुरराजशर्मणाम् ।
भक्तिरागनृपतेस्तव प्रभो !, तौ सदापि भजतो भुजिष्यताम् ॥३

चेद्भवन्ति तव सन्निधानतोऽचेतनेष्वपि फलर्द्धयो द्रुषु ।
उल्लसन्ति भुवनोत्तराः श्रियः,सेवकेष्वपि किमद्भुतं ततः ? ॥४

सन्ति यद्यपि महोदयश्रियां, साधका अपि तपोजपादयः ।
भक्तिरेव विभुतां तु तेऽश्नुते, तेष्वबादिषु सुबीजवत् कृषेः ॥५

विश्वरक्षणचणस्य तेन ते, संश्रितोऽस्मि शरणं पदद्वयम् ।
यत्पदं भवभियः स्पृशन्ति नो, देहि नाथ ! तदनन्तशर्म मे ॥६

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## १७. ॥ श्रीमङ्गलशब्दस्तवः ॥

(द्रुतविलम्बितम्)

त्रिभुवनाधिप ! मोहजयश्रिया,
परमसौख्यमनन्तमुपेयुषः ।
स्तवनतस्तव नाथ ! समीहिताः,
शिवरमा विदधेऽद्य करस्थिताः ॥ १

सकललोकहितानि विधित्सता,
व्यरचि यत्समयौपयिकं त्वया ।
भुवननाथ ! तवैव सुनाथतां,
सहृदयस्तत एव न वेद कः ? ॥ २

भुवनपालक ! केवलसंविदा,
कलयताऽप्यखिलार्थगणं त्वया ।

किमहकं कलितो न सुदुःखितो,
मदवने भविता किमथ क्रमः ? ॥ ३

सममशेषविदो न भिदादिमा,
क्रमजुषं जिन ! मामव तद्भवात् ।
न करुणा तव विष्टपगोचरा,
सुगुणवद्विगुणेऽपि हि हीयते ॥ ४

भुवि यथोपकृतो रविशीतरुग्-
जलधरा गुणदोषदृशो न वै ।
त्वमसि नाथ ! तथाऽऽश्रितपालने,
भवभयादियतैव धृतिर्मम ॥ ५

समधिगम्य विशेषमशेषतः,
शरणमेष भवन्तमथाऽऽगमम् ।
इति मयाऽऽर्त्तिभृतोचितमादधे,
त्वमथ नाथ ! जिनोचितमाचर ॥ ६

पू.आ. श्री मुनिसुन्दरसूरिविरचिता

## १८. ॥ श्रीजिनपतिमहार्थद्वात्रिंशिका ॥

जयश्रीदायकं विश्वनायकं मोहजित्वरम् ।
अनन्तमहिमाम्भोधिं श्रीजिनं श्रेयसे स्तुवे ॥ (अनुष्टुप्) १

(वंशस्थ)

जिन ! स्तवं यं तव वासवादयः
सृजन्ति भक्तेर्विदधेऽहमप्यमुम् ।

महाम्बुदा यत्किल भुञ्जते पयः
किमम्बुधेस्तच्छफरार्भकोऽपि न ॥ २

फलं यदा पञ्चमकल्पसम्पदं
परे लभन्ते परमैर्यमादिभिः ।
स्तुतेर्लवस्यापि तवानुषङ्गिकं
तदाऽऽमनन्तः सुधियोऽत्र केऽलसाः ? ॥ ३

तथा न शस्यं हरिपूज्यतादि ते
यथा मुने ! मुक्तिपथप्रकाशनम् ।
न दानलुभ्यद् भ्रमरादि दिग्गजे
तथा महत्त्वाय यथा क्षमोद्धृतिः ॥ ४

विधन्ति दृष्टेष्विह बालिशाः स्पृहां
ददासि तत्त्वं तु किमप्युपासितः ।
यदीक्षितं क्वापि न चेक्ष्यतेऽपि तै-
र्भजन्ति न त्वामिति युक्तमीश ! ते ॥ ५

स्वजातिवात्सल्यवशादिवाङ्गिनः
सकर्म्मकैरेव मिलन्ति दैवतैः ।
अलक्ष्यरूपं त्रिजगद्विलक्षण-
स्थितिं भवन्तं ननु के श्रयन्तु तत् ? ॥ ६

स्वतन्त्रमुज्जासयता रिपूकृतास्-
त्वया स्मराद्याश्चिरसेवका अपि ।
उपारतं त्वामिति विघ्नयन्ति ते
जनं त्वदन्यांस्तु बहुं प्रयुञ्जते ॥ ७

त्वया निरास्यन्त चिरत्नसेवकाः
स्मरादयो हंसि च तत्पदान्यपि ।
भजन्ति तत्त्वं बहवो भियेव ना-
ङ्गिनोऽन्यथाचारवतः परान् श्रिताः ॥ ८

परेषु मोहाः प्रमदादिभिः स्फुटस्-
तदन्विते ज्ञानमशेषगं न च ।
न तद्विना वस्तु यथायथं वद-
त्यतः परोक्तैः किमु वञ्च्यते जगत् ? ॥ ९

विधूय तेऽध्वानमशेषवेदिनस्-
तपस्क्रियाऽनुष्ठितयः परेषु याः ।
स्फुरन्ति मोहस्य विडम्बनाऽम्बुधे-
र्ध्रुवं विभो ! ता अपि काश्चिदूर्मयः ॥ १०

लवो महिम्नां जिन ! कोऽपि वर्ण्यते
परेषु मोहग्लपितेषु यो जडैः ।
निबन्धनं क्लेशततेरमीष्वयं
सतां कृपायै स्थविमेव शोफजः ॥ ११

स्तुवन्ति यद्दैत्यजयादिभिर्गुणै-
र्जडाः प्रभुत्वं भगवन् ! परेष्वपि ।
कषायदास्याज्जगतां स धर्म्मणाऽ-
भ्युदेति हास्यं चरितेन तेन नः ॥ १२

विभो ! कुशास्त्रैर्ग्रहिला यथा यथा
परे यतन्ते गतये शिवाध्वनि ।

भवन्ति दूरेण ततस्तथा तथा
पुरात्पराञ्चोऽभिमताद् भ्रमादिव ॥ १३

त्वयीश ! रत्नत्रयमानुभूतिकं
शिवश्रियामौपयिकं वदत्यपि ।
जडैः सतृष्णैर्मृगतृष्णिकास्वपि
प्रपाययन्तोऽम्बु किमाश्रिताः परे ? ॥ १४

त्वया पिशाचो जिन ! मोहनामकस्-
तिरस्कृतो यः शिवशर्मकाङ्क्षिणा ।
स नूनमाराधनतः श्रितः परै-
र्बलेन चाऽस्य ग्रहिलीकृतं जगत् ॥ १५

तवेश ! देवान्तरतो वदन्ति ये-
ऽधिकत्वमेतानपि निन्दकान् वदे ।
स्तुतिः किमाधिक्यविवर्णने भवे-
न्महाम्बुराशेर्मृगतृष्णिकाऽम्बुतः ? ॥ १६

भयं न तेषां भवदुःखसम्भवं
विडम्बना मोहपिशाचजाऽपि च ।
शशाम नो शाम्यति वा शमिष्यति
प्रभुर्न येषां शरणं त्वमङ्गिनाम् ॥ १७

यथा भवापायनिदानमाश्रवाः
शिवश्रियो हेतुरनाश्रवास्तथा ।
त्वमेव तान् सम्यगवग् न मत्प्रभो !
परं शिवस्यौपयिकं त्वदीरितात् ॥ १८

त्वदंह्रिसंस्पृष्टरजस्यपीश ! यः
स्फुरेत्प्रभावः स सुरान्तरेषु न ।
उपान्तदारुण्यपि चन्दनस्य यत्
क्व सौरभं तत्फलदान्तरेषु वा ॥ १९

परे ददन्ते भवचारके जनि-
स्थिति क्षयांश्चित्रमहाव्यथेऽङ्गिनाम् ।
अचिन्त्यसौख्यं च महोदये
भवानतन्त्रयश्चैत्य इतो विशेष्यसे ॥ २०

विवेचयन् यश्चरितैर्हरादिकान्
निजान् भवन्तं विजहच्च दूरतः ।
अलम्भयत्त्वामिति मादृशानपि
प्रभुं स मोहः किल बान्धवः परः ॥ २१

तव स्वरूपं सुगतो विचारयंस्-
तदन्यवत्सु व्यतिवृत्तिमेव यत् ।
त्वत्तां च तद्वत्सु ददर्श धीनिधि-
र्व्यावृत्त्यभेदाविति तत्त्वमास्थितः ॥ २२

विलोकते देव ! तवागमाञ्जनान्-
निसर्गचिद्दर्शनलोचनोपगम् ।
अनाद्यविद्यातिमिरं निरस्य यः
स एव किञ्चित्तव रूपमीक्षते ॥ २३

समः प्रभोऽर्थः खलु देशतोऽपि ते
विचेतनो नो न परोऽपि मोहयुक् ।

सचेतनो मोहविवर्जितश्च यः
स तु त्वमेवेत्युपमां न गाहसे ॥ २४

कथं स मेयो महिमा तव प्रभो !
विहारकल्याणकपञ्चकादिभिः ? ।
यतस्त्वदाप्ताद्भुवनोपकारितां
द्रव्यादयोऽर्था दधते परेऽप्यहो ! ॥ (उपजाति) २५

तनोषि तत्सप्तसु नाथ ! रज्जुषु
स्थितोऽपि चेज्जन्मनि नारकाङ्गिनाम् ।
हृदि स्थितस्तत्कृतिनां सुखाद्वयं
यदव्ययं त्वं ददसे किमद्भुतम् ? ॥ २६

अवाप्य रागादिकसेवकान् परै-
र्वशीकृतं नाथ ! यथा त्रयं जगत् ।
निरस्य चैतान्न तथा त्वया न तत्
स्वसेवकं मामवमन्तुमर्हसि ॥ २७

ददासि चेत्त्वं स्वसमाधिवारिधे-
र्ममैककं बिन्दुमपीश ! तोषतः ।
ततः स्मराद्या मम केऽरयः कुतो-
ऽथवा भयं किं सुलभं न शर्म वा ? ॥ २८

तदर्थये त्वां प्रभुमुद्विजो भवा-
दवाप्य रागाद्यरिभिः कदर्थितः ।
समाधियोगं मम देहि तं द्रुतं
यतो विमुच्ये जिन ! भावशात्रवात् ॥ २९

जिनवर ! भवतैव दर्शितोऽयं
निज इह कोऽपि स धर्मकल्पवृक्षः ।
निरवधि लभते शुभानि यस्मात्
त्रिजगदपीष्टफलान्यनाद्यनन्तात् ॥ (पुष्पिताग्रा) ३०

बहुविधमभिवीक्ष्य सर्वदेवांस्-
तदुदिततत्त्वगुणांश्च तर्कनेत्रैः ।
शरणमगमकं तवैव पादा-
ववितथतत्त्वनिधिं च पाहि तन्माम् ॥ (पुष्पिताग्रा) ३१

श्रीसोमसुन्दरगुरुक्रमसेविनाऽर्हन्
दृब्धान्मयेति मुनिसुन्दरसूरिणाऽस्मात् ।
स्तोत्रान्ममान्यसुधियामपि देहि किञ्चि-
त्तद्येन विस्फुरति मोहभिदे जयश्रीः ॥ (वसन्ततिलका) ३२

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## १९. ॥ स्वसांसारिकदुःखप्रकटन-दुःखप्रतिकार-विज्ञप्तिरूपं स्तोत्रम् ॥

आनन्दं यः परं प्राप रागाद्यरिजयश्रिया ।
तं श्रीजिनपतिं स्तौमि सिद्धानन्तचतुष्टयम् ॥ (अनुष्टुप्) १

प्रभो ! त्वया मुक्तिसुखं न दूरे
यदेव वाञ्छन्ति भवोद्विजोज्ञाः ।
अपाद्युपायोऽस्य तु संयमो यो
विशुद्धिरेतस्य दुरासदा मे ॥ (उपेन्द्रवज्रा) २

(उपजाति)

हातुं यदीशे न रसेषु लौल्यं
न गन्धगर्द्धं न हि शब्दरागम् ।
वाञ्छं न च स्पर्शसुखे न रूपे-
ऽप्युद्यत्कषायः सति ते श्रुतेऽपि ॥ ३

महाव्रतानां न हि मे विशुद्धि-
र्नास्मि प्रगल्भः समितीश्च धर्तुम् ।
गुप्तीस्तथा पालयितुं प्रमादै-
र्ध्यातुं च सद्ध्यानमसद्विकल्पैः ॥ (यु.) ४

भीतस्ततोऽर्हन् ! भवदुःखराशे-
रितश्च मुक्तेर्विमृशन्नुपायान् ।
स्तवेष्वसारेष्वपि ते यतेऽस्या-
माम्नायमाम्नाय कुतश्चिदेतम् ॥ ५

मां कद्वदं निर्गुणमप्यमुं तद्
रक्ष प्रभो ! त्वं दययैव दीनम् ।
शक्यं न चेन्निर्गुणपालनं तद्
गुणान् ददस्वेत्यपि ते हि वश्यम् ॥ ६

ज्ञानं न मेऽस्ति प्रचुरस्तु गर्वः
क्रोधोऽस्ति भूयान् न तपश्च तीव्रम् ।
न सत्क्रियाऽऽस्ते बहुला तु माया
वस्त्रादिलोभोऽस्ति न संयमस्तु ॥ ७

सन्तीश ! शिष्या न च शुद्धशिष्या
आडम्बराः सन्ति न सुक्रियास्तु ।

वाग्डिण्डिमोऽस्ति प्रशमस्तु नान्तः
सत्पुस्तकाः सन्ति न चार्थबोधः ॥ (इन्द्रवज्रा) ८

एवं समग्रा अपि सन्ति दोषा
गुणाः पुनर्नो मयि लेशतोऽपि ।
बिभेमि दोषप्रभवात् फलात्तु
लुभ्यामि तस्मिन् गुणसम्भवे तु ॥ ९

उपायहीनं तदुपेयसक्तं
मां किञ्चिदीशौपयिकं प्रशाधि ।
यतो जिनैषोऽपि गुणानवाप्य
लभेत तेषां फलमप्यभीष्टम् ॥ ( च.क.) १०

गर्वेण मे ज्ञानमपाक्रियेत
ध्यानं च सर्पेत्कुविकल्पजालैः ।
चारित्रलेशोऽपि न सत्कषायैः
क्रियाकलापश्च सदा प्रमादैः ॥ ११

इत्यान्तरैर्मे ह्रियते द्विषद्भिः
प्रसह्य सर्वस्वमिदं मदोग्रैः ।
एषां विजेताऽस्ति न च त्वदन्य-
स्तत्ते पुरो नायक ! पूत्करोमि ॥ १२

विश्वत्रयैश्वर्यरमालयोऽस्ति
कृपालुरेकश्च कृपाऽऽस्पदेषु ।
इति प्रसिद्धिर्जयिनी तवैव
सम्यक् ततो मां जिन ! तां च रक्ष ॥ १३

अजस्रदुर्ध्यानकदर्थितं मे
लगत्यनुष्ठानविधौ मनो न ।
फलाय चाऽयं न मनो विना स्यात्
प्रयासमात्रं तदसौ हहा ! मे ॥ (उपेन्द्रवज्रा) १४

किमस्म्यभव्यः किमवश्यभावी
दुःखार्णवानन्तभवभ्रमो मे ? ।
तद्दुर्विकल्पैर्हि मनोऽर्जतीद-
मघं यदर्हन्न हि वक्तुमीशे ॥ १५

त्वामेव नाथं शरणं प्रपद्ये
सदाऽप्यधीये भवदागमं च ।
स्मरामि ते नाममयांश्च मन्त्रांस्-
तेषामधिष्ठायकदेवताश्च ॥ १६

बिभेमि पापाज्जिन ! दुर्गतेश्च
याचे च सर्वान् भवपातरक्षाम् ।
ईहे च सद्ध्यानमदुर्विकल्पं
मनःशुभालम्बनयन्त्रणेन ॥ १७

भावारिवर्गस्य मिलत्तथापि
मनो दुरन्तं न निषेद्धुमीशे ।
तच्छिक्षितैश्चैतदसद्विकल्पै
र्मां दुर्गतौ पातयतीति रक्ष ॥ १८

त्वयि प्रभौ सत्यपि विश्वताते
मनोरिपुर्मां बहुदुर्विकल्पैः ।

कदर्थयित्वा नरकाग्निपाक-
योग्यं क्वचित्क्षेप्स्यति तन्न जाने ॥ १९

उच्चैर्गुणस्थानकमारुरुक्षु-
र्यावच्छुभध्यानकृते यतेऽहम् ।
तावन्मनोऽरिः कुविकल्पपाशै-
र्निबध्य मां ही क्षिपतेऽध एव ॥ २०

न खेलनं श्वाऽर्हति पूतिकर्णो
यथा न कुष्ठी ललनादिभोगम् ।
न चातिसारी घृतपानमेवं
नाऽर्हामि मुक्तिं कुमनोहतो ही ॥ २१

कृपां कृपालो ! मयि धेहि तत्पदे
प्रदेहि मे शक्तिमिमां ययाऽनिशम् ।
वशीभवेन्मानसकं भवाम्बुधौ
क्षिपेन्न यन्मां कुविकल्पजालतः ॥ (वंशस्थ) २२

त्वामनन्यगतिकः प्रभुमेकं
संश्रितोऽस्मि शरणं भवभीरुः ।
तत्तथा कुरु यथा कुविकल्पा
न क्षिपन्ति रिपवो नरके माम् ॥ (स्वागता) २३

वाङ्-मनो-ऽङ्गजनितं मम पापं
द्रव्यतोऽपि भवतः स्तवनाद्यैः ।
नाशमाशु लभतां शिवता ते
तेऽप्यलं यदिह नाथ ! तवैव ॥ (स्वागता) २४

संवृतेन मनसा महर्षयो
येन निर्वृतिमनन्तशोऽप्यगुः ।
मां तदेव कुविकल्पभृद्भवा-
म्भोनिधौ क्षिपति ही करोमि किम् ? ॥ (रथोद्धता) २५

प्रभो ! निपीयापि तवागमामृता-
न्यवाप्य चारित्ररसायनान्यपि ।
सहे प्रमादादिगदैः कदर्थनां
श्रयामि तत्कं शरणं हतोऽस्मि ही ? ॥ (वंशस्थ) २६

दुर्ध्यानतो मे विरमेन्न चित्तं
बिभेमि पापान्नरकप्रदाच्च ।
स्वयं रिपुः स्वस्य तदित्यनन्य-
गतिस्तवाग्रे विलपामि नाथ ! ॥ २७

कृपाऽऽस्पदं मां तदुपेक्षसे किं
न हंसि मेऽद्यापि दुरापदं यत् ।
कृपा न किं त्वां त्वरयत्यधीशा-
भ्यासीर्हृदो मे किमुताऽकृपत्वम् ? ॥ २८

भवद्विषः पासि सुराऽसुरानपि
प्रभुस्ततस्त्वां शरणं श्रयन्ति ते ।
दीनं श्रितं पासि न मां नु तत्त्वम-
प्यवेक्ष्य वक्त्रं तिलकं करोषि किम् ? ॥ २९

अकारि किं देव ! मया कुकर्म्म
ममेदृशी धिग् यदनर्हताऽभूत् ? ।

जगत्त्रयेशोऽपि न पासि यन्मां
शोचामि हा ! हा ! हतकः स्वमेव ॥ ३०

यद्यप्यद्रष्टव्यमुखोऽस्मि पाप्मभिः
प्रसीद हे नाथ ! तथापि मय्यपि ।
स्वदर्शनं देहि विधेहि मेऽर्हतां
यतो भवेत्साऽपि तव प्रसादतः ॥ ३१

प्रार्थये शिवममुष्य कारणं
संयमस्तु विषमस्त्वयोदितः ।
न प्रमादरिपवस्त्यजन्ति मां
किं करोमि भवभीभृतस्ततः ? ॥ (रथोद्धता) ३२

सचेतनाऽचेतनवस्तुजाते-
ष्ववाप्तसाम्यास्तकषायपङ्कम् ।
मनः सदा मे गतदुर्विकल्पं
भूयात्प्रभो ! त्वद्गुणवार्द्धिमग्नम् ॥ ३३

जगज्जनानन्दि हितोपकारा-
नवद्यहृद्यायतिकृत्प्रवृत्ति ।
भवद्गुणस्तोमकथैकवृत्ति
वचोऽस्तु मे नाथ ! शिवानुवृत्ति ॥ (उपेन्द्रवज्रा) ३४

विश्वाङ्गिपीडापरिवर्ज्जनाप्त-
प्रमादमुक् संयमयोगशुद्धिः ।
तव प्रसादान्मम सिद्ध्युपायस्-
त्वदानतिव्यापृतिरस्तु कायः ॥ ३५

त्रातुस्ते निजदुःखसन्ततिमिति स्तोत्राज्जिनेन्द्राऽवदं
शक्रालीमुनिसुन्दरस्तवपदत्रैलोक्यरक्षाप्रभोः ।
कारुण्यामृतवारिधे ! यदि कृपापात्रे कृपां गाहसे
तद्दुःखप्रतिकारमाशु कुरु मां सर्वैः सुखैर्योजयन् ॥ ३६
(शा.वि.)

पू.आ.श्री मुनिसुन्दरसूरिविरचितम्

## २०. ॥ श्रीसकलजिनस्तवनम् ॥

(वैतालीयम्)

त्रिजगत्प्रभुताप्रतिष्ठितं, सकलान्तर्द्विषतां जयश्रिया ।
भुवनोपकृतिक्षमं स्फुरत्सदनन्तातिशयं जिनं स्तुवे ॥ १

सततं विषयानुचिन्तना-चितदुष्कर्ममलाऽऽविलं मनः ।
मम नाथ ! तव स्तवामृत-ह्रदमग्नं विशदीभवत्वदः ॥ २

तपसा विविधेन योगतः परमाच्चापि यदर्थ्यते बुधैः ।
तदनन्तचतुष्टयात्मकं परमं ब्रह्म तव स्तुतेर्वशम् ॥ ३

मदनाद्यरिशल्यनिर्गमे, त्वदयस्कान्तनिभानुचिन्तनात् ।
अचिरान्मम विन्दतां सुखा-द्वयमात्मा तव शर्मवर्णिकाम् ॥ ४

शरणं भुवनार्थितप्रदः, परमैश्वर्यमयस्त्वमेव मे ।
कलुषोऽस्मि यदीश ! दुष्कृतै-
स्तदपि प्रापय मां निजां श्रियम् ॥ ५

पू.आ.श्री जयशेखरसूरिविरचिता

# २१. ॥ श्रीवीतराग-स्तुतिः ॥

(यमकबन्धबन्धुरा)

(रथोद्धता)

भूरिभक्तिवशतः कृतोद्यमो मुक्तितः परमहं नये नवम् ।
वीतरागमिह मन्दमेधसा मुक्तितः परमहं नये नवम् ॥ १

तावकं क्रमयुगं प्रियं क्षमा-शालिनाममरमानवानतम् ।
यो भजत्यनुभजेत् पूरिता-शालिनाममरमानवानतम् ॥ २

यस्त्वयि प्रणयिवान् कृपावनी नीरसम्भवपरम्पराभवम् ।
स क्वचिन्न लभते महामना नीरसम्भवपरम्पराभवम् ॥ ३

जन्तुरेष भगवन् ! मदद्रुमानेकपापभवसाध्वसङ्गतः ।
चित्तदौष्ट्यजनितेन कर्मणा-नेकपापभवसाध्वसङ्गतः ॥ ४

मन्मथेन दधिरे न धीरता मन्दरागभवतारणेहयाः ।
मोचि(षि)तस्तदपि तद्वशो जनो मन्दरागभवतारणेहयाः ॥ ५

प्रागहं न रुचिमन्यदैवते कामनावृतमहोदयोदधौ ।
सत्यपि त्वयि कुवासनोल्लसत्-कामना वृतमहोदयोदधौ ॥ ६

त्वं ययाथ तपसे जितस्मरा मानसेन सहसाधिकन्दरम् ।
इन्द्रियावलिरपाव तत्क्षणं मानसेन सहसाधिकन्दरम् ॥ ७

तुच्छतूलतुलया त्यजत् तदा नङ्गना महति धीरिमालये ।
शत्रुतामुपगताः प्रभौ भवा नङ्गना महति धीरिमालये ॥ ८

वाग्भवापदुदधौ लसत्कृपा नो रमा न रमणीयतापदम् ।
शासनस्य तव राति निर्वृतिं नो रमा न रमणीयतापदम् ॥ ९

बालिशोऽपि वचसा तवाखिलं वेदनाविषमहानिवारिणा ।
शान्तिमेति सकलानि किं न तृड् वेदनाविषमहानिवारिणा ॥१०

किं नरातिसुखमिद्धबुद्धिना ध्वान्तदारुणविभातवेलया ।
अञ्चितेशचरणद्वयीभवा ध्वान्तदारुणविभातवेलया ॥ ११

कोपिना मदनदीनवाडव व्यग्रवृत्तिमनसां विशां गणे ।
कोपिना मदनदीनवाडव-स्त्वन्मतं शुभधियावलम्बते ॥ १२

अक्षमो हतरसः कुशासने सिंहविष्टरमपास्य रज्यति ।
अक्षमो हतरसः कुशासने धीस्तथावगणितत्वदागमः ॥ १३

केवलं समरसम्पदे परेणोत्कटेन कुधियो न धित्सवः ।
केवलं समरसम्पदे परे कामुका भवदुपासकाः पुनः ॥ १४

दर्प कान्तकमनामयाविना दर्प्प कान्तकमनामयाविना ।
भावनाभरमवेक्षितो भवान्नाद्य यावदहमस्मि तत्पटुः ॥ १५

दूषणैरनणुभिर्ददन् मनो जये(जाय) मानमथमेदुरोदरे ।
जये(जाय) मानमथमेदुरोदरे रादिकं व्यसनजालमङ्गिनि ॥१६

निर्मलं नभ इवासिधारया नह्यनीयत मनस्तव क्षितिम् ।
काञ्चनाभवपुषाभिरामया काञ्चनाभवपुषाभिरामया ॥ १७

मानवादि भवतोयतीरतः प्राभवाद् भ्रसदिति स्फुरन्मतिः ।
तस्य सिद्धिपदमाविशः परं मानवादिभवतोयतीरतः ॥ १८

मारतः शमयते भवानलं मारतः शमयते भवानलम् ।
गौरचित्त न यदस्य सा श्रुता गौरचित्तनयदस्य सा श्रुता ॥ १९

भावनाभवनमत्तवारणे भावनाभवनमत्तवारणे ।
भावना भवनमत्तवारणे शासने सुहितमस्तु मन्मनः ॥ २०

स त्वमिष्टनरकान्तकारणं दूरमुक्तकुशलावधीरितम् ।
वीरमानियति यो घरङ्गतः काममुग्रतमधामलालसः ॥ २१

महायमकः-
हेलितापितरसारसादरं हेलितापितरसारसादरम् ।
हेलितापितरसारसादरं हेलितापितरसारसादरम् ॥ २२

तत्प्ररूढभववासनाशया स्पष्टदृष्टभववासनाशया ।
शं भजेम तव शासनाशया यातुमेय तव शासनाशया(त्) ॥२३

नानानिबद्धयमका यमकातराणां
नृणां प्रदत्तजयसे जयशेखरेण ।
एषा स्तुतिः शिवगते वगते त्वयीशे
दृष्ट्वा श्रियं घनमतां नमतां तनोतु ॥ (वसन्ततिलका) २४

पू.आ. श्री जयशेखरसूरिविरचिता ।

# २२. ॥ श्रीवीतरागस्य क्रियागुप्तस्तुतिः ॥

(उपजाति)

सर्वेषु सत्त्वेषु विशेषबुद्ध्या कृपामय ! त्वं ध्रुवमादधान ! ।
श्रीवीतरागप्रभुतामवाप्त-स्तुत्यान्तरेषु स्तुतिगोचरं मे ॥ १

शमोदधे ! मे सततं सुखौघं सेवा रसस्मेरहृदस्त्वदीया ।
यस्याग्रतो मानवदेवभोगा रोगा इवोद्वेगकरा नराणाम् ॥ २

असद्विरामा नवमासमाद्य त्वद्ध्यानमाद्यत्प्रमदाश्रुमाला ।
संसारसंरम्भमदम्भरम्भा-स्तम्भं कृपाणीव निबद्धधारा ॥ ३

समाधियोगाज्जगदेकवैरि-रागादिदौष्ट्यानि भवान् विभिन्दन्।
स्त्रैणे तृणे वा भवने वने वा, मित्रे रिपौ वा दलितार्त्तिजालः ॥४

विज्ञाय तत्त्वं विरचय्य चेतः-स्वास्थ्यं तदीयागमरङ्गभाजाम् ।
महातरुस्कन्धमिवाप्य शीता-तपौ तपः सागररागरोषौ ॥ ५

ध्यानानलेन ज्वलता त्वदीया-गमानिलेनाऽस्तरजोबलेन ।
दुष्कर्मकाष्ठावलिरप्रमादि-जनस्य मोक्षाध्वनि भारभूता ॥ ६

त्वामादितो दारपरिग्रहाय पराङ्मुखं शान्तिमुखं वहन्तम् ।
मुक्तेः कृतेस्ते हृदि दक्ष एव जडो हि शून्यः सदसद्विचारे ॥७

अनादिकालादतृणस्थलाभ-संसारवारप्रभवामवार्याम् ।
तृष्णां तडित्वानिव देहभाजां पुण्योपदेशामृतवृष्टिसृष्ट्या ॥ ८

सुखं सपत्न्यामिव राजलक्ष्म्यां सुदूरितायां भवता व्रतश्रीः ।
धर्माधिकारे दधता धुरीण-भावं जगन्नाथ ! जगद्धिताय ॥ ९

प्रभो ! भवानेव भवान्तहेतु-ररोषणः सन्न्यसितास्त्रशस्त्रः ।
मनोवचःकायजकर्मशत्रून् स सत्त्वतत्त्वाचरणैकधीरः ॥ १०

(उपेन्द्रवज्रा)

जये जिना जेयविपक्षराजे राजेरभावान्न विनापि नावम् ।
संसारवार्द्धेस्तरणे रयेण न क्वापि मोघा महतां हि शक्तिः ॥११

विभो ! तथा मुक्तिभवादिभावा-
नन्तःसभं केवलबोधितस्त्वम् ।
यथागमस्फातिद तेऽनुशोच्या
ज्ञानं विना स्वेष्वनुशासका ये ॥ १२

वित्तान्नयात्तादिव नैःस्व्यमच्छा-
ज्जलात् सुपीतादिव तर्षमाप्तात् ।
भूपादिवारेर्भयमर्त्तिजातं जातस्त्वदुक्तिश्रवणात्प्रमोदः ॥ १३

संवर्द्धिताकर्म घनाघनौघा-त्त्ययेन सद्दृ(वृ)ष्टिविदोर्द्युतिस्ते ।
तापप्रणाश सुपथप्रकाशं यथा विभा रात्रिदिनाधिभर्त्रोः ॥ १४

सम्प्रीणितानेकनरामरान्ते पादद्वयीं सादरमीक्षमाणः ।
जलाञ्जलिं भूरिभवभ्रमीणां प्रमोदपूरोल्लसिताश्रुदम्भात् ॥ १५

आशीर्वचांसि स्वमनःप्रसत्त्या दिशामधीशेष्वपि तेषु देव ! ।
यैश्चित्तरङ्गाद्विजितान्तरङ्गारातेऽलिभावे(वो) सव तेंऽह्रिपद्मे ॥१६

अनिष्ठुरा शिष्टजनस्य कष्टा-रिष्टच्छिदे स्पष्टबला वरिष्ठा ।
वाणी तवेश ! त्रिपदीव विष्णो-
रचिन्त्यशक्तिः सहसा त्रिलोकीम् ॥ १७

साधूनां कलिकालकेलिबलतो गूढाः क्रिया जज्ञिरे,
तद्विज्ञापयितुं जगत्त्रयपते ! लोकत्रयीबान्धव ! ।
सूरिश्रीजयशेखरेण रचिता गूढा क्रिया ते स्तुतिः
स्पष्टीकर्त्तुमिमां नहि त्वदपरः श्रीवीतरागः क्षमः ॥(शा.वि.)१८

पू.आ.श्री जिनप्रभसूरिविरचितम्

क्वचिद् द्वयादि-अक्षरावृत्तिरूप-यमकालङ्कारयुक्तम्

## २३. ॥ श्रीवीतरागस्तवनम् ॥

(उपजाति)

जयन्ति पादा जिननायकस्य दोषापहा ध्वस्ततमोविकाराः ।
रवेरिवाश्चर्यमतापकाश्च न कौशिकक्लेशकराः खराश्च ॥ १

वाग्ज्ञानपूजानिरपायरूपाश्चत्वार एतेऽतिशयास्तवैव ।
देवाधिदेवत्वमभिष्टुवन्तश्चतुष्कषायक्षतये तु नाथ ! ॥ २

शुद्धप्रयोगस्तवसंस्तवेन कृतार्थतामेति कृती कृतीश ! ।
न वाच्यतां याति कदापि लोके
यथा यथार्थस्तव काव्यकर्ता ॥ ३

त्वमेव चेच्चेतसि जागरूको जन्तोरसि श्रीजिनराजमल्लः ।
भवेन्न किं सस्त्रिजगन्महल्लः प्रपात्यते किं नहि मोहमल्लः ॥ ४

त्वमेव देवस्त्रिविधेन येषां जगत्त्रयीवन्द्यपदो हि पादैः ।
धात्री पवित्रीक्रियते किमत्र चित्रं तदीयैस्त्रिजगत्पवित्रैः ॥ ५

उपाधियोगान्महतो लघुत्वं लघोरपि प्राज्यगुरुत्वमेव ।
आदर्शके देव यथा द्विपस्य प्रदीपदीप्तौ तु तनूभृतःस्यात् ॥६

कश्चिद्‌गुणानां हि लवोपि लोके
यो दृश्यते सोपि विभोः प्रभावः ।
अद्वैतकल्याणनिधेर्जिनेन्द्र ! पयो विना पल्लविता न वृक्षः ॥७

नातः परं देव ! जडत्वमन्तः प्रत्यक्षलक्षोपि भवान्नबुद्धः ।
सर्वज्ञताप्यस्ति विभो ! न चान्या त्वमेव देवो विदितो यदीह॥८

विदन्ति सर्वेप्यपरानधीशान्‌ नतान्नतास्ते प्रवदन्ति सर्वान्‌ ।
जगज्जगन्नाथ ! यथास्थितं हि
त्वं वेत्सि हि त्वान्तु न वेत्ति चित्रम्‌ ॥ ९

बहिःस्थितं वेत्ति परस्वरूपं न स्वस्थितं देव ! तव स्वरूपम्‌ ।
चक्षुर्यथा पश्यति बाह्यरूपं न चात्मरूपं तु कदापि लोके ॥१०

सदात्मविज्ञानविहीनधीभिर्न ज्ञायते नाथ ! विभोः स्वरूपम्‌ ।
स्वशीर्षपश्चात्प्रविभागसम्यङ्‌निरीक्षणे कोपि न बाह्यहेतुः ॥११

मध्यस्थभावोपि जिन ! त्वयीह गुणक्षतेः स्याद्‌ गुणिनो नितान्तम्‌।
यथाऽगुणप्रत्यय एष धातोः कर्मण्यथो कोऽत्र विचारहेतुः ॥१२

त्वद्‌भक्तिभावोप्ययथार्थ एव भवत्प्रणीतार्थ-विपर्ययेण ।
विधीयते सर्वहितोपसर्गवर्गेण धात्वर्थ इवान्यथा हि ॥ १३

दोदूयते यः स्वयमेव रागद्वेषादिलुण्टाकभटैर्यथेष्टम्‌ ।
संस्तूयते सोपि हि देवबुध्या हहा महामोहविजृम्भितं तत्‌ ॥१४

अचिन्त्यमाहात्म्यनिधिं प्रसन्नं जगच्छरण्यं जगतोपि पूज्यम्‌ ।
त्वमेव देव ! प्रविवेत्सि हि त्वां
प्रकाशतेऽन्येन किमु प्रदीपः ॥ (उपेन्द्रवज्रा) १५

किमस्ति नास्तीति विवेकपक्षा रागादिपक्षक्षतिलब्धदक्षाः ।
ये श्रीजगन्नाथ जिनप्रभस्ते त्वामेव देवं जिनमाश्रयन्ति ॥ १६
(उपजाति)

पू.आ.श्री जिनप्रभसूरिविरचितम्

## २४. ॥ मङ्गलाष्टकम् ॥

(अनुष्टुप्)

जितभावद्विषां सर्वविदां तत्त्वार्थदर्शिनाम् ।
त्रैलोक्यमहितांह्रीणामर्हतामस्तु मङ्गलम् ॥ १

कृत्स्नकर्मक्षयावाप्तमुक्तिसाम्राज्यसम्पदाम् ।
गुणाष्टकैश्वर्ययुषां सिद्धानामस्तु मङ्गलम् ॥ २

पञ्चाचारसमृद्धानां सुतजीवातुवेदिनाम् ।
भवच्छिदामाचार्याणां श्रीमतामस्तु मङ्गलम् ॥ ३

वाचकानां जिनवचः-पीयूषरसतृष्णजः ।
भव्यान् सूक्तिसुधावर्षैः प्रीणतामस्तु मङ्गलम् ॥ ४

साधूनां सिद्धिसम्बन्धी-लीलालालसचेतसाम् ।
सम्यग्ज्ञानक्रियाबद्धो-द्यमानामस्तु मङ्गलम् ॥ ५

जिनागमगजेन्द्रस्य स्याद्वादकरशालिनः ।
रहस्योत्सर्गदन्ताभ्यां शोभितस्यास्तु मङ्गलम् ॥ ६

कुतीर्थिमत्तेभहरेः पूजितस्यार्हतामपि ।
चतुर्विधस्यानघस्य श्रीसङ्घस्यास्तु मङ्गलम् ॥ ७

मङ्गलस्तोत्रमङ्गल्य-प्रदीपस्यास्य दानतः ।
येऽर्चयन्ति जिनान् भक्त्या ते स्युः प्राप्तजिनप्रभाः ॥ ८

पू.आ.श्री जिनप्रभसूरिविरचिता

## २५. ॥ श्रीजिनस्तुतिः ॥

(अनाऽऽद्यम्)

................................ रञ्जयति प्रतीतम् ।
तीर्थं जनं यन्मुनिसुव्रतस्य विहारसारं जयति प्रतीतम् ॥ ३५

यस्ते नमः पार्श्व ! तनोति नेत-
रलङ्कृतस्तम्भनकाऽऽय तस्य ।
नन्ता न कः कामद ! विघ्नराशे-
रलङ्कृतस्तम्भनकाऽऽयतस्य ॥ (उपजाति) ३६

येनैकदापि प्रणतोऽसि पार्श्व ! यशोभया शङ्ख ! पुरा वताऽऽर ।
तस्य क्षयं विघ्नततिर्वृतस्या-ऽयशोभया शङ्खपुरावतार ॥ ३७
(उपजाति)

जन्मक्षणे निर्मितमज्जनोच्चैः सुपर्वभिः स्वर्णगिरौ सदास्यम् ।
श्रीपार्श्वनाथं नुत क्लृप्तपूजं
सुपर्वभिः स्वर्णगिरौ सदाऽऽस्यम् ॥ (उपजाति) ३८

श्रीपार्श्व ! खेदं करहेटकस्या-ऽलङ्कार ! मा धाम विहारयन्तः ।
चित्ते भवन्तं पथि च प्रभो ! ते लङ्कारमाधामविहार यन्तः ॥३९
(इन्द्रवज्रा)

सुधाञ्जनेक्ष्णोस्त्वयि यस्य जज्ञे शमीक्षिते सत्यऽपुराऽवतंसः ।
यथा शिवं वीरसमेति पापे शमी क्षितेसत्यपुराव तं सः ॥४०
(उपेन्द्रवज्रा)

तिस्रश्चतुर्विंशतिका जिनानां सद्भाविभूता वितमादरेण ।
मुक्तः क्रियासुर्जनमाशु नम्रं सद्भा विभूतावितमादरेण ॥ ४१
(इन्द्रवज्रा)

यस्य स्तवे ते जगतां प्रबोधे सुधीर ! सीमन्धर ! धी रराज ।
विदेह भूत्तंस शमश्नुतेऽसौ सुधीरऽसीमं धरधीरराज ! ॥ ४२
(उपजाति)

कुर्वे स्फुरत्केवलभास्वराय युगन्धरायाऽस्ततमा नमोहम् ।
प्रवासयामास यदंह्रिपद्म-युगं धरायास्ततमानमोहम् ॥ ४३
(उपजाति)

भवापदाऽऽर्त्तैस्त्वयि यैर्जिनेश ! विश्वप्रभावर्यतया विनेमे ।
शिवश्रियं बिभ्रति बाहुनाथ !
विश्वप्रभावर्य ! तया विनेमे ॥ (उपजाति) ४४

सुबाहुनाथ ! त्वमवाऽन्तरारि-समाक्रमाविष्ट ! समस्तकामौ ।
यस्याऽनिशं पूजयति त्रिलोकी
समाक्रमाविष्टसमस्तकामौ ॥ (उपजाति) ४५

जिनौघ ! या स्तौति भवद्विहारं वैदेहकैरावतभारतीयम् ।
धन्या तमःशाखिनि मुक्तिमार्ग-वैदेहकैरावत ! भारतीयम् ॥४६
(उपजाति)

वन्दे शतं सप्ततियुग् जिनानां कर्मावनीपावनमज्जनानाम् ।
उत्कृष्टकाले प्रकृतोरुपूजा-
कर्माऽऽवनीपाऽवनमज्जनानाम् ॥ (इन्द्रवज्रा) ४७

प्रसीद देवर्षभ ! वारिषेण ! क्षणेनचन्द्रानन ! वर्द्धमान ! ।
नन्दीश्वरक्षोणिवतंस ! दिव्य-
क्षणेन ! चन्द्रानन ! वर्द्धमान ! ॥ (उपजाति) ४८

स्मरन्ति ये श्रीजिनराजवृत्तं परं पराभूतसमाधयस्ते ।
स्वर्गाऽपवर्गश्रियमाश्रयन्ते परम्पराभूतसमाधयस्ते ॥(उ.जा.)४९

संसाध्य सद्ध्यानलयेन सिद्धाः श्रीपुण्डरीकप्रमुखाः सुखानि ।
ये ते नतानां ददतामलेप-श्रीपुण्डरीकप्रमुखाः सुखानि ॥ ५०
(इन्द्रवज्रा)

चतुर्मुख ! प्रेक्ष्य तवेश ! लक्ष्मी-
मशोकभाजामपि चामराणाम् ।
चित्रीयते नाम न को नताना-
मशोकभाजामपि चाऽमराणाम् ॥ (उपजाति) ५१

दृष्टा जिनानामिह देशनाक्षणे भवं तुदन्तां शुभराऽवभासिता ।
शिवश्रियेऽमुत्र पुनर्मुखेन्दवो
भवन्तु दन्तांऽशुभराऽवभासिता ॥ (उपजाति) ५२

श्रीसार्वसम्भव ! तव स्तवनात्तमोत्ते-
हंसप्रकाशपरमागमपङ्कजस्य ।
प्रोल्लासिवासर ! भवामि भवस्य भेत्ता !
ऽहं सप्रकाश ! परमाऽऽगम ! पङ्कजस्य ॥ (वस. ति.) ५३

मयि जिनपरिचर्या चारुचर्याविधेयात्
परमतमतनुश्रीः शारदा ! भावितन्द्रम् ।
सितरुचिमपि यस्या पर्वगर्वं विजिग्ये
परमतमतनुश्रीः शारदाऽऽभावितन्द्रम् ॥ (मालिनी) ५४

अनुगामितां तमभिनेतरऽमा रमाभिः
सकलाभिराऽऽमरमणी जनयत्यधीनः ।
तव यद्भवो भवति शान्तिविभो ! विमुक्त-
सकलाभिरामरमणीजनयत्यधीन ! ॥ ५५

विना यामन्यत्र क्वचिदपि नतो तत्त्वलक्ष्म्या
घनाऽऽलीका लाभाः कुमतकमलाभोगदाने ।
चिरं जीयात्कल्पव्रततिरिव सा द्वादशाङ्गी
घनाऽऽलीकालाभाः कुमतकमलाभोगदाने ॥ ५६

नता ये वाग्देवि ! त्वयि कवयितुं मञ्जु सुतरा-
मलं सद्वृत्तं ते विपदमवदाताङ्गि ! कुमते ! ।
कृतं क्षोभं तेषां क्षपयति च पूर्णेन्दुकमलाऽ-
मलं सद्वृत्तं ते विपदमवदाताङ्गिकुमते ॥ (शिखरिणी) ५७

यद्देहप्रभवासु भासु लुलुपे त्रैलोक्यदृग्विश्रम-
च्छायाभासु रविग्रहेण सुमनोधर्मद्विषां शासनम् ।
तेषां ये प्रणमन्ति शासनसुरा भान्तः प्रकुर्वन्तु ते
छायाभासुरविग्रहेण सुमनोधर्मद्विषां शासनम् ॥ (शा.वि.) ५८

मिथ्यादृग्गर्वसर्वङ्कषविविधजिनाऽर्चादि वर्द्धिष्णुपुण्ये
श्रीसङ्घे चैत्यकृत्ये सकलसुमनसः सदृशः शान्तयेमे ।
ओजोवृत्त्या प्रयत्नप्रगुणितविनया जैनयक्षाम्बिकाद्याः
श्रीसङ्घे चैत्यकृत्ये सकलसुमनसः सदृशः शान्तये मे ॥ ५९

(स्रग्धरा)

पू.आ.श्री सोमतिलकसूरिविरचितम्

## २६. ॥ श्रीसर्वज्ञस्तोत्रम् ॥

(अनुष्टुप्)

शुभभावानतः स्तौमि सर्वज्ञ ! त्वां तमन्वहम् ।
यो जिगाय भवान् मोहं सदानवसुराऽजितम् ॥ १

कस्य न स्यान्महानन्दः प्रभो ! त्वां वीक्ष्य विस्मयात् ।
अङ्घ्रिन्यासेन पद्मेषु सदा नवसु राजितम् ! ॥ २

भवन्तं नौति यो भूरिभक्त्या तं नौति नित्यशः ।
विश्वमर्थितया नाथ ! सदानवसुराजितम् ॥ ३

नाथ ! जन्ममहे विश्वसुखे त्वां वीक्ष्य मन्दरे ।
केनाऽऽमोदि खगेन द्युसदा न वसुराजि तम् ॥ ४

मया कल्मषमक्षालि पुण्यं चाऽगण्यमर्जितम् ।
त्वां प्रतीक्ष्य ! निरीक्ष्याऽऽद्य सदाऽऽनवसुराजितम् ॥ ५

अद्य देव ! जगज्जैत्रं भाववैरिबलं मया ।
भवत्यालोकिते श्रेयोऽसदानवसुरा जितम् ॥ ६

न के जिन ! निगृह्णन्ति कामाख्यं विश्वमोहिनम् ? ।
त्वय्याश्रिते शुभोदर्क सदाऽऽनव ! सुराजि तम् ॥ ७

मदं वर्द्धयते तत्त्वमूढताऽऽशु तथाऽङ्गिनाम् ।
यथा पीतेश ! चैतन्यासदा नवसुराजितम् ॥ ८

कचटतपनतेजः पञ्चमुष्ट्युद्धृतौद्यत्
कच टतपसमानः प्रौढपापौघपङ्के ।

कचटतपकरस्त्वं देव रागादिदस्यून्
कचटतपसुरेन्द्रैर्वन्द्यपादारविन्दः ॥ ९

एवं श्रीजिनपुङ्गवं शमरमारम्यं विशालच्छविं
राकासोमसमास्यमुत्तमगुणं सन्नम्रनाकप्रभुम् ।
सिंहं मन्मथमत्तदन्तिमथने श्रेयःसरस्सुरविं
यः स्तौति प्रयतोऽश्नुते स मतिमानत्यन्तहारिश्रियम् ॥ १०
(शा.वि.)

पू.आ.श्री जिनसुन्दरसूरिविरचितम्

## २७. ॥ साधारणजिनस्तवनम् ॥

(उपजाति)

सर्वज्ञ ! सर्वामरराजपूजितं
त्रिलोकनेत्राम्बुरुहेष्वहर्पतिम् ।
अगम्यपुण्योदयहेतुदर्शनं
त्वां स्तौमि भक्त्याऽस्तकुवादिदर्शनम् ॥ १

जगत्त्रयीवर्त्ति..........हृच्चतु-
स्त्रिंशद्विशिष्टातिशयैरलङ्कृता ।
मूर्त्तिर्विशां भाविसमृद्धिशंसिनी
पुण्यस्पृशां याति तवेश ! दृक्पथम् ॥ २

भवत्क्रमालोकनकर्मकार्मण-
प्रयोगतो यः सुभगत्वमश्नुते ।
तमुज्ज्वलाऽऽलिङ्गति मङ्गलावलिः
पदं विदध्युर्विविधाश्च सम्पदः ॥ (वंशस्थ) ३

जगन्मनोवृन्दविनोदमेदिनी-
स्वभावकर्मक्षयदेवसम्भवाम् ।
त्वत्प्रातिहार्यातिशयश्रियं परां
समीक्ष्य साक्षाज्जिन ! को न मोदते ? ॥ ४

यं दातुमीशाः सुरमेदिनीरुहो
न कामकुम्भा नु न कामधेनवः ।
तस्योपलम्भे प्रतिभूर्भवन् भवान्
शुभोदयस्यास्ति विभो ! तदुत्तमः ॥ ५

जिन ! त्वदालोकनवन्दनोद्भवं
सुखं महत् स्वर्गसमृद्धिभोगतः ।
मन्ये यतोऽमी तदतुच्छवाञ्छया
सुधाभुजोऽपि त्वदुपान्तमे(ए)य्रति ॥ ६

निरत्यया सा सुकृतस्य संहति-
र्जगत्पते ! स्फातिमियर्त्तु मेऽन्वहम् ।
प्रभुर्ययाऽनन्तगुणात्मवान् भवान्
विश्वैकबन्धुर्भगवन्नवाप्यते ॥ ७

इति स्तुतस्तीर्थपते ! प्रमोदतः
प्रसीद सद्यो जगदेकवत्सल ! ।
तथा यथा मे सकलर्द्धिसिद्धिदा
भवत्पदाम्भोरुहभृङ्गता भवेत् ॥ (वंशस्थ) ८

पू.आ.श्री जिनसुन्दरसूरिविरचितम्

## २८. ॥ श्रीसर्वसाधारणजिनस्तवनम् ॥

(उपजाति)

जयश्रियां हेतुरमर्त्यपूजित !
प्रज्ञातविज्ञेय ! वरेण्य ! वाङ्मय ! ।
जगद्गुरुर्गेयगुणौघगौरवः
सर्वज्ञ ! सर्वज्ञनमस्कृतक्रम ! ॥ १

विघ्नाग्निमेघ ! त्वममोघसंयमः
कृतार्थशक्तिः प्रकृतद्विषत्क्षयः ।
निस्सीमसाम्यः श्रितशीलसङ्गति-
र्लोकम्पृणस्तीर्णतमोमहार्णवः ॥ २

चैत्यद्रु-दिव्यध्वनि-देवदुन्दुभि-
च्छत्रत्रयी-चामर-पुष्पवर्षणैः ।
भामण्डलस्वर्णमयाऽऽसनान्वितैः
श्रीप्रातिहार्यैर्जय राजितो जिनः ॥ (इन्द्रवज्रा) ३

अनावृतज्ञानविशालदर्शनः
प्रकीर्णपुण्यश्रयणीयशासनः ।
धामन् ! महिम्नां महतां त्वमर्हतो
दृशा स्वया मां कुरु मुक्तकल्मषम् ॥ ४

अनुत्तरज्ञानधरस्तमोभर-
प्रभाकरः क्लेशहरः शिवङ्करः ।
सुखाकरः प्रौढतरः श्रितामरः
क्षिप्तस्मरः सिद्धिवरः श्रियम्भरः ॥ ५

परार्थवृत्तिः पृथुतत्त्वपद्धतिः,
कृतेष्टपूर्त्तिः प्रथिताङ्गिसन्मतिः ।
सर्वज्ञ ! सर्वाभ्युदयैकहेतुना
स्वभक्तिदानेन सदा प्रसीद मे ॥ ६

पू.आ.श्री जिनसुन्दरसूरिविरचितम्

## २९. ॥ श्रीसर्वजिनस्तवनम् ॥

(उपजाति)

श्रेयांसि विश्राणयितारमश्रमं
स्वामिन् ! श्रितानां श्रयणीयशासन ! ।
स्तुवन् भवन्तं भववैरिभञ्जनं
कुर्वे कृतार्थां स्वगिरं निरञ्जनम् ॥ १

विघ्नैः समं सङ्गमघस्य निघ्नतः
स्वदर्शनादेव नृदेवदुर्लभाः ।
सम्पादयन्नापदपेतसम्पद-
स्त्वमेकमित्रं जगतोऽपि वर्त्तसे ॥ २

मनीषिणः शैवसुखाभिलाषिणो
भवन्तमेकं तदुपायमाश्रिताः ।
नेतर्यतो हेतुपथप्रवर्त्तने
फलस्य सिद्धिः सुलभेव भाविनाम् ॥ ३

सुनोषि सौख्यं विकृणोषि कल्मषं
करोषि लक्ष्मीं वितनोषि सन्मतिम् ।
धुनोषि दोषांश्च मिनोषि विप्रियं
प्रभोऽङ्गिनां लोचनगोचरं गतः ॥ (वंशस्थ) ४

स्वामीयति श्रेयसि शासकीयति
स्थामीयति स्वीयति सेवधीयति ।
गुरूयति स्वर्गितरूयति स्वरू-
पति द्विषामीश ! भवन्ति मार्यधीः ॥ ५

इति स्तुतेस्त्वं पथि संस्थितः कृतः
प्रसीद सीदत्तमसेवकस्वके ।
सद्बुद्धिबोधिस्वपदाब्जभृङ्गता-
मदोषतां चानु...मय्यभीष्टव ॥ ६

पू.आ.श्री सोमप्रभसूरिविरचितम्

## ३०. ॥ श्रीसाधारणस्तोत्रम् ॥

(वसन्ततिलका)

श्रीवीतराग ! विगतस्मर ! कोपमानं
ये त्वां समग्रजगतां जनकोपमानम् ।
सूर्योदये नयनगोचरमानयन्ति
ते दुर्गतिं स्फुरदघोपरमा न यन्ति ॥ १

पश्यन्ति शीतरुचिमण्डलसोदरं ये
वक्त्रं प्रगे तव जिनेन्द्र ! विनिद्रनेत्राः ।
तेषामशेषभुवनाधिपतित्वभाजां
लोकाः क्रमाब्जमवलोकितुमुत्सहन्ते ॥ २

यः प्रातरेव नमतां भवदङ्घ्रियुग्मं
सञ्जायते क्षितिरजस्तिलको ललाटे ।
पुसां स एव सपदि त्रिदिवापवर्ग-
लक्ष्मीवशीकरणकौशलमाबिभर्ति ॥ ३

आसादयत्युदयमम्बुजबन्धुबिम्बे
सर्वज्ञ ! ये परिहृतापरशेषकृत्याः ।
आलोकयन्ति विकसन्नयनास्तदास्यं
दास्यं सुरासुरनराः प्रथयन्ति तेषाम् ॥ ४

यस्तावकं विकचपङ्करुहाभिराम-
मालोकते वदनमीश ! निशाविरामे ।
आलोकते स्वसमवाप्तसमीहितार्थः
कस्याप्यसौ न मुखमर्थितयाऽपरस्य ॥ ५

यः पादपद्ममुदयाचलचुम्बिबिम्बे
चण्डद्युतौ जिन ! नमस्यति तावकीनम् ।
तस्यास्तिकं भजति कामदुघा करेऽस्य
चिन्तामणिर्वसति सद्मनि कल्पवृक्षः ॥ ६

त्वत्पादपङ्कजनखांशुपयःप्रवाहे
मज्जन्ति ये त्रिभुवनैकविभो ! विभाते ।
निःशेषपातकमलोपगमोज्ज्वलास्ते
मुक्त्यङ्गनाहृदयवल्लभतां व्रजन्ति ॥ ७

सुप्तोत्थितः प्रथममेव जिन ! त्वदीय-
मुद्वीक्षते वदनदर्पणमुज्ज्वलं यः ।
तस्यान्वहं निखिलमङ्गलभाजनस्य
स्याच्चिन्तितार्थघटना सुलभा जनस्य ॥ ८

सोमप्रभाचार्यमभावयन्न पुसां तमः पङ्कमपाकरोति ।
विलोक्यमाने तदपि प्रभाते तवानने नश्यति वीतराग ! ॥ ९

(उपजाति)

पू.आ.श्री सोमप्रभसूरिविरिचितम्

## ३१. ॥ श्रीजिनस्तवनम् ॥

(द्रुतविलम्बित)

व्यधित साधितसाधुतपाः कृपां शमघनामघनाशकरीं च यः ।
तमविराममविराद्धमनोभवं जिनममानममानगुणं स्तुवे ॥ १

विभवदं भवदङ्घ्रिसरोरुहं नमति यो मतियोगपरः प्रभो ! ।
स हतमोहतमो गतमत्सरः समतया मतया परिरभ्यते ॥ २

जिन ! तवाऽऽनतवासवसंहते ! भुवनपावन ! पादपयोरुहे ।
कलितयालितया समवाप्यते शमधुरा मधुरा मधुवज्जनैः ॥३

शुभवतो भवतो वचसि श्रुते शमदमे मदमेघसमीरणे ।
अवमतां वमतां भविनां विभो !
परमते रमते न मनाग् मनः ॥ ४

दममता ममतामयभावनावनघनाघन ! नाथ ! तवागमात् ।
मम भवामभवा सपदि क्षयं विपदवाप दवानलसोदरा ॥ ५

विमलकोमलकोकनदारुणक्रमतलो मतलोभहतिर्जिनः ।
रुचितताचिततारदः सतामवमभावमभाग्यपदं हतात् ॥ ६

भवशतावशतार्तसुरासुरव्रजनतो जनतोषकरः प्रभुः ।
स्मरविकारविकाशविबन्धकः
सममना मम ना जयतादघम् ॥ ७

घनतपा नतपाकरिपुर्जिनो विधुरसिन्धुरसिंहसहोदरः ।
विषमदोषमदोत्खननक्षमः शममयो मम योगमतिं क्रियात् ॥८

शुभवचा भवचारकमोचनः समदयो मदयोधजयी जिनः ।
मदनसूदनसूचितविक्रमः प्रवरसंवरसन्ततये स्तुवे ॥ ९

सोमप्रभाचार्यमभावनाथ यदृच्छया सञ्चरते न यत्र ।
तत्रापि लब्धप्रसरं लभन्ते ज्ञानं भवन्तं भविनः स्तुवन्तः ॥१०
(उपजाति)

पू.आ.श्री सोमप्रभसूरिविरचितम्

## ३२. ॥ श्रीसाधारणजिनस्तवनम् ॥

श्रीमन् ! धर्मं श्रय मम मनः सन्मतेऽम्ब ! प्रसीद
श्रद्धे ! श्रेयोजलभरनदि ! प्रोल्लस त्वं प्रकामम् ।
रोमाङ्कूरांस्तनु तनु ! भज त्वं च मां भाव ! बन्धो !
मातस्त्वं गौः ! प्रसर च यथा संस्तुवे श्रीजिनेन्द्रम् ॥(म.क्रा.)१

त्वं नाथस्त्वां स्तुवे नाथं सनाथोऽहं त्वया नमः ।
तुभ्यं त्वन्मे शुभं ज्ञानं तवाऽनन्तगुणास्त्वयि ॥ (अनुष्टुप्) २

युवां जिनं पश्यतमक्षिणी ! हे नैर्मल्यमग्र्य्र श्रयते यथा वाम् ।
प्राप्तं फलं स्वस्ति गतं युवाभ्यां
पापं च पुण्यं युवयोश्च तेजः ॥ (उपजाति) ३

यूयं नश्यत रे कषायरिपवः ! युष्मान् जिनः प्रेक्षते
युष्माभिर्मथितं जगन्मुनिपतिः क्रुद्धोऽस्ति युष्मभ्यमाः ।
भाग्यं युष्मदपासरन्ननु बलं युष्माकमद्य क्षितं
किं युष्मासु न चेतनाऽस्ति यदियत्यद्यापि वो धृष्टता ? ॥ ४
(शा.वि.)

अहं वीरः प्राप्ताः शरणमबला मां त्रिभुवनं
मया जिग्ये मह्यं स्पृहयति मही मद् भुवि सुखम् ।
ममाग्र्यं साम्राज्यं मयि बलमलं तावदिति हि
स्मयं दध्रे यावन्न जिन ! मदनोऽव्याधि भवता ॥ ५
(शिखरिणी)

आवां याव इतो निहन्ति न जिनो नौ मित्र ! यत्र स्थिता-
वावाभ्यामभवत् स्मरस्य सखिता क्रुधश्च कामान्तकः ।
पुण्यं चाऽद्य परिच्युतं बत बलं क्षीणं न धीश्चावयोः
सञ्चिन्त्येति विभो । प्रणेशतुररं त्वद्द्वेषरागाविमौ ॥ ६
(शा.वि.)

मग्ना नाथ ! भवार्णवे वयमितस्तत् तारयास्मान् शुभै-
र्दृष्टोऽस्माभिरसि त्वमीश ! वितरास्मभ्यं मनोवाञ्छितम् ।
अस्मन्नाशय पातकं मुनिपते ! ऽस्माकं त्वमेवेशिता-
ऽस्मासु ज्ञानमुदीरय त्वदपरः को न स्मृतेर्गोचरः ? ॥ ७
(शा.वि.)

एवं पावितमां स्तुवेऽनवरतं त्वाऽहं नतत्वं प्रभो !
रक्ताऽहं त्वमपीश ! पाहि भवतो मा संस्तुत ! त्वां जवात् ।
भद्रं ते स्मृतमह्यमुद्धृतभव ! त्रैलोक्यनीलोत्पल !
श्रीसोमप्रभसूरिसंस्तुतगुण ! श्रेयःश्रियं देहि मे ॥(शा.वि.) ८

पू. आचार्यश्री देवभद्रसूरिविरचित:

## ३३. ॥ श्रीवीतरागस्तव: ॥

(अनुष्टुप्)

.................................................................... ।

... मिथ्यादृशां तेषां विनिपाता: पदे पदे ॥ १८

अस्वसंवेदनं ज्ञानं प्रत्यपद्यन्त ये प्रभो ! ।
तैरान्ध्यमोषधासाध्यं स्वयमेव विसाधितम् ॥ १९

यैरिष्टकल्पनामात्रं सन्तानोऽपारमार्थिक: ।
स्वयं स्वशिष्यसन्तान(ने) ख्यापिता तैरवस्तुता ॥ २०

एकान्तनित्योऽनित्यो वा यैरात्मं तत: प्रभो ! ।
बन्ध-मोक्षौ द्वयं नेयौ तैश्चिन्त्याऽर्थक्रियाऽपि च ॥ २१

अपौरुषेयं वचनं विरुद्धेति पदद्वयी ।
येषां वक्त्रे सदा तेषां क: प्रत्येत्यप्रियानृत: ? ॥ २२

ज्ञानं ज्ञेयप्रतिक्षेपात् शून्यं ये प्रत्यपीपदन् ।
वराका: किं कथं केन ते वदिष्यन्ति यद्वदा: ? ॥ २३

सर्वापलापी पापीयान्, नास्तिकोऽपि हि दर्शनी ।
कीर्त्यते यै: स्फुटं नाथ ! शोचनीयास्ततोऽपि ते ॥ २४

त्वय्यपि त्रातरि स्वामिन् ! शठैरेतैरयं जन: ।
परैर्विलुप्तचैतन्यसर्वस्व: क्रियते कथम् ? ॥ २५

सिद्धे रसेन्द्रे स्याद्वादे कल्याणं सिद्धमेव मे ।
नात: परमपेक्षाऽस्ति स्वामिन्नपरदर्शने ॥ २६

अहो ! मोहस्य दौरात्म्यं यदनन्तां भवाटवीम् ।
विश्वास्य भ्रमितः शश्वद् धिग् ! निष्कारणवैरिता ॥ २७

निष्कृपः काममृगयुर्मृगीमिव मृगीदृशः ।
दर्शयन् मां मृगं हन्ति त(त्) त्रायस्व कृपां कुरु ॥ २८

दुःखदावानलज्वालालक्षैर्दह्ये दयानिधे ! ।
दृशा पीयूषवर्षिण्या सिञ्च मां मास्म विस्मरः ॥ २९

अयोग्यः सन्नहं योग्यो जातः स्वामिप्रसादतः ।
प्रमाणं तत्र भगवान् स्वसंवेदनमेव वा ॥ ३०

प्रभो ! भालमिदं भूया(त्) त्वत्प्रणामकिणाङ्कितम् ।
वीतरागस्य दासोऽयमिति व्यक्तार्थसूचकम् ॥ ३१

भवेद् भवार्णवे भक्तिस्त्वयि नाथ ! तरीर्यदि ।
लीलयोत्तीर्ण एवायं तर्हि गोष्पदवन्मया ॥ ३२

भवाङ्कखलके व(ल्गा)न् मोहो योद्धा मया प्रभो ! ।
त्वद्भक्तिक्षुरिकाक्षेपैः पातितो जितकाशिना ॥ ३३

त्वद्दर्शनान्मनोभूमावानन्दाङ्कुर उद्गतः ।
हेतुर्भूयात् परीणामी महानन्दतरूच्छ्रये ॥ ३४

त्रिलोकबन्धो ! क्रोधादिवैरिभिर्भवता जितैः ।
तावकः परिभूयेऽहं यत् स कस्य पराभवः ? ॥ ३५

न वाऽहमत्र जन्मनि नाथ ! जन्मान्तरेषु वा ।
त्वां विनाऽन्यस्य कस्यापि सेवकः किङ्करोऽपि वा ॥ ३६

तव प्रसादतो मा भून्नाथ ! जन्मैव मे क्वचित् ।
अथ जन्म तदा तत्र यत्रार्हन्नेव देवता ॥ ३७

सिद्धान्तामृतकल्लोलक्षालिते योगिनां गुरो ! ।
मच्चित्तमन्दिरे योगं स्थिरत्वेन नियोगतः ॥ ३८

जानतश्च विधित्सोश्च त्वदाज्ञां मे प्रमादिनः ।
इच्छायोगवतो नाथ ! निर्वृतिश्रीर्दवीयसी ॥ ३९

कर्मसंहारकाराभ्यामतो वीर्यातिरेकतः ।
शास्त्र-सामर्थ्ययोगाभ्यां योगिनां नाथ ! योजय ॥ ४०

प्लवङ्गलीलवच्चेतःपारिप्लवमिदं मम ।
तस्य स्थैर्यकृते नाथ ! योगदण्डं प्रसादय ॥ ४१

यदर्थं मृग्यते योगो योगिभिस्तत्त्ववेदिभिः ।
तदयोगं पदं दद्याः पूर्यन्तां मे मनोरथाः ॥ ४२

त्वदाज्ञा नाथ ! मे प्राणास्त्वदाज्ञा नाथ ! मे तपः ।
त्वदाज्ञा नाथ ! (मे यो)गस्त्वदाज्ञा परमं पदम् ॥ ४३

त्वदाज्ञाशरणा[ः] सिद्धा नैके सिद्ध्यन्ति चापरे ।
सेत्स्यन्त्यनन्तास्तत् स्वामिन्नाज्ञा मौलिमणिर्मम ॥ ४४

दूरतः सम्पदस्तावदासतां याः किलापदः ।
मुक्तावपि [न] मे वाञ्छा यत्र न त्वमुपास्यसे ॥ ४५

त्वच्छासनानुरागेण रञ्जिताः सप्त धातवः ।
यथा मम तथा मोक्षलक्ष्मीर्मय्यनुरज्यताम् ॥ ४६

तवानुभावतो भूयाद् भक्तिर्जिन ! भवे भवे ।
देवे त्वयि गुरौ जैने त्वदुपज्ञे च शासने ॥ ४७

देव ! त्वद्दर्शनादेव दुष्कृतं क्षयमाप्नुयात् ।
सुकृतं वर्धतां सर्वमनुमोदनया मम ॥ ४८

सुखे दुःखे दिवा रात्रौ जन्मन्यत्र परत्र च ।
भूयासुः शरणं स्वामिन् ! पञ्चापि परमेष्ठिनः ॥ ४९

श्रीवीतरागस्तवनादमुष्मात्, पुण्यं यदाप्तं भवतात् ततो मे ।
श्रीदेवभद्रैकमहानिधाने, त्वच्छासने तीव्रतरोऽनुरागः ॥ ५०
(इन्द्रवज्रा)

पू.आ.श्री धर्मघोषसूरिविरचितम्

## ३४. ॥ श्रीजिनस्तवनम् ॥

(संस्कृतप्राकृतभाषाभिन्नपूर्वार्द्धोत्तरार्द्धः ।)

(आर्या)

विश्वत्रयैकदर्शन ! सहस्रदर्शननतक्रम ! जिनेन्द्र ! ।
सवणंतपत्तदंसण ! अणंतदंसण ! चिरं जयसु ॥ १

पूर्वाकृतसुकृतानां पूर्वाशीलितविशुद्धशीलानाम् ।
अविहिततवाण पुव्विं न होइ तुह दंसणं देव ! ॥ २

भवशतकृतमपि पापं त्वद्दर्शनतो विलीयते नाथ ! ।
पिंडीभूयं पि घयं दुअं जहा जलिरजलणाओ ॥ ३

समयोऽयमेव शस्यः सलक्षणोऽसौ तदहरप्यनघम् ।
पक्खो वि सो सपक्खो जगबंधव ! दीससे जत्थ ॥ ४

द्रष्टुरदृष्टे वाञ्छा दृष्टे त्वयि नाथ ! विरहजं दुःखम् ।
इअ जइ दुहावि न सुहं तहावि तुह दंसणं होउ ॥ ५

पूर्वार्जितसुकृतकृतं भाविशुभनिबन्धनं हरति चैनः ।
इअ कालयत्तयसुहयं जियाण तुह दंसणं दुलहं ॥ ६

स्वामिन् ! स्वदर्शनं कुरु तथा यथा स्यात् पुनर्न तदभावः ।
जच्चंधवेयणाओ चक्खुक्खयवेयणा दुसहा ॥ ७

नामापि नाथ ! यस्ते वरमन्त्रसधर्मकीर्त्तयति तस्य ।
मिच्छादंसणदोसो लहु नासइ किं परं भणिमो ? ॥ ८

य इति जिन ! त्वामन्यूनदर्शनाऽन्यूनदर्शनं नौति ।
सुविशुद्धदर्शनः स श्रयति सत्वरं सर्वदर्शित्वम् ॥ ९

पू.आ.श्री वादिराजसूरिविरचितम्

## ३५. ॥ एकीभावस्तोत्रम् ॥

(मन्दाक्रान्ता)

एकीभावं गत इव मया यः स्वयं कर्मबन्धो,
घोरं दुःखं भवभवगतो दुर्निवारः करोति ।
तस्याप्यस्य त्वयि जिनवरे ! भक्तिरुन्मुक्तये चेत्,
जेतुं शक्यो भवति न तया कोऽपरस्तापहेतुः ॥ १

ज्योतीरूपं दुरितनिवहध्वान्तविध्वंसहेतुं,
त्वामेवाहुर्जिनवर ! चिरं तत्त्वविद्याभियुक्ताः ।
चेतोवासे भवसि च मम स्फारमुद्भासमान-
स्तस्मिन्नंहः कथमिव तमो वस्तुतो वस्तुमीष्टे ॥ २

आनन्दाश्रुस्नपितवदनं गद्गदं चाभिजल्पन्,
यो जायेत त्वयि दृढमनाः स्तोत्रमन्त्रैर्भवन्तम् ।
तस्याभ्यस्तादपि च सुचिरं देहवल्मीकमध्या-
न्निष्कास्यन्ते विविधविषमव्याधयः काद्रवेयाः ॥ ३

प्रागेवेह त्रिदिवभवनादेष्यता भव्यपुण्यात्
पृथ्वीचक्रं कनकमयतां देव ! निन्ये त्वयेदं ।
ध्यानद्वारं मम रुचिकरं स्वान्तगेहं प्रविष्टः,
तत्किं चित्रं जिन ! वपुरिदं यत्सुवर्णीकरोषि ॥ ४

लोकस्यैकस्तमसि भगवन्निर्निमित्तेन बन्धुः,
त्वय्येवासौ सकलविषया शक्तिरप्रत्यनीका ।
भक्तिस्फीतां चिरमधिवसन्मामिकां चित्तशय्यां,
मय्युत्पन्नं कथमिव ततः क्लेशयूथं सहेथाः ॥ ५

जन्माटव्यां कथमपि मया देव ! दीर्घं भ्रमित्वा,
प्राप्तैवेयं तव नयकथा स्फारपीयूषवापी ।
तस्या मध्ये हिमकरहिमव्यूहशीते नितान्तं,
निर्मग्नं मां न जहति कथं दुःखदावोपतापाः ॥ ६

पादन्यासादपि च पुनतो यात्रया ते त्रिलोकीं,
हेमाभासो भवति सुरभिः श्रीनिवासश्च पद्मः ।
सर्वाङ्गेण स्पृशति भगवंस्त्वय्यशेषं मनो मे,
श्रेयः किं तत्स्वयमहरहर्यन्न मामभ्युपैति ॥ ७

पश्यन्तं त्वद्वचनममृतं भक्तिपात्र्या पिबन्तं,
कर्मारण्यात्पुरुषमसमानन्दधाम प्रविष्टम् ।
त्वां दुर्वारस्मरमदहरं त्वत्प्रसादैकभूमिं
क्रूराकाराः कथमिव रुजाकण्टका निर्लुठन्ति ॥ ८

पाषाणात्मा तदितरसमः केवलं रत्नमूर्ति-
र्मानस्तम्भो भवति च परस्तादृशो रत्नवर्गः ।

दृष्टिप्राप्तो हरति स कथं मानरोगं नराणां,
प्रत्यासत्तिर्यदि न भवतस्तस्य तच्छक्तिहेतुः ॥ ९

हृद्यः प्राप्तो मरुदपि भवन्मूर्तिशैलोपवाही,
सद्यः पुंसां निरवधिरुजाधूलिबन्धं धुनोति ।
ध्यानाहूतो हृदयकमलं यस्य तु त्वं प्रविष्ट-
स्तस्याशक्यः क इह भुवने देव ! लोकोपकारः ॥ १०

जानासि त्वं मम भवभवे यच्च यादृक्च दुःखं,
जातं यस्य स्मरणमपि मे शस्त्रवन्निष्पिनष्टि ।
त्वं सर्वेशः सकृप इति च त्वामुपेतोऽस्मि भक्त्या,
यत्कर्तव्यं तदिह विषये देव एव प्रमाणम् ॥ ११

प्रापद्दैवं तव नुतिपदैर्जीवकेनोपदिष्टैः,
पापाचारी मरणसमये सारमेयोपि सौख्यम् ।
कः संदेहो यदुपलभते वासवश्रीप्रभुत्वं,
जल्पञ्जाप्यैर्मणिभिरमलैस्त्वन्नमस्कारचक्रम् ॥ १२

शुद्धे ज्ञाने शुचिनि चरिते सत्यपि त्वय्यनीचा,
भक्तिर्नो चेदनवधिसुखावञ्चिका कुञ्चिकेयम् ।
शक्योद्घाटं भवति हि कथं मुक्तिकामस्य पुंसो
मुक्तिद्वारं परिदृढमहामोहमुद्राकवाटम् ॥ १३

प्रच्छन्नः खल्वयमघमयैरन्धकारैः समन्ता-
त्पन्था मुक्तेः स्थपुटितपदः क्लेशगर्तैरगाधैः ।
तत्कस्तेन व्रजति सुखतो देव ! तत्त्वावभासी,
यद्यग्रेऽग्रे न भवति भवद्भारतीरत्नदीपः ॥ १४

आत्मज्योतिर्निधिरनवधिर्द्रष्टुरानन्दहेतुः
कर्मक्षोणीपटलपिहितो योऽनवाप्यः परेषाम् ।
हस्ते कुर्वन्त्यनतिचिरतस्तं भवद्भक्तिभाजः,
स्तौत्रैर्बन्धप्रकृतिपरुषोद्दामधात्रीखनित्रैः ॥ १५

प्रत्युत्पन्ना नयहिमगिरेरायता चामृताब्धे-,
र्या देव ! त्वत्पदकमलयोः संगता भक्तिगङ्गा ।
चेतस्तस्यां मम रुचिवशादाप्लुतं क्षालितांहः,
कल्माषं यद्भवति किमियं देव ! संदेहभूमिः ॥ १६

प्रादुर्भूतस्थिरपदसुख ! त्वामनुध्यायतो मे,
त्वय्येवाहं स इति मतिरुत्पद्यते निर्विकल्पा ।
मिथ्यैवेयं तदपि तनुते तृप्तिमभ्रेषरूपां,
दोषात्मानोप्यभिमतफलास्त्वत्प्रसादाद्भवन्ति ॥ १७

मिथ्यावादं मलमपनुदन्सप्तभङ्गीतरङ्गैः
वागम्भोधिर्भुवनमखिलं देव ! पर्येति यस्ते ।
तस्यावृत्तिं सपदि विबुधाश्चेतसैवाचलेन,
व्यातन्वन्तः सुचिरममृतासेवया तृप्नुवन्ति ॥ १८

आहार्येभ्यः स्पृहयति परं यः स्वभावादहृद्यः,
शस्त्रग्राही भवति सततं वैरिणा यश्च शक्यः ।
सर्वाङ्गेषु त्वमसि सुभगस्त्वं न शक्यः परेषां,
तत्किं भूषावसनकुसुमैः किं च शस्त्रैरुदस्त्रैः ॥ १९

इन्द्रः सेवां तव सुकुरुतां किं तया श्लाघनं ते,
तस्यैवेयं भवलयकरी श्लाघ्यतामातनोति ।

त्वं निस्तारी जननजलधेः सिद्धिकान्तापतिस्त्वं,
त्वं लोकानां प्रभुरिति तव श्लाध्यते स्तोत्रमित्थम् ॥ २०

वृत्तिर्वाचामपरसदृशी न त्वमन्येन तुल्यः,
स्तुत्युद्गाराः कथमिव ततस्त्वय्यमी नः क्रमन्ते ।
मैवं भूवंस्तदपि भगवन्भक्तिपीयूषपुष्टा-
स्ते भव्यानामभिमतफलाः पारिजाता भवन्ति ॥ २१

कोपावेशो न तव न तव क्वापि देव ! प्रसादो,
व्याप्तं चेतस्तव हि परमोपेक्षयैवानपेक्षम् ।
आज्ञावश्यं तदपि भुवनं सन्निधिर्वैरहारी,
क्वैवंभूतं भुवनतिलक ! प्राभवं त्वत्परेषु ॥ २२

देव ! स्तोतुं त्रिदिवगणिकामण्डलीगीतकीर्तिं,
तोतूर्ति त्वां सकलविषयज्ञानमूर्तिं जनो यः ।
तस्य क्षेमं न पदमटतो जातु जोहूर्ति पन्था-
स्तत्त्वग्रन्थस्मरणविषये नैष मोमूर्ति मर्त्यः ॥ २३

चित्ते कुर्वन्निरवधिसुखज्ञानदृग्वीर्यरूपं,
देव ! त्वां यः समयनियमादादरेण स्तवीति ।
श्रेयोमार्गं स खलु सुकृती तावता पूरयित्वा,
कल्याणानां भवति विषयः पञ्चधा पञ्चितानां ॥ २४

भक्तिप्रह्वमहेन्द्रपूजितपद ! त्वत्कीर्तने न क्षमाः,
सूक्ष्मज्ञानदृशोऽपि संयमभृतः के हन्त मन्दा वयम् ।
अस्माभिः स्तवनच्छलेन तु परस्त्वय्यादरस्तन्यते,
स्वात्माधीनसुखैषिणां स खलु नः कल्याणकल्पद्रुमः ॥ २५

(शार्दूलविक्रीडित)

वादिराजमनु शाब्दिकलोको, वादिराजमनु तार्किकसिंहः ।
वादिराजमनु काव्यकृतस्ते, वादिराजमनु भव्यसहायः ॥ २६

(स्वागता)

॥ श्रीमत्तपागच्छाचार्यश्री विबुधविमलसूरिविरचितम् ॥

## ३६.॥ अष्टप्रकारपूजागर्भितश्रीजिनेश्वराष्टकम् ॥

(द्रुतविलम्बितवृत्तम्)

जिनपतेर्वरगन्धसुपूजनं, जनिजरामरणोद्भवभीतिहृत् ।
सकलरोगवियोगविपद्धरं, कुरु करेण सदा निजपावनम् ॥ १

सुमनसां गतिदायिविधायिनां, सुमनसां निकरैः प्रभुपूजनम् ।
सुमनसा सुमनोगुणसङ्गिना, जन ! विधेहि निधेहि मनोऽर्चने॥२

क्षितितलेऽक्षतशर्मनिदानकं, गणिवरस्य पुरोऽक्षतमण्डलम् ।
क्षतजनिर्मितदेहनिवारणं, भवपयोधिसमुद्धरणोद्यतम् ॥ ३

भवति दीपशिखापरिमोचनं, त्रिभुवनेश्वरसद्मनि शोभनम् ।
स्वतनुकान्तिकरं तिमिरं हरं, जगति मङ्गलकारणमान्तरम् ॥४

शिवतरोः फलदानपरैर्नवै-र्वरफलैः किल पूजय तीर्थपम् ।
त्रिदशनाथनतक्रमपङ्कजं, निहतमोहमहीधरमण्डनम् ॥ ५

अगुरुमुख्यमनोहरवस्तुनः, स्वनिरुपाधिगुणौघविधायिनः ।
प्रभुशरीरसुगन्धसुहेतुना, रचय धूपनपूजनमर्हतः ॥ ६

सुरनदीजलपूर्णघटैर्घनै-र्घुसृणमिश्रितवारिभृतैः परैः ।
स्नपय तीर्थकृतं गुणवारिधिं, विमलतां क्रियतां च निजात्मनः ॥७

अनशनं तु ममास्त्विति बुद्धितो, रुचिरभोजनसञ्चितभाजनम् ।
अनुदिनं विधिना जिनमन्दिरे, शुभमते ! बत ढौकय चेतसा ॥८

अष्टप्रकारां मुनिनाथपूजां, यो देहधारी विदधाति नित्यम् ।
अर्हत्पदं प्राप्य स याति मुक्तिं, तत् पूजय त्वं विबुधेश्वरेशम् ॥९
(स्थुरीशम्) (इन्द्रवज्रा)

पू.आ. श्री देवेन्द्रसूरिप्रणीतम्

## ३७. ॥ श्रीजिनाज्ञास्तोत्रम् ॥

(अनुष्टुप्)

कल्पद्रुमाद्यतिक्रान्ता, त्वदाज्ञा देव ! देहिनाम् ।
प्रसूते या फलैर्नित्य-मिहामुत्राप्यचिन्तितैः ॥ १

शारीरमानसासङ्ख्य-दुःखलक्षक्षयङ्करी ।
कथं सुधासदृक्षा स्या-त्त्वदाज्ञा शिवसौख्यदा ॥ २

सदोद्योता गतस्नेहा, निश्चला च निरञ्जना ।
त्वदाज्ञा जगतामीश !, नव्य-दीपायते नृणाम् ॥ ३

त्वदाज्ञैकावली चेयं, ज्ञानादिवररत्निका ।
हृत्स्थयापि यया जीवा, निर्ग्रन्थाः स्युः तदद्भुतम् ॥ ४

कर्मारिवीर श्रीवीर !, त्वदाज्ञां ये तु कुर्वते ।
त्रैलोक्यपि करोत्याज्ञां, तेषां सौभाग्यशालिनाम् ॥ ५

देवाधिदेव ! देवेन्द्र-वृन्दवन्द्यपदद्वय ! ।
त्वदाज्ञा हृदि मे नित्य-मस्तु मेरूरिव स्थिरा ॥ ६

पू.आ. श्री जयानन्दसूरीश्वरविरचितः

# ३८. ॥ श्रीसाधारणजिनस्तवः ॥

देवाः प्रभो ! यं विधिनाऽऽत्मशुद्ध्यै,
भक्त्या सुमेरोः शिखरेऽभ्यषिञ्चन् ।
संस्तूयसे त्वं स मया समोद-
मुन्मील्यते ज्ञानदृशा यथा मे ॥ (इन्द्रवज्रा) १

(उपजाति)

ध्यानानुकम्पाधृतयः प्रधानो-
ल्लासिस्थिरा ज्ञानसुखक्षमं च ।
सुनाथ ! सन्ति त्वयि सिद्धिसौधा-
धिरूढ ! कर्मोज्झित ! विश्वरुच्य ! ॥ २

संसारभीतं जगदीश ! दीनं
मां रक्ष रक्षाक्षम ! रक्षणीयम् ।
प्रौढप्रसादं कुरु सौम्यदृष्ट्या
विलोकय स्वीयवचश्च देहि ॥ ३

नतेन्द्र ! विद्रावितदोष ! दत्त-
दाना दरिद्रा अपि वीतदौस्थ्याः ।
त्वया कृता भूरिधना अनन्त-
ज्ञान ! द्विषान् सक्षम ! मङ्क्षु मासान् ॥ ४

द्वित्रैर्भवैर्मुक्तिमना द्विपाद्या-
स्तवस्त्रिपूर्जी विदधत्त्रिसन्ध्यम् ।

कल्याणकानां जिनपञ्चपर्वी-
माराध्य भव्यः क्षिपतेऽष्टकर्म्म ॥ ५

साम्येन पश्यंस्त्रिजगद्विवेकी
श्रयन् प्रभो ! पञ्चसमित्युपैति ।
अपास्य सप्तभ्यधिसिद्धि मध्ये-
सिद्धं जवेनोपभवादुपेशम् ॥ ६

भवेच्छुभायोपभवद्यथेष्टं
श्रये सनाथोऽस्मि नमोऽस्तु दोषाः ।
दूरे प्रभावश्च गुरुः सुखं मे
विश्वार्च्यधीश्रीकृदुपद्विपादे ॥ ७

मुक्त्वा भवं सौख्यमवाप्तुमङ्गी
धीमांस्त्यजन्मोहमघस्य हन्ता ।
यो मुच्यमानस्तमसा शिवीयेत्
त्वत्सेवितां काम्यतु सोत्र नेतः ! ॥ (इन्द्रवज्रा) ८

क्षेमेषु वृक्षत्सु घनायमानो
हितः पितेवामृतवद्दुरापः ।
मम प्रभो ! भव्यतरं स्वभृत्यी-
भावं जयानन्दमय प्रदेयाः ॥ ९

पू.आ.श्री पुण्यरत्नसूरिविरचिता

## ३९. ॥ द्विवर्णरत्नमालिकास्तुतिः ॥

[चतुर्विंशतिजिनस्तुतिः]

(अनुष्टुप्)

**प्रणम्याप्तमहं कुर्वे, द्विवर्णरत्नमालिकाम् ।**
**विदुषां भातु कण्ठे सा, चतुराणां चिरं वरा ॥** १

[**दण्डान्वयः**–आप्तं प्रणम्य अहं द्विवर्णरत्नमालिकां कुर्वे वरा सा चतुराणां विदुषां कण्ठे चिरं भातु ॥ १ ॥]

**विदम्बुन्दं ववन्दे वै, वादिदेवं वदावदः ।**
**विद्वद्वेदविदां वृन्दं, दैवदं विविवाददम् ॥** २

[दं०–वै विद्वद्वेदविदां वृन्दं विदम्बुदं वदावदम्
दैववं विविवाददं आदिदेवं ववन्दे ॥ २ ॥]

**क्रूरारीरोऽकरोऽकारि क्रूरैः किं किङ्करैरकम् ।**
**करिकाङ्कोऽर्करुक्कैः कौ रैरः कं कारकोऽकरोत् ॥** ३

[दं०–क्रूरारीरोऽकरोऽर्करुक् रैरः कारकः करिकाङ्कः
कौ कं अकरोत् क्रूरैः किङ्करैः किं अकं अकारि ? ॥ ३ ॥]

**नेनोऽनेनाः सेनानीनां, सेनासूनुः सासीनां नः ।**
**सन्ना नासीन्नानुन्नानां, नानासन्नानासन्नानां ॥** ४

[दं०–सासीनां आनुन्नानां नानासन्नानासन्नानां सेनानीनां
नः अनेनाः सन्ना सेनासूनुः इनः न आसीत् न ॥ ४ ॥]

**कालिकोऽलं किलालोकी, काले लोके कलां ललौ ।**
**लीलाकल्लोललोऽलोलः, कलङ्कालीककल्कलूः ॥** ५

[दं०–आलोकी लिलाकल्लोललः अलोलः कलङ्कालीककल्कलूः
कालिकः किल काले लोके अलं कलां ललौ ॥ ५ ॥]

**धाराधरिररन्ध्रारं, रुरुधेऽरिं धराधरं ।**
**रुधिराधिं ररौ धीराऽऽरर्द्धिं धरिधुरन्धरः ॥** ६

[दं०-अरन्ध्रो धरिधुरन्धरः धाराधरिः धराधरं रुधिराधिं अरिं अरं रुरुधे ! धीर ! ऋद्धिं आर ररौ ! ॥ ६ ॥]

**भभाऽम्भोजाभ भूभृज्जिज्जजाऽऽजिभाजिभूभुजा ।**
**भुजजोऽभाजि भूभृज्जिज्जाजीभौजो भुजाजिजित् ॥** ७

[दं०-भभ ! भूभृत् ! जित् ! जज ! अम्भोजाभ ! भुजजो भूभृज्जित् जाजी भुजाजिजित् इभौजो आजिभाजिभूभुजा अभाजि ॥७॥]

**रसासूः सरसीं सारां, संससार ससारसां ।**
**सुरिरंसुरसंसारी, सुसारः ससुरासुरः ॥** ८

[दं०-असंसारो सुसारः ससुरासुरः सुरिरंसु रसासूः ससारसां सारां सरसीं ससार ॥ ८ ॥]

**भाशाभिः शशिभे शम्भौ, शशंसे शुशुभे शिशौ ।**
**भो ! भभेश ! शुभं भाभिः, शोभाभिः शं भृशं शुभे ॥९**

[दं०-भो ! भभ ! ईश ! शम्भौ शुभे शशिभे शिशौ भाभिः शोभाभिः भाशाभिः शुशुभे भृशं शुभं शं शशंसे ॥ ९ ॥]

**रामामार ररामाऽर, मारामेऽमा रमामरैः ।**
**ममाराररमऽमारामोऽमाम्रे रामो रमेऽमरः ॥** १०

[दं०-अमारामोऽमरो रामो रामां आर अमाम्रे रमे आरामे रमामरैः अमा अरं रराम, आरं ममार ॥ १० ॥]

**ददे नानुदिनं दानं, नन्देननन्दनेन नः ।**
**नानादानं ददाऽदीनाऽऽनन्ददेनाऽऽनन्देन नु ॥** ११

[दं०–नु नः अदीनानन्ददेन आनन्देन ददा नन्देननन्दनेन अनादानं दानं अनुदिनं न ददे (इति) न ॥ ११ ॥]

**कुशशाङ्कोऽशिकाङ्केशाऽशङ्काशाकुशशोक कैः ।**
**शशङ्के कौशिकः कोः कैः शकोशोऽकाङ्कुशोऽकृशः** ॥१२

[दं०–ईश ! अशिकाङ्क ! अशङ्काशाकुशशोक
अकङ्कुशोऽकृशः कैः कुशशाङ्कः कैः
कोः कौशिकः शशङ्के ॥ १२ ॥]

**येयोऽलोलो लुलायी यां, लीलयाऽयी ललौ ययुः ।**
**ययुया ये ययायाये, यायऽऽयो यालयोऽप्यलम् ॥** १३

[दं०–अलोलो येयो अयी यालयो लुलायी लीलया यां ललौ येये ययुया आयाय ययुः आयोऽपि अलं इयाय ॥ १३ ॥]

**कुलो लोकेऽकलाकेलिः ककालालिकुलालकः ।**
**कोलाङ्कः क किलैकोऽलं, लोकालोकी कलोऽकलोत्** ॥१४

[दं०–कुलोऽकलाकेलिः, ककालालिकुलालकः एकः,
लोकालोकी कलः कोलाङ्कः किल लोके
अलं कं अकलोत् ॥ १४ ॥]

**तेनेऽनन्तेन नाऽनेनो, नन्तानेतृनतेन नः ।**
**नूनं नानितिनेनेन, ततैनोऽतनुनुन्नुतः ( ? तम् ) ॥** १५

[दं०–नूनंनः ! नन्तानेतृनतेन अनितिना अनन्तेन इनेन ततैनोऽतनुनुन्नुतं अनेनो न न तेने ॥ १५ ॥]

**भूभृद्दुन्दुभिभिद्भं भूददम्भीभभीददोः ।**
**भाभो भिदुभृदाभेदीन्दुभो भूभृददादिभैः ॥ १६**

[दं०–भूभृद्दुदुभिभित् भृदद् अदम्भी इभभीददोः भाभ आभेदी इन्दुभो भूभृत् भिदुभृत् इभैः भं अदात् ॥ १६ ॥]

**रोऽचर्चीरां चिरं, चारुरुचिराचारचञ्चुरः ।**
**चचाराऽराऽऽचिरोऽचीरोऽरीरोऽर्चां रुचिरोऽचरः ॥ १७**

[दं०–रोऽचर्ची चारुरुचिः आचारचञ्चुरः अचीरोऽरीरो रुचिरोऽचर आचिरः चिरं इरां आर अर्चां आर ॥ १७ ॥]

**रैरोऽजी राजराजौ जो, रराज राजराजराः ।**
**राजर्जुरजिरेऽजारोऽरजोजरोऽरिराजिजित् ॥ १८**

[दं०–रैरो जो राजराजराः राजा ऋजुः अजारो अरजोजरो अरिराजिजित् अजी राजराजौ अजिरे रराज ॥ १८ ॥]

**हरिहाहाहरह्रीरो, हारोरा हरिरा हरः ।**
**हराऽरहोरहोंऽहोऽर्ह, हे हरीरहरे ऽर हि ॥ १९**

[दं०–हे अर्ह ! हरीरहरे ! अर ! हरिहाहाहरह्रीरो हारोरा हरिरा हरः अरहोरहोंऽहो हि हर ॥ १९ ॥]

**ललाममाऽमला लीला, मल्लीमाला ममेऽमलैः ।**
**मौलौ मल्लेललं मम्लौ, माऽलोलेलालिमामलः ॥ २०**

[दं०–अलोलेलालिमामलः मल्लेः मौलौ मल्लीमाला मा मम्लौ अमला ललाममा लीला अमलैः अलं मा ममे ॥ २० ॥]

**जैनेनोऽजनि नेनौजा, जननीजननाज्जिनः ।**
**नांऽजनो न जनीनो नोऽनिजाजीनजनाजिजित् ॥** २१

[दं०–नः जैनेनः ना जनीन अनिजाजीनजनाजिजित् अञ्जनो जिनः जननीजननात् इनौजा न न अजनि ॥ २१ ॥]

**नमामि नमिनामानं, ममानमनिनं ननु ।**
**मेनाननं मनोमं नाऽनामं मानममामुनिम् ॥** २२

[दं०–अमानं अनिनं मेनाननं ननुः नमनोमं अनामं मानं अमामुनिं नमिनामानं नमामि ॥ २२ ॥]

**नो गोगगोगनागेनोऽ निनोऽगान्नाङ्गनाऽनुगा ।**
**नुनाऽनेनाननोऽनागा, नाऽनङ्गेनानुगो नगम् ॥** २३

[दं०–नः ! गोगगोगनागेनोऽनिनोऽनेनाननोऽनागा अनङ्गेनानुगों नु नङ्ग अगात् अनुगा अङ्गना न न अगात् ॥ २३ ॥]

**गोरो गिरागरो रोगा, गगौरीगुरुरिङ्गरः ।**
**ररौ गुरुरुरङ्गीगां, रागारीरोऽग गोगरुक् ॥** २४

[दं०–अग ! गोरो, गिरागरो रोगागगौरीगुरुः इङ्गरः गुरुः रागारीरो गोगरूक् उरङ्गी गां ररौ ॥ २४ ॥]

**वरो विविवरोऽरोरी, वैरिवारेर वीरवाः ।**
**वारिराराव वीराऽवाऽररोरा रविरेव रः ॥** २५

[दं०–वैरिवारेर ! वारिराराव ! वीर ! वरो विविवरः अरोरी वीरवाः अररोराः रविरेव रः अव ॥ २५ ॥]

**साधुस्तोमसुवन्दिताङ्घ्रिजलज ! ज्ञानव्रताल्पामर !**
**पूज्य ! श्रीगजसागरेन्द्र ! सुगुरो ! नित्यं प्रसादात्तव ।**
**प्रोक्तेयं सुनुतिर्द्विवर्ण युगलश्लोकै र्जिनानां मया,**
**प्रातर्ये सुपठन्ति ते परममायन्त्यक्षरं श्रीपदम् ॥** २६

[दं०–साधुस्तोमसुवन्दिताङ्घ्रिजलज ! ज्ञानव्रताल्पामर ! पूज्य ! (ज्ञानव्रताल्पामरपूज्य !) इन्द्र ! सुगुरो ! श्री गजसागर ! मया तव प्रसादात् द्विवर्णयुगलश्लोकैः जिनानां इयं सुनुतिः प्रोक्ता प्रातः ये नित्यं सुपठन्ति ते परमं अक्षरं श्रीपदं आयन्ति ॥२६॥]

पू.आ.श्री चन्द्रप्रभसूरिविरचितम्

## ४०. ॥ श्रीसाधारणजिनस्तवनम् ॥

(प्रभातकुलकापराख्यम्)

(अनुष्टुप्)

प्रातरेव समुत्थाय तीर्थनाथ ! मुखं तव ।
ये पश्यन्ति प्रणश्यन्ति तेषां नियतमापदः ॥ १

जिनेन्द्र ! त्वन्मुखाम्भोजं प्रातः पश्यन्ति ये नराः ।
सार्द्धं सर्वज्ञकल्याणैर्नित्यं त्यजति तान्न राः ॥ २

भावतो भवतो दृष्टं मुखं दिनमुखे न यैः ।
मर्त्यजन्मफलं नाथ ! नाशितं ना शितं हि तैः ॥ ३

प्रभो ! प्रभोदयेऽवश्यं पश्यन्नास्यं तवान्वहम् ।
नरो न रोगदारिद्रोपद्रवैर्देव ! दूयते ॥ ४

नेदं पुण्यमपुण्यानां प्रभो ! प्रातः प्रयाति ते ।
मुखं मुखमभीष्टानां सुदृष्टेर्दृष्टिगोचरम् ॥ ५

दृष्ट्वा ते वीतरागास्यं कान्तोपान्तं मनोहरम् ।
कथमभ्येति भव्यानां कान्तोपान्तं मनो हरम् ? ॥ ६

यस्ते सुप्तोत्थितः पश्येत् पादपद्मं सुदारुणम् ।
न पुनर्लभते नाथ ! भवे दुःखं स दारुणम् ॥ ७

निःशेषमङ्गलागारे प्रगेऽङ्घ्री यो न नाथ ! ते ।
वीक्षते स कथं मूढो मोक्षसौख्यस्य नाथते ? ॥ ८

प्रभा ते पादयोः स्पृष्टा प्रभाते शिरसा प्रभो ! ।
विभवं वितनोत्याशु विभवं च पदं नृणाम् ॥ ९

प्रभो ! त्वत्पादयोर्नित्यमरुणामरुणोदये ।
स्पृशन्न स्पृश्यते नाथ ! पातकैर्भवपातकैः ॥ १०

त्वत्पादनखचन्द्राणां ज्योत्स्नया स्नपिता विभो ! ।
प्रणन्तारः प्रगे भान्ति मूर्तपुण्योज्ज्वला इव ॥ ११

किं गुणैः किं कुलेनापि किं रूपेण किमाज्ञया ? ।
किं विभो ! विभवेनापि न चेन्नित्यं त्वमीक्ष्यसे ॥ १२

एतत्प्रभातकुलकं पुलकं दधानो
यस्ते निशान्तमुपगम्य निशान्त एव ।
स्वामिन् ! पठेत् त्रिदिववासमुपास्य पश्चा-
च्चन्द्रप्रभामलमुपैति पदं स मुक्तेः ॥ (व.ति.) १३

पू.आ. श्री हर्षचन्द्रसूरिविरचितः

## ४१. ॥ श्रीजिनस्तवः ॥

(पृथ्वी)

तटीध्रतटताटनत्रुटितकोटिदन्तार्गलो
गलन्मदकटुक्वणद्भ्रमरडिण्डिमोड्डामरः ।
जिनेश्वर ! धुरन्धरस्तरुणिमोद्धुरः सिन्धुरो
न धीरमभिधावति त्वदभिधाक्षरध्यायिनम् ॥ १

क्षणक्षतमतङ्गजक्षरदसृक्जलप्रस्फुट-
च्छटाच्छुरितकेशरः प्रकटितस्फुरद्विक्रमः ।
विपाटिमसुखोत्कटो विकटदृष्टिदंष्ट्राङ्कुरो
हरिर्जिन ! तव स्मृतेः क्रमगतोऽप्यपक्रामति ॥ २

किरन्नतिविषाकुलस्फुरितविस्फुलिङ्गोत्करैः
करम्बितदिशा दृशा क्षरदसृक्सदृक्षार्चिषः ।
क्षितोऽपि सविधे क्षताद्दशति दन्दशूकः कथं
विषापहरणं मणिं स्मरणमर्हतां बिभ्रतः ॥ ३

रुषाऽन्यमसहन्महज्ज्वलशिखाग्रजिह्वाशतो
जिघत्सुरिव मण्डलं झगिति चण्डरश्मेरपि ।

दवाग्निरपि धुक्षितो जिनप ! मंक्षु विध्याप्यते
भवच्चरणनिर्झरस्मरणभूरिधाराम्बुभिः ॥ ४

क्वचित् कलकलोद्भटैः भटकपालकेलीकिलैः
क्वचिद् रचितताण्डवैः करिकबन्धपृष्ठस्थितैः ।
विकीर्णदिशिपूतनैः क्व दनुवेदिकायां जिन !
त्वदंह्रिपजनं जनं जयवधूर्वृणीते स्वयम् ॥ ५

त्रुटन्ति भुजरज्जवो झटिति बन्धसज्जाः स्वयं
गलन्ति निगलाग(र्ग?)ला द्विगुणचेष्टगाढा अपि ।
जिनेश ! विशरारवश्चरणशृङ्खला त्वत्स्मृते-
र्भवन्ति हतवैरिभिर्विनिहितस्य कारागृहे ॥ ६

विशीर्णसकलाङ्गुलिः क्रमणपूतिपूर्णव्रणो-
द्भ्रमद्ग्रहिलमक्षिकाक्षतकृतव्यथादुःस्थितः ।
उपैति विरमद्व्रणं क्षणत एव नित्यं जिन !
त्वदीयवचनामृताच्चमरव...........रुल्लाघताम् ॥ ७

महानिह चलाहतोच्छलितवारिच्छटा(वाःछटा)च्छोटितः
प्लुतं मदहठोल्लुठज्जरठमीननिर्लोठितः ।
अमुद्रमपि माद्यति द्रढयितुं समुद्रे प्लवं
सहेति जिन ! वास्तवस्तवपदस्तव(ः) केवलम् ॥ ८

जिनेन्द्र ! भजतामिदं तव पदारविन्दद्वयं
पुरन्दरपुरस्सरत्रिदशभूरिभूपस्तुतम् ।
दुरन्तदुरितोत्करप्रभवभाञ्जि जन्मान्यपि
द्रवन्ति किमुपद्रवे प्रसरविद्रवे विस्मयः ॥ ९

पण्डितवर्य पू.आ.श्री ज्ञानविमलसूरिविरचितम्

## ४२. ॥ श्रीसाधारणजिनस्तोत्रम् ॥

(शार्दुलविक्रीडितम्)

इष्टानिष्टवियोगयोगहरिणी कल्याणनिष्पादिनी,
चिन्ताशोककुयोगरोगशमिनी मूर्त्तिर्जनानन्दिनी ।
नित्यं मानववाञ्छितार्थकरिणी मन्दारसंवादिनी,
कल्याणं विदधातु सुन्दरतरं सत्यं वचोवादिनी ॥ १

चित्रं चेतसि वर्त्ततेऽद्भुतमिदं व्यापल्लताहारिणीं,
मूर्त्तिं स्फूर्त्तिमतीमतीवविमलां नित्यं मनोहारिणीम् ।
विख्यातां स्नपयन्त एव मनुजाः शुद्धोदकेन स्वयं,
सङ्ख्यातीततमोमलापनयतो नैर्मल्यमाबिभ्रति ॥ २

धन्या दृष्टिरियं यया विमलया दृष्टो भवान् प्रत्यहं,
धन्यासौ रसना यया स्तुतिपथं नीतो जगद्वत्सलः ।
धन्यं कर्णयुगं वचोऽमृतरसं पीतं मुदा येन ते,
धन्यं हृत् सततं च येन विशदस्त्वन्नाममन्त्रो धृतः ॥ ३

किं पीयूषमयी कृपारसमयी कर्पूरपारीमयी
किं चानन्दमयी महोदयमयी सद्ध्यानलीलामयी ।
तत्त्वज्ञानमयी सुदर्शनमयी निस्तन्द्रचन्द्रप्रभा
सारस्फारमयी पुनातु सततं मूर्त्तिस्त्वदीया सताम् ॥ ४

लोकालोकविभासनैकतरणिप्रायास्त्वदीयाः शुभाः,
वाचो वाक्यवतामशेषविमलज्ञानं सदा तन्वते ।
संसाराम्बुधिमध्यमज्जदसुभृद्वृन्दस्य याः साम्प्रतं,
पोतायन्त इव प्रहृष्टमनसस्त्वद्ध्यानमासेदुषः ॥ ५

पू.आ.श्री हेमचन्द्रसूरिविरचितम्

## ४३. ॥ श्रीमहादेवस्तोत्रम् ॥

(अनुष्टुप्)

प्रशान्तं दर्शनं यस्य, सर्वभूताभयप्रदम् ।
माङ्गल्यं च प्रशस्तं च, शिवस्तेन विभाव्यते ॥ १

महत्त्वादीश्वरत्वाच्च, यो महेश्वरतां गतः ।
राग-द्वेषविनिर्मुक्तं, वन्देऽहं तं महेश्वरम् ॥ २

महाज्ञानं भवेद् यस्य, लोकालोकप्रकाशकम् ।
महादया दमो ध्यानं, महादेवः स उच्यते ॥ ३

महान्तस्तस्करा ये तु, तिष्ठन्तः स्वशरीरके ।
निर्जिता येन देवेन, महादेवः स उच्यते ॥ ४

रागद्वेषौ महामल्लौ, दुर्जयौ येन निर्जितौ ।
महादेवं तु तं मन्ये, शेषा वै नामधारकाः ॥ ५

शब्दमात्रो महादेवो, लौकिकानां मते मतः ।
शब्दतो गुणतश्चैवा-ऽर्थतोऽपि जिनशासने ॥ ६

शक्तितो व्यक्तितश्चैव, विज्ञानं लक्षणं तथा ।
महोजालं हतं येन, महादेवः स उच्यते ॥ ७

नमोऽस्तु ते महादेव !, महामदविवर्जित ! ।
महालोभविनिर्मुक्त !, महागुणसमन्वित ! ॥ ८

महारागो महाद्वेषो, महामोहस्तथैव च ।
कषायश्च हतो येन, महादेवः स उच्यते ॥ ९

महाकामो हतो येन, महाभयविवर्जितः ।
महाव्रतोपदेशी च, महादेवः स उच्यते ॥ १०

महाक्रोधो महामानो, महामाया महामदः ।
महालोभो हतो येन, महादेवः स उच्यते ॥ ११

महानन्दो दया यस्य, महाज्ञानी महातपाः ।
महायोगी महामौनी, महादेवः स उच्यते ॥ १२

महावीर्यं महाधैर्यं, महाशीलं महागुणः ।
महामञ्जुक्षमा यस्य, महादेवः स उच्यते ॥ १३

स्वयम्भूतं यतो ज्ञानं, लोकालोकप्रकाशकम् ।
अनन्तवीर्यचारित्रं, स्वयम्भूः सोऽभिधीयते ॥ १४

शिवो यस्माज्जिनः प्रोक्तः, शङ्करश्च प्रकीर्तितः ।
कायोत्सर्गी च पर्यङ्की, स्त्रीशस्त्रादिविवर्जितः ॥ १५

साकारोऽपि ह्यनाकारो, मूर्त्तामूर्त्तस्तथैव च ।
परमात्मा च बाह्यात्मा, अन्तरात्मा तथैव च ॥ १६

दर्शन-ज्ञानयोगेन, परमात्माऽयमव्ययः ।
परा क्षान्तिरहिंसा च, परमात्मा स उच्यते ॥ १७

परमात्मा सिद्धिसम्प्राप्तौ, बाह्यात्मा तु भवान्तरे ।
अन्तरात्मा भवेद् देह, इत्येष त्रिविधः शिवः ॥ १८

सकलो दोषसम्पूर्णो, निष्कलो दोषवर्जितः ।
पञ्चदेहविनिर्मुक्तः, सम्प्राप्तः परमं पदम् ॥ १९

एकमूर्त्तिस्त्रयो भागा, ब्रह्म-विष्णु-महेश्वराः ।
तान्येव पुनरुक्तानि, ज्ञान-चारित्र-दर्शनात् ॥ २०

एकमूर्त्तिस्त्रयो भागा, ब्रह्म–विष्णु–महेश्वराः ।
परस्परं विभिन्नाना–मेकमूर्त्तिः कथं भवेत् ? ॥ २१

कार्यं विष्णुः क्रिया ब्रह्मा, कारणं तु महेश्वरः ।
कार्य–कारणसम्पन्ना, एकमूर्त्तिः कथं भवेत् ? ॥ २२

प्रजापतिसुतो ब्रह्मा, माता पद्मावती स्मृता ।
अभिजिज्जन्मनक्षत्र–मेकमूर्त्तिः कथं भवेत् ? ॥ २३

वसुदेवसुतो विष्णु–र्माता च देवकी स्मृता ।
रोहिणी जन्मनक्षत्र–मेकमूर्त्तिः कथं भवेत् ? ॥ २४

पेढालस्य सुतो रुद्रो, माता च सत्यकी स्मृता ।
मूलं च जन्मनक्षत्र–मेकमूर्त्तिः कथं भवेत् ? ॥ २५

रक्तवर्णो भवेद् ब्रह्मा, श्वेतवर्णो महेश्वरः ।
कृष्णवर्णो भवेद् विष्णु–रेकमूर्त्तिः कथं भवेत् ? ॥ २६

अक्षसूत्री भवेद् ब्रह्मा, द्वितीयः शूलधारकः ।
तृतीयः शङ्खचक्राङ्क, एकमूर्त्तिः कथं भवेत् ? ॥ २७

चतुर्मुखो भवेद् ब्रह्मा, त्रिनेत्रोऽथ महेश्वरः ।
चतुर्भुजो भवेद् विष्णु–रेकमूर्त्तिः कथं भवेत् ? ॥ २८

मथुरायां जातो ब्रह्मा, राजगृहे महेश्वरः ।
द्वारामत्यामभूद् विष्णु–रेकमूर्त्तिः कथं भवेत् ? ॥ २९

हंसयानो भवेद् ब्रह्मा, वृषयानो महेश्वरः ।
गरुडयानो भवेद् विष्णु–रेकमूर्त्तिः कथं भवेत् ? ॥ ३०

पद्महस्तो भवेद् ब्रह्मा, शूलपाणिर्महेश्वरः ।
चक्रपाणिर्भवेद् विष्णु–रेकमूर्त्तिः कथं भवेत् ? ॥ ३१

कृते जातो भवेद् ब्रह्मा, त्रेतायां च महेश्वरः ।
द्वापरे जनितो विष्णु-रेकमूर्त्तिः कथं भवेत् ? ॥ ३२

ज्ञानं विष्णुः सदा प्रोक्तं, चारित्रं ब्रह्म उच्यते ।
सम्यक्त्वं तु शिवं प्रोक्त-मर्हन्मूर्त्तिस्त्रयात्मिका ॥ ३३

क्षिति-जल-पवन-हुताशन-यजमाना-ऽऽकाश-सोम-सूर्याख्याः ।
इत्येतेऽष्टौ भगवति, वीतरागे गुणा मताः ॥ ३४

क्षितिरित्युच्यते क्षान्ति-र्जलं या च प्रसन्नता ।
निःसङ्गता भवेद् वायु-र्हुताशो योग उच्यते ॥ ३५

यजमानो भवेदात्मा, तपोदानदयादिभिः ।
अलेपकत्वादाकाश-सङ्काशः सोऽभिधीयते ॥ ३६

सौम्यमूर्त्तिरुचिश्चन्द्रो, वीतरागः समीक्ष्यते ।
ज्ञानप्रकाशकत्वेन, आदित्यः सोऽभिधीयते ॥ ३७

पुण्यपापविनिर्मुक्तो, रागद्वेषविवर्जितः ।
श्रीअर्हद्भ्यो नमस्कारः, कर्तव्यः शिवमिच्छता ॥ ३८

अकारेण भवेद् विष्णू, रेफे ब्रह्मा व्यवस्थितः ।
हकारेण हरः प्रोक्त-स्तस्यान्ते परमं पदम् ॥ ३९

अकार आदिधर्मस्य, आदिमोक्षप्रदेशकः ।
स्वरूपे परमं ज्ञान-मकारस्तेन उच्यते ॥ ४०

रूपिद्रव्यस्वरूपं वा, दृष्ट्वा ज्ञानेन चक्षुषा ।
दृष्टं लोकमलोकं वा, रकारस्तेन उच्यते ॥ ४१

हता रागाश्च द्वेषाश्च, हता मोहपरीषहाः ।
हतानि येन कर्माणि, हकारस्तेन उच्यते ॥ ४२

सन्तोषेणाभिसम्पूर्णः, प्रातिहार्याष्टकेन च ।
ज्ञात्वा पुण्यं च पापं च, नकारस्तेन उच्यते ॥ ४३

भवबीजाङ्कुरजनना, रागाद्याः क्षयमुपागता यस्य ।
ब्रह्मा वा विष्णुर्वा, हरो जिनो वा नमस्तस्मै ॥ ४४

पू.आ.श्री देवसुन्दरसूरिविरचितः

## ४४. ॥ श्रीसर्वजिनस्तवः ॥

(उपेन्द्रवज्रा)

कला भवन्तं सकला भवन्तं कला भवन्तं सुतपः कृपाद्याः ।
कला भवन्तं हितवृद्धयेवि कला भवन्तं जिन ! जेतुमीडे ॥ १

नागारमायासमयं विमुच्या- ऽनागा रमाया मय नाम पद्रौ (?)।
नागारमाया पवने मुने ! त्वां ऽनागारमायाति कृति शरण्यम् ॥२

(इन्द्रवज्रा)

मन्दारमालासुरभीद्धदेहे मन्दारमालाभदृशो न भावाः ।
....................मन्दारमालानभुजो भजंस्त्वाम् ॥(इ.व.) ३

समा नपापा भविनोऽश्महेम समान पापाय विपक्षलोपिन् ! ।
समान पापा चरणान् विवेका समान पापा सुमतः पुनर्नो ॥ ४

भावारमानन्त्यमितं हरन्तं भावारमानन्दकरं धरन्तम् ।
भावा रमानङ्गमयाः शुभा नुः
भावारमानन्दुरधीश ! न त्वाम् ॥ (इन्द्रवज्रा) ५

पद्मा नवा तामसभेत्र्यभिव्या- पद्मानवा तापकरं धरन्तम् ।
पद्मा नवाताम्रपदौ च दीता पद्मानवाता व्यथपथ्यधस्ते ॥ ६

(इन्द्रवज्रा)

शमो दया तामस शान्तसर्वा शमोदया तार मनङ्गनाशे ।
शमो दया दारपरं समेते शमोदया तापदसम्पदा माम् ॥ ७

सदा भवारातिभिदे नतेन्द्र ! सदाभवारागवशी कृतीस्त्वाम् ।
सदा भवाराङ्ग न पापिनः स्वः सदाभवाराद्भुतहारयामे ॥ ८

सदाऽगमं ते व्रितसंविदुल्ल- सदागमं तेज इवाऽत्र मूर्त्तम् ।
सदा गमन्तं शरणं वरेण्य-सदा गमं तेन सुखी भवेयम् ॥ ९

महायमानं जन भाव भास्व- न्महायमानं गतिदे नमस्ते ।
महायमानं हरतेऽत्र भावा- महायमानन्दपदाय कुर्वे ॥ १०

एवमीश ! मयका बहुभावा-देव सुन्दरगुणाम्बुसमुद्र ! ।
संस्तुतो जिन ! पदाम्बुजसेवा-
मेव मे वितनु विश्वमनस्य ! ॥ (स्वागता) ११

पू.आ.श्री चन्द्रप्रभसूरिविरचितम्

## ४५. ॥ श्रीअर्हदादिस्तवनम् ॥

मौनेनोर्वी व्यहृतपरितो वत्सराणां सहस्रं
यो निर्माणश्चरणयुगलं भव्यमालोपकारी ।
अर्हन्नुत्तारयतु हृदयात्स स्वकीयं कलानां
यो निर्माणश्चरणयुगलं भव्यमालोपकारी ॥ (मन्दाक्रान्ता) १

नमस्यत्पौलोमीपतिमुकुटरत्नांशुकवरं
नतानां दत्तश्रीधनयुवतिरत्नांशुकवरम् ।
त्रिलोकीजन्तूनामभिलषितसम्पादकमलं
जिनस्य श्रीशान्तेः स्तुतसरभसं पादकमलम् ॥(शिखरिणी) २

अपुनर्भवमार्गलम्भकक्रमकमलानलिनीप्रभापते: ।
शरणं समुपैमि नेमिनः क्रमकमलानलिनीतनुत्त्विषः ॥ ३
(वि.वृ.)

प्रभुपार्श्वजिनः कलिताऽपचयं विदधज्जगतः कलितापचयम् ।
फणिचक्रमणीरुचिरञ्जितखः प्रददातु सुखं रुचिरं जितखः ॥४
(तोटक)

अगणयन्तमुपप्लवमुच्चकै रहितसङ्गमकाऽमरनिर्मितम्
नमत वीरजिनं मुनिसत्तमं रहितसङ्गमकामरसं मुदा ॥ ५
(द्रु.वि.)

शिवरतो वरतोषवशान्नतो मघवताऽघवतामतिदूरगः ।
अमदनो मदनोदनकोविदः शममलं मम लम्भयताज्जिनः ॥६
(द्रु.वि.)

अविकलं विकलङ्कधियां सुखं विदधतं दधतं जगदीशिताम् ।
अकलहं कलहंसगतिं श्रये जिनवरं नवरङ्गतरङ्गितः ॥ ७
(द्रु.वि.)

वेल्लत्कल्याणवल्लीविपिनवनमुचः स्वर्गगङ्गातरङ्ग
च्छायादायादरोचिःपटलधवलिताखण्डदिङ्मण्डलस्य ।
नम्रामर्त्यालिमौलिप्रसृतपरिमलोद्गारमन्दारमाला–
भ्यर्च्यश्चन्द्रप्रभस्य प्रभवतु भवतां भूतये पादपद्मः ॥(शा.वि.)८

पू.आ.श्री कनकप्रभसूरिविरचितम्

## ४६. ॥ श्रीसाधारणजिनस्तवः ॥

(द्रुतविलम्बित)

जयति जङ्गमकल्पमहीरुहो जयति दुःखमहार्णवतारकः ।
जयति विश्वसनातनदीपको जयति भूतलशीतरुचिर्जिनः ॥ १

जयति कोपदवानलनीरदो जयति मानमहीरुहकुञ्जरः ।
जयति कूटकुडङ्गिहिमागमो जयति लोभमहोदधिमन्दरः ॥ २

विजयते जगदेकविलोचनो विजयते निरुपाधिकबान्धवः ।
विजयते भवरोगचिकित्सको विजयते शिवपत्तनपण्डितः ॥३

जयति मारविकारनिशाकर- प्रसरसंवरणैकदिवाकरः ।
जयति संसृतिकाननसम्भ्रम- भ्रमणखिन्नजनैकसुधासरः ॥ ४

भविकमानसहंसविलासभू- र्नयनचापलरोधमहौषधम् ।
सुभगतासुभगं करुणाक्षरं विजयते भुवनाधिपतेर्वपुः ॥ ५

अमरदानवमानवनायक- भ्रमरराजिविराजिपदाम्बुजः ।
जयति रत्नगणैरिव सागरः परिगतो विविधातिशयैः प्रभुः ॥६

विषयपङ्किलमोहजलोल्लसद्- बहुलरागतरङ्गभराकुले ।
विजयते विपुले भवपल्वले कमलमेकमहो जिनपुङ्गवः ॥ ७

शमनिधेः कट लोचनचारुता जिनपतेर्बपुरे मुखचन्द्रमाः ।
अहह धैर्यगुरोर्हृदयस्थली- भुवनभर्तुरहो भुजवैभवम् ॥ ८

देवोऽष्टादशदोषवर्जितवपुः सत्प्रातिहार्यश्रियं
बिभ्राणोऽष्टविधान् वहन्नतिशयांस्तांस्तांश्चतुस्त्रिंशतम् ।

पञ्चत्रिंशदुदारवागतिशयो नीलाब्जमुक्ता जया-
कालिन्दी कनकप्रभो विजयते विश्वाधिपः सर्वविद् ॥ ९
(शा.वि.)

पू.आ.श्री नरचन्द्रसूरिविरचितम्

## ४७. ॥ श्रीसर्वजिनस्तवः ॥

(मालिनी)

सरति सरति चेतः स्तोतुमेतन्मदीयं
महित महितवृन्दैरप्यदस्त्वच्चरित्रम् ।
परम ! परमबुद्धिस्फूर्तयो मादृशाः किं
विदुरविदुरधुर्यास्तात ? तत्ते स्वरूपम् ॥ १

तदपि तदपिधायाज्ञानमुज्जागरूका
मततमततमासौ भक्तिरेतां गिरं मे ।
खरशिखरिशिखाङ्के भूभृतः पादपाली
जलदजलदरिद्रे नैति नेतः ! प्ररोहम् ॥ २

हृदयहृदयमित्वा लोक्यते नाम कामं
विशदविशदतापक्लान्तचित्तैस्तथापि ।
तनुमतनुमहिम्नीं तावकां किन्तु हित्वा
विधुरविधुरभावं नैव नेतस्तनोति ॥ ३

भवविभवविलासास्ते जगन्नाथ ! न त्वा
मनवमनव जाग्रत्त्यागमुत्तापयन्ति ।
वनमवनमदम्भोवाहसंवाहितश्री-
महिममहिमभानोर्भानवः किं दहन्ति ? ॥ ४

सहम ! सहपरस्त्रीनेत्रपीयूषसत्रं
समव समवगाढः कोऽस्ति धन्यस्त्वदन्यः ।
सरसि सरसिजौघः सारसौरभ्यगेहं
मलिनमलिनमुच्चैर्वञ्चयेत् किं कदाचित् ? ॥ ५

यमनियमनिकेते किं त्वयि स्फूर्जमाने
मनसि मनसिजस्य स्फूर्त्तिरुत्कीर्तनीया ।
पतति पतति सर्पद्दर्पसर्पान्तकाले
विषमविषमहिम्नां कः प्रकाशो जिनेश ! ॥ ६

हरसि हरसिताभिः सूत्रितज्ञानलक्ष्म्या
नयन ! नयनभाभिस्त्रातरज्ञानपङ्कम् ।
तमसि तमसितिम्ना लोकमाक्रान्तमिन्दुः
करनिकरनिपातैः किं न शुभ्रीकरोति ? ॥ ७

नवरनवरवासौ कस्य दोषान्धकारे
दनवदनवलक्षा देशनोर्वी मुदे स्यात् ।
विधुतविधुतनुत्वा शारदी पौर्णमासी
वनपवनपरीता मोदयत्येव देव ! ॥ ८

नयविनयविवेका (या) स्त्वद्वचःपावितानां
न मदनमदमोहैर्म्लानिमायान्ति नेतः ! ।
तिरयतिरयमुच्चैर्लोचनालोकलक्ष्म्या
रविकरविकलानामन्धकारप्रचारः ॥ ९

भवति भवतितीर्षुर्नाथ ! नाभव्यजन्तु-
र्बत तततवाचाऽप्यत्र कस्तेऽपराधः ? ।

धुरि मधुरिमभाजां नूत्नचूताङ्कुरास्ते
कमपि कमपि वाणीसौरभं लम्भयन्ति ॥ १०

सममसममहोभिस्त्वद्गुणैः सिद्धिवध्वा
सनरस 'नरचन्द्रः' क्वास्ति वाचां विलासः ।
दिशमदिशमरुद्धश्रद्धया किञ्चिदेना-
मल ममलमतिभ्यस्तर्कयित्वा तथापि ॥ ११

पू.आ.श्री रत्नाकरसूरिविरचिता

## ४८. ॥ श्रीरत्नाकरपञ्चविंशतिका ॥

श्रेयः श्रियां मङ्गलकेलिसद्म ! नरेन्द्रदेवेन्द्रनताङ्घ्रिपद्म ! ।
सर्वज्ञ ! सर्वातिशयप्रधान ! चिरं जय ज्ञानकलानिधान ! ॥ १

जगत्त्रयाधार ! कृपावतार ! दुर्वारसंसारविकारवैद्य ! ।
श्रीवीतराग ! त्वयि मुग्धभावाद्
विज्ञ ! प्रभो ! विज्ञपयामि किञ्चित् ॥ २

किं बाललीलाकलितो न बालः,
पित्रोः पुरो जल्पति निर्विकल्पः ।
तथा यथार्थं कथयामि नाथ ! निजाशयं सानुशयस्तवाग्रे ॥ ३

दत्तं न दानं परिशीलितं च न शालि शीलं न तपोऽभितप्तम् ।
शुभो न भावोऽप्यभवद्भवेऽस्मिन्
विभो ! मया भ्रान्तमहो मुधैव ॥ ४

दग्धोऽग्निना क्रोधमयेन दष्टो, दुष्टेन लोभाख्यमहोरगेण ।
ग्रस्तोऽभिमानाजगरेण माया-
जालेन बद्धोऽस्मि कथं भजे त्वाम् ? ॥ ५

कृतं मयाऽमुत्र हितं न चेह-
लोकेऽपि लोकेश ! सुखं न मेऽभूत् ।
अस्मादृशां केवलमेव जन्म, जिनेश ! जज्ञे भवपूरणाय ॥ ६

मन्ये मनो यन्न मनोज्ञवृत्तं(त्त !), त्वदास्यपीयूषमयूखलाभात् ।
द्रुतं महानन्दरसं कठोरमस्मादृशां देव ! तदश्मतोऽपि ॥ ७

त्वत्तः सुदुःप्राप्यमिदं मयाप्तं रत्नत्रयं भूरिभवभ्रमेण ।
प्रमादनिद्रावशतो गतं तत्, कस्याग्रतो नायक ! पूत्करोमि ॥८

वैराग्यरङ्गोऽपरवञ्चनाय, धर्मोपदेशो जनरञ्जनाय ।
वादाय विद्याऽध्ययनं च मेऽभूत्,
कियद् ब्रुवे हास्यकरं स्वमीश ! ॥ ९

परापवादेन मुखं सदोषम्, नेत्रं परस्त्रीजनवीक्षणेन ।
चेतः पराऽपायविचिन्तनेन
कृतं भविष्यामि कथं ? विभोऽहम् ॥ १०

विडम्बितं यत्स्मरघस्मरार्तिदशावशात्स्वं विषयान्धलेन ।
प्रकाशितं तद्भवतो ह्रियैव, सर्वज्ञ ! सर्वं स्वयमेव वेत्सि ॥११

ध्वस्तोऽन्यमन्त्रैः परमेष्ठिमन्त्रः, कुशास्त्रवाक्यैर्निहतागमोक्तिः ।
कर्तुं वृथा कर्म कुदेवसङ्गा-
दवाञ्छि ही (हे)नाथ ! मतिभ्रमो मे ॥ १२

विमुच्य दृग्लक्ष्यगतं भवन्तं,
ध्याता मया मूढधिया हृदन्तः ।
कटाक्षवक्षोजगभीरनाभि-
कटीतटीयाः सुदृशां विलासाः ॥ १३

लोलेक्षणावक्त्रनिरीक्षणेन,
यो मानसे रागलवो विलग्नः ।
न शुद्धसिद्धान्तपयोधिमध्ये,
धौतोऽप्यगात्तारक ! कारणं किम् ॥ १४

अङ्गं न चङ्गं न गणो गुणानां,
न निर्मलः कोऽपि कलाविलासः ।
स्फुरत्प्रभा न प्रभुता च कापि,
तथाप्यऽहङ्कारकदर्थितोऽहम् ॥ १५

आयुर्गलत्याशु न पापबुद्धिर्गतं वयो नो विषयाभिलाषः ।
यत्नश्च भैषज्यविधौ न धर्मे,
स्वामिन् ! महामोहविडम्बना मे ॥ १६

नात्मा न पुण्यं न भवो न पापं, मया विटानां कटुगीरपीयम् ।
अधारि कर्णे त्वयि केवलार्के,
पुरः(परि)स्फुटे सत्यपि देव ! धिङ् माम् ॥ १७

न देवपूजा न च पात्रपूजा, न श्राद्धधर्मश्च न साधुधर्मः ।
लब्ध्वापि मानुष्यमिदं समस्तं,
कृतं मयाऽरण्यविलापतुल्यम् ॥ १८

चक्रे मयाऽसत्स्वपि कामधेनुकल्पद्रुचिन्तामणिषु स्पृहार्त्तिः ।
न जैनधर्मे स्फुटशर्मदेऽपि,
जिनेश ! मे पश्य विमूढभावम् ॥ १९

सद्भोगलीला न च रोगकीला, धनागमो नो निधनागमश्च ।
दारा न कारा नरकस्य चित्ते,
व्यचिन्ति नित्यं मयकाऽधमेन ॥ २०

स्थितं न साधोर्हृदि साधुवृत्तात्, परोपकारान्न यशोऽर्ज्जितं च ।
कृतं न तीर्थोद्धरणादि कृत्यं,
मया मुधा हारितमेव जन्म ॥ २१

वैराग्यरङ्गो न गुरूदितेषु, न दुर्जनानां वचनेषु शान्तिः ।
नाऽध्यात्मलेशो मम कोऽपि देव !,
तार्यः कथङ्कारमयं भवाब्धिः ॥ २२

पूर्वे भवेऽकारि मया न पुण्यमागामिजन्मन्यपि नो करिष्ये ।
यदीदृशोऽहं मम तेन नष्टा भूतोद्भवद्भाविभवत्रयीश ! ॥ २३

किं वा मुधाऽहं बहुधा सुधाभुक्-पूज्य ! त्वदग्रे चरितं स्वकीयम्।
जल्पामि यस्मात् त्रिजगत्स्वरूपनिरूपकस्त्वं कियदेतदत्र ? ॥२४

दीनोद्धारधुरन्धरस्त्वदपरो नास्ते मदन्यः कृपा-
पात्रं नात्र जने जिनेश्वर ! तथाऽप्येतां न याचे श्रियम् ।
किन्त्वर्हन्निदमेव केवलमहो सद्बोधिरत्नं शिवं,
श्रीरत्नाकर ! मङ्गलैकनिलय ! श्रेयस्करं प्रार्थये ॥ २५

पू.आ.श्री प्रभाचन्द्रसूरिविरचित-
प्रभावकचरित्रग्रन्थप्रारम्भे

## ४९. ॥ श्रीजिनस्तवना ॥

(अनुष्टुप्)

अर्हत्तत्वं स्तुमो विश्वशासनोन्नतिकारकम् ।
यत्प्रसादेन पूर्वेऽपि महोदयपदं ययुः ॥ १

श्रीसर्वमङ्गलोल्लासी वृषकेतुरनङ्गभित् ।
शम्भुर्गणपतिस्तीर्थनाथ आद्यः पुनातु वः ॥ २

हरिणाङ्को न-भोग श्रीर्जनतापापहारकः ।
महाबलः प्रभुः शान्तिः पातु चित्रं ध्रुवस्थितिः ॥ ३

दशावतारो वः पायात् कमनीयाञ्जनद्युतिः ।
किं श्रीपतिः प्रदीपः किं न तु श्रीपार्श्वतीर्थकृत् ॥ ४

यद् गोव्रजश्चरन् भव्यगोचरे पात्रपूरकः ।
श्रेयःपीयूषतः पातु वर्द्धमानः स गोपतिः ॥ ५

पू.आ. श्री विजयप्रभसूरिविरचितम्

## ५०. ॥ श्रीदेवपत्तननिवासि-जिनस्तवनम् ॥

(तोटक)

नतनाकिनिकायनरप्रमदं प्रमदप्रकरप्रसरन्महिमम् ।
महिमण्डलमण्डनमात्महितं महितं जगता महताऽसुमता ॥ १

सुमतिप्रदमुत्कटमोहमहातमहानिकृते तरणेः किरणम् ।
किरणं जनवाञ्छितदेवमणेर्मनसा श्रमणैर्विहितस्मरणम् ॥ २

स्मरणप्रवणं स्मरशूलभृतोऽभृत विश्वमसङ्ख्ययशःप्रसरैः ।
प्रसरत्कलिकालसुकल्पतरुं तरुणीजनगीतगुणं भविनाम् ॥ ३

भवनाशकरं करुणानिलयं लयलीनमनोभवकायरुचम् ।
रुचिराननतर्जितचन्द्रमसमसमञ्जसजन्ममनोज्ञकरम् ॥ ४

करणद्विपमारणहस्तिरिपुं रिपुमित्रसमेक्षणमिष्टपरम् ।
परमार्हतपूजितपत्कमलं मलवर्जितकीर्त्तितरङ्गभरम् ॥ ५

भरणीपतिनिर्भयशर्मददं मददन्तिविभेदनकेशरिणम् ।
रणमुक्तममुं नुतपारगतं गतमत्सरमात्मनि भव्यजनाः ! ॥ ६

इत्थं श्रीविजयप्रभसूरीश्वरसिद्धिदो जिनो जीयात् ।
देवकपत्तनवासी स्तुतो मया सुधनवृद्धिकरः ॥ ७

पू.आ.श्री धर्मसूरिविरचितम्

## ५१. ॥ मङ्गलस्तोत्रम् ॥

(शार्दुलविक्रीडित)

नित्ये श्रीभुवनाधिवासिभवनव्राते मणिद्योतिते
कोट्यः सप्त जिनौकसां द्विकयुता लक्षास्तथा सप्ततिः ।
प्रत्येकं भवनादिषु प्रतिसभं स्तूपत्रयं शाश्वतं
तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ १

रम्ये व्यन्तरसत्कभौमनगरव्यूहे सुरत्नोज्ज्वले
श्रीसिद्धायतनानि सन्ति गणनातीतानि चैत्यानि च ।
तेभ्यः सङ्ख्यगुणानि चैत्यभवनान्यन्तः सदा ज्योतिषां
तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ २

सौधर्मादिविमानराजिषु तथा ग्रैवेयकाण्युत्तर-
स्वर्गेष्वस्ति सहस्रसप्तनवतिः शुद्धास्त्रयोविंशतिः ।
चैत्यानामभितश्चतुर्भिरधिकाशीतिश्च लक्षाः सदा
तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ ३

वैताढ्येषु शतं च सप्ततियुतं नित्यं तथा विंशति-
श्चैत्यानां गजदन्तकेषु नवतिः कुर्वङ्घ्रिपेषु स्थिताः ।
त्रिंशद्वर्षधरेषु मेरुषु तथाशीतिश्च पञ्चाधिका-
स्तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ ४

प्रत्येकं रुचकेषु मानुषनगे चत्वारि सत्कुण्डले
चत्वार्यायतनानि सन्ति सततं सर्वेषुकाराद्रिषु ।

वक्षस्कारगिरिष्वशीतिरनघा नन्दीश्वरे विंशति-
स्तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ ५

वैताढ्ये रथनूपुरादिनगरस्तोमे विदेहेष्वपि
क्षेमादिर्नगरव्रजोऽस्ति भरतेऽयोध्या तथैरावते ।
सौर्यं कुण्डपुरं तथा गजपुरी चम्पा च वाणारसी
तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ ६

अस्त्यानन्दपुरं फलर्द्धिनगरी श्रीसत्यनाम्ना पुरं
नासिक्यं भृगुकच्छमङ्गलपुरं सोपारकं विश्रुतम् ।
मोढेरं मथुराणहिल्लनगरं श्रीस्तम्भनं पावनं
तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ ७

ख्यातोऽष्टापदपर्वतो गजपदः सम्मेतशैलाभिधो
वैभारः कनकाचलोऽर्बुदगिरिः श्रीचित्रकूटादिकः ।
श्रीमान् रैवतकः प्रसिद्धमहिमा शत्रुञ्जयो मण्डप-
स्तत्र श्रीऋषभादयो जिनवराः कुर्वन्तु वो मङ्गलम् ॥ ८

देवाः श्रीऋषभाजितप्रभृतयः श्रीपुण्डरीकादयः
श्रीमन्तो भरतेश्वरप्रभृतयः श्रीबाहुबल्यादयः ।
श्रीमद्रामयुधिष्ठिरप्रभृतयः प्रद्युम्नशाम्बादयः
श्रीमद्गौतममुख्यसाधुयतयः कुर्वन्तु वो मङ्गलम् ॥ ९

यस्मात्तीर्थमिदं प्रवृत्तिमगमत् श्रीमत्सुधर्मो गुरु-
र्धन्यो धन्यमुनिः सुकोशलमुनिः श्रीशालिभद्राभिधः ।
मेतार्योऽथ दृढप्रहारिसुयतिर्मेघो दशार्णाभिधः
श्रीश्रीमत्करकण्डुमुख्ययतयः कुर्वन्तु वो मङ्गलम् ॥ १०

श्रीजम्बूः प्रभवप्रभुर्गतभवः शय्यम्भवः श्रीयशो-
भद्राख्यः श्रुतकेवली च चरमः श्रीभद्रबाहुर्गुरुः ।
शीलस्वर्णकषोपलः सुविमलः श्रीस्थूलिभद्रः प्रभुः
सर्वेऽप्यार्यमहागिरिप्रभृतयः कुर्वन्तु वो मङ्गलम् ॥ ११

श्यामाचार्यसमुद्रमङ्गसहिताः श्रीभद्रगुप्तादयः
श्रीमान् सिंहगिरिस्तथा धनगिरिः स्वामी च वज्राभिधः ।
श्रीवीरो मुनिरार्यरक्षितगुरुः पुष्यो गुरुः स्कन्दिलः
श्रीदेवर्द्धिपुरस्सराः श्रुतधराः कुर्वन्तु वो मङ्गलम् ॥ १२

ब्राह्मी चन्दनबालिका भगवती राजीमती द्रौपदी
कौशल्या च मृगावती च सुलसा सीता सुभद्रा शिवा ।
कुन्ती शीलवती नलस्य दयिता चूला प्रभावत्यपि
पद्मावत्यपि सुन्दरी दिनमुखे कुर्वन्तु वो मङ्गलम् ॥ १३

तीतानागतवर्त्तमानविषयाः सर्वेऽपि तीर्थङ्कराः
सिद्धाः सूरिवराश्च वाचकवराः सर्वेऽपि सत्साधवः ।
धर्मः श्रीजिनपुङ्गवैर्निगदितो ज्ञानादिरत्नत्रयं
श्रीमन्तो जिनसिद्धसाध्वतिशयाः कुर्वन्तु वो मङ्गलम् ॥ १४

शाश्वताशाश्वतान्येवं चैत्यानि पुरुषोत्तमाः ।
भव्येभ्यो मङ्गलं दद्युः स्तुताः श्रीधर्मसूरिभिः ॥(अनुष्टुप्) १५

वायटगच्छीयश्री अमरचन्द्रसूरिविरचितम्

पञ्चवर्गपरिहारमयम्

## ५२. ॥ श्रीसाधारणजिनस्तवनम् ॥

(पद्मानन्दमहाकाव्यमध्यगतम्)

(अनुष्टुप्)

संसारसारं शैवश्रीसरसीसरसीरुहम् ।
ऋषीश्वरं वृषावासं श्रेयसां संश्रयं श्रये ॥ १

सुरावासश्रिया स्वैरं स सर्वसहया सह ।
आशा यशःशशी यस्य सहासाः सहसाश्रयत् ॥ (युग्मम्) २

वृषेशं रोषविषयवैरिशोषरसैर्वरम् ।
उषाहःसायवेलासु सेवेयाऽहं लवे लवे ॥ ३

श्रेयःश्रीवल्लिवलयशाल ! शीलालयाशय ! ।
उर्वीशेखरसेव्योऽसि रसावासववासवैः ॥ ४

रसाशीर्विषविश्वस्वर्विहायस्सु शिवाश्रय !
अवार्यवीर्यसूर्योऽसि वसुराशिविलाससूः ॥ ५

संसारवैरिवैरस्यावसायहर ! संहर !
अहोऽरिवारं विश्वस्य श्रेयःश्रीशर्वरीश्वरः ॥ ६

अशरीरारिसंहारहर्षसंहर्षसाहस ! ।
विश्वविश्वेश ! विश्वीयसर्वांहो विरसं हर ॥ ७

पञ्चवर्गरहितामिमां स्तुतिं पिष्टपञ्चविषयाः पठन्ति ये ।
पञ्च पञ्चिन्महाव्रता ध्रुवं पञ्चमीं गतिमवाप्नुवन्ति ते ॥ ८

(रथोद्धता)

पू.आ.श्री पार्श्वचन्द्रसूरिविरचितम्

## ५३. ॥ श्रीसाधारणजिनस्तवनम् ॥

(स्वागता)

प्रातिहार्यकलितासनशोभं त्वां स्तुवे जिनपते ! जितलोभम् ।
वीतराग ! विगतान्तररोगं सूपदिष्टशिवकारणयोगम् ॥ १

योजनक्षितिषु विस्तृतशाखो भात्यशोकतरुरेष तवेश !
उल्लसत्परिमलः परितोऽयं पञ्चवर्णकुसुमप्रकरश्च ॥ २

सर्वजन्तुसुगमा जिन ! पञ्चत्रिंशदद्भुतगुणा तव वाणी ।
इन्दुकुन्दविमला चमराली शोभते तव शुभोभयतश्च ॥ ३

विष्टपत्रयगरिष्ठ ! वरिष्ठं सिंहविष्टरमधिष्ठितवांस्त्वम् ।
द्वादशार्कतुलितामलभासं भाति मण्डलमिदं तव पृष्ठे ॥ ४

दुन्दुभिर्दिवि परस्तव दिव्यो दन्ध्वनीति मधुरोद्धुरघोषः ।
आतपत्रविततत्रितयं तु शोभते शिरसि ते जगदीश ! ॥ ५

इत्यभिष्टुतगुणः शमसिन्धो ! वीतराग ! भुवनत्रयबन्धो ! ।
वासवार्चित ! वशीकृतमुक्तिं देहि मे निजपदाव्ययभक्तिम् ॥६

पू.आ.श्री जयचन्द्रसूरिविरचिता

## ५४. ॥ श्रीजिनेश्वरदण्डकस्तुतिः ॥

(दण्डक)

रचितरुचिरचन्द्रनागेन्द्रलेखेन्द्रमर्त्येन्द्रसद्भक्तिसंसक्त-
नम्रीभवन्मौलिनीलेन्द्रसञ्जात-रोचिश्चयालिस्रजासङ्कुलं
निर्म्मलं यस्य ते भक्तसत्प्राणिसम्मोदकिञ्जल्कसारं पदाब्जं

भवासारसन्तापतापापहं तं स्तुवेऽहं सदा श्रीजिनं शोभनं
विमलसलिलहारमन्दारकुन्देन्दुपुष्पोपहारालसत्-
कौमुदीसारविस्तारकर्पूरपूरामलस्फाररूप्याद्रिडिण्डीरविस्फूर्त्ति
सङ्काशकीर्त्यमृतापारकाष्टान्तकल्लोलमालाविराजिष्णुसिन्धुं
समासाद्य भव्या महानन्दभाजो भवन्ति द्रुतं
सकलविमलसुन्दराकारसच्चक्रवर्त्तीशविद्याधरस्फारनागामरा-
हारकादिप्रजामोहनागाररूपस्वरूपैर-
नन्तत्त्वगोदेशलेशोपिरूपस्य
लोकोदरोदारसन्निर्म्मलस्फाररागाद्यलेशाणुपुञ्जोपजातस्य
दृष्टेऽपि नो निर्झरं शङ्करं,
सबलमदनकंसकालादिब्रह्मामराधीशमार्त्तण्डसच्चण्डपाएमातुराद्यर्च्य-
चित्तोन्नतिध्वंसविश्वैकमल्लत्वविख्यातितामानमातङ्गनिद्र्धाटने
ते वराशापराः सज्जनास्त्वत्प्रभावाच्च सारङ्गनाथाधिका यस्य
भान्तीह वै नाभिराजाङ्गजं सज्जयम् ॥ १

प्रगटविकटसङ्कटालिप्रदानक्षमानेकदुर्व्वादिनैयायिका-
सारसाङ्ख्याक्षमालापवाचालनैयायिकामर्त्यवश्यत्व
वैशेषिका शेषदोषाश्रया
तारचार्व्वाकसङ्कल्पनामात्रसम्भूतिताजैमनीया-
दिदुर्व्वोधिसध्वान्तविध्वंसमार्त्तण्डकल्पं सदा,
प्रशमरसजलक्षालितानेकसंसारकान्तारमार्गभ्रमाने -
कनीचोच्चवैषम्यदुःस्थानसंस्थानसञ्चारदुर्ध्यानतावायुवेगाङ्ग-
संलग्नदुःपापमालं दयोदारसुध्यानताभीष्टसङ्कल्पसंसाधनातो
मुदा सिद्धतासङ्गतं,विमलसकलसौम्यनेत्रोत्सवासेल्लसद्वक्र-

सच्चन्द्रसम्भूतवाणीसुपीयूष
सम्यग्विषासारकामाङ्गभोगाङ्गतृष्णादिसन्तापसन्ता-
पितानेकभव्यव्रजातापदु:स्वस्थतानाशकं
भीमसंसारिदुर्वारमोहादिभावारिसञ्चारनिर्व्वारकं,
विशदमनुजभोगसंयोगसद्यागलक्ष्मी
सुखारोग्यसौभाग्यसुश्लोकसौराज्यसन्तान-
विश्वम्भराभोगसंयोगिदुर्धृक्षतोदारतास्फारतारूपस्वर्लोक-
दिव्यप्रभाभासुराङ्गादिदिव्यानुभावैकसत्सौख्यसिद्धयादिदानक्षमं
चाजितं स्तौम्यहं श्रीयुतम् ॥ २

भजत भजत नेमिनाथं सदा निर्विकारं प्रिया येन मुक्ता परं
सा च राजीमती सुन्दरी निर्भ्भरं नूनमेवं च यस्याः सुरूपं
मुखं पूर्णबिम्बस्य चन्द्रस्य धत्ते श्रियं दन्तपङ्क्तिश्च
कुन्दप्रसूनावले दर्प्पखड्गस्य धम्मिल्लसद्वल्लरी
कज्जलश्यामला, नयनयुगलकं
मिलद्भृङ्गभोग्योदरश्यामलश्वेतपङ्कोद्भवस्याधरःपल्लवस्पर्द्धी
माञ्जिष्टतासङ्गतो नासिका कीरचञ्चूपमा बाहुयुग्मं कजाभं
सौवर्णकुभोपमं सत्कुचद्वन्द्वमाभाति यस्याः सदास्तित्व-
नास्तित्वशङ्कास्पदं तुदमानन्ददं अतिविपुलनितम्बदेशः स्फुटं
शोभते मण्डलाकारविस्तारचक्रातिगः सक्थि
रम्भामृदुस्तम्भसाम्यं क्रमद्वन्द्वमद्वन्द्वमुच्चैस्तुलां याति
रक्तोत्पलस्यामलस्यानु यस्याश्च वाणी
सुधासारधारातिमाधुर्य्यसम्भेदिनी

क्षीररत्नाकरालोलरङ्गत्तरङ्गानुगा सत्कटाक्षावली,
मदकलकलहंसलीलागतिर्याति
विस्मेरशुक्लाम्बुजाभस्मितागण्यलावण्यपुञ्जाङ्किता
रामलाष्टापदालेपसंशोभिताङ्गा न वक्तुं क्षमं शील-
मिन्दुप्रकाशातिरेकं नवप्रेमरम्या मनोवृत्तिरस्याः
किमन्यत्पुराणैर्ज्जनैर्नाकिरामाधिकं वर्णिता ॥ ३

असितनलिनकज्जलश्यामलाङ्गाश्वसेने ! वचोतीतमहात्म्य-
यस्यानुभावात्तवेह स्फुटं देहिनः
काशशूलज्वरातङ्कविस्फोटकोद्भेदवातप्ररोधेन्दुलुसक्षतश्ली-
पदार्शप्रथाराजयक्ष्मादिरोगव्रजा दृष्टदेहा भवन्ति ध्रुवं,
गहनतर-कानने भीषणे शैलसङ्केति दुर्गे च मार्गे रणे
दूरदेशाङ्गणे भीमवारान्निधौ दुस्तटीसन्निधौ शत्रुवर्गे वटे
संकटे विस्तरद्धेतिदुर्दृश्यदावानलेन्येषु वैषम्ययुक्तेष्वयुक्तेषु
कल्याणमालावृता निर्वृता ।
विषमविषधरापदाव्यालशार्दूलहर्यक्षकोलोत्पतद्भूत-
वेतालनागग्रहोत्पातयक्षामरोद्दण्डाचण्डाधिवीरामरी-
शाकिनीडाकिनीमारिदृष्टातिभीव्यन्तरक्षोभमुख्या अनेके न
बाधां विधातुं समर्थाः सदोपद्रवाभिद्रवा
विशदविमलसिद्धिभाजो यदीयप्रसादाज्जनाः
सद्यशोभीष्टसङ्कल्पनाशामरक्ष्मारुहाधारदीनप्रजानामहं
दीनभूतस्त्वदुद्भूतपादाम्बुजसंश्रितस्तन्महाशोकरो-
गाद्यनेकाकुलाद्रक्ष मां कष्टतः पार्श्वनाथ ! प्रभो ! ॥ ४

परममममलमुत्तरं मोहमं मेरुमेसङ्कितं मारमानेभकामेषु वक्रं
महानन्दचूडामणिमुक्तिमार्गैकमार्त्तण्डकल्पं मदादिप्रमादाङ्कुरे
मत्तमातङ्गमाभावरं मङ्गलोन्मीलनं मौनसारं मुनिं भद्रभूतं
प्रमामाश्रयं सन्मतं सन्मतं, प्रशमरसविशालं, सदाभासमानं
समानं विमानं निरीशं महेशं विहासं नरुद्रं कदा सत्करं
निस्तुलं कोमलं निर्म्मलं कर्ममुक्तं विमुक्तिं गतं सद्गतिं
निर्गतिं नीरसं सद्रसं साक्षरं वर्णनातीतमावर्णितं सज्जनैश्चाप्य
वर्ण्यं मतं, कनकनिकषदेहभं पुण्डरीकोज्वलं निर्म्मलं
लोकसुस्वामिनं निर्ज्जरं निर्ज्जरोपासितं शत्रु-मित्रेषु न
द्वेषरागाङ्कितं भक्तसौख्यप्रदं चेतरासङ्गनिर्व्वारकं निश्चलं
नैकदेशे स्थितं सङ्कलाङ्काधिशून्यं कलङ्कालयं निःशरण्यं
शरण्यं सतां, अकलसकलसच्चरित्रं पवित्रं विपत्त्रं विशिष्टं
गरिष्ठं महेष्टं नदीनं नहीनं भवीनं महान्तं सुकान्तं सुशान्तं
महामुत्पुरितं नितान्तं भजे वर्द्धमानं जिनं दीप्तिवीनं नवीनं
समासन्नतीर्थाधिपं सकृपं प्राणिपं पुण्यपुष्पर्द्धिसत्पादपम् ॥ ५

श्रीराजचन्द्रसूरीन्द्रपादाम्बुजनिवासिना:,
जयचन्द्रेण कृतं हृत्स्थं, चापल्यं प्रकटं मया ॥ ६

पू. श्री सिद्धर्षिगणिविरचित-
उपमितिभवप्रपञ्चाकथान्तर्गतम्

## ५५. ॥ श्रीपरमात्म-स्तवनम् ॥

(अनुष्टुप्)

नमस्ते जगदानन्द !, मोक्षमार्गविधायक ! ।
जिनेन्द्र विदिताशेषभाव ! सद्भावनायक ! ॥ १

प्रलीनाशेषसंसारविस्तार ! परमेश्वर ! ।
नमस्ते वाक्पथातीत !, त्रिलोकनरशेखर ! ॥ २

भवाब्धिपतितानन्तसत्त्वसङ्घाततारक ! ।
घोरसंसारकान्तारसार्थवाह ! नमोऽस्तु ते ॥ ३

अनन्तपरमानन्दपूर्णधामव्यवस्थितम् ।
भवन्तं भक्तितः साक्षात्पश्यतीह जनो जिन ! ॥ ४

स्तुवतस्तावकं बिम्बमन्यथा कथमीदृशः ।
प्रमोदातिशयश्चित्ते जायते भुवनातिगः ॥ ५

पापाणुजनितस्तावत्, तापः संसारिचेतसाम् ।
यावत्तेषां सदानन्द !, न मध्ये नाथ ! वर्तसे ॥ ६

येषां पुनर्विधत्ते सा, नाथ ! चित्तेषु देहिनाम् ।
पापाणवः क्षणात्तेषां, ध्वंसमायान्ति सर्वथा ॥ ७

ततस्ते द्राविताशेषपापपङ्क्तया जनाः ।
सद्भावामृतसंसिक्ता, मोदन्ते नाथ सर्वदा ॥ ८

ते वराका न मुष्यन्तां, रागादिचरटैः कथम् ।
येषां नाथ ! भवान्नस्ति, तप्तिसानाथ्यकारकः ॥ ९

भवन्तमुररीकृत्य, नाथं निःशङ्कमानसाः ।
शिवं यान्ति मदादीनां, विधाय गलपादिकाम् ॥ १०

न्यपतिष्यदिदं नाथ !, जगन्नरककूपके ।
अहिंसाहस्तदानेन यदि त्वं नाधरिष्यथाः ॥ ११

विलीनसकलक्लेशं निर्विकारं मनोहरम् ।
शरीरं पश्यतां नाथ ! तावकीनमदो वरम् ॥ १२

अनन्तवीर्यः सर्वज्ञो, वीतरागस्त्वमञ्जसा ।
न भासि यदभव्यानां तत्तेषां पापजृम्भितम् ॥ १३

रागद्वेषमहामोहसूचकैर्वीतकल्मष ! ।
हास्यहेतिविलासाक्षमालाद्यैर्हीन ! ते नमः ॥ १४

अनन्तगुणसम्पूर्ण ! कियद्वात्र वदिष्यति ।
तावकस्तवने नाथ ! जडबुद्धिरयं जनः ॥ १५

तथापि गाढसद्भावबद्धोऽत्यर्थमयं जनः ।
सद्भावोऽप्यथवा नाथ ! भवतैवावबुध्यते ॥ १६

तदस्य करुणां कृत्वा विधातव्या भवे भवे ।
भवोच्छेदकरी नाथ ! भक्तिरात्मनि निश्चला ॥ १७

पू. श्री सिद्धर्षिगणिविरचित-
उपमितिभवप्रपञ्चा-कथान्तर्गत-विमलकृतम्

## ५६. ॥ श्रीजिनस्तवनम् ॥

(अनुष्टुप्)

अपारघोरसंसार-निमग्नजनतारक ! ।
किमेष घोरसंसारे, नाथ ! ते विस्मृतो जनः ? ॥ १

सद्भावप्रतिपन्नस्य, तारणे लोकबान्धव ! ।
त्वयाऽस्य भुवनानन्द !, येनाद्यापि विलम्ब्यते ? ॥ २

आपन्नशरणे दीने, करुणाऽमृतसागर ! ।
न युक्तमीदृशं कर्तुं, जने नाथ ! भवादृशाम् ॥ ३

भीमेऽहं भवकान्तारे, मृगशावकसन्निभः ।
विमुक्तो भवता नाथ !, किमेकाकी दयालुना ? ॥ ४

इतश्चेतश्च निक्षिप्त-चक्षुस्तरलतारकः ।
निरालम्बो भयेनैव, विनश्येऽहं त्वया विना ॥ ५

अनन्तवीर्यसम्भार !, जगदालम्बदायक ! ।
विधेहि निर्भयं नाथ !, मामुत्तार्य भवाटवीम् ॥ ६

न भास्कारादृते नाथ !, कमलाकरबोधनम् ।
यथा तथा जगन्नेत्र !, त्वदृते नास्ति निर्वृत्तिः ॥ ७

किमेष कर्मणां दोषः ?, किं ममैव दुरात्मनः ? ।
किं वाऽस्य हतकालस्य ?, किं वा मे नास्ति भव्यता ? ॥ ८

किं वा सद्भक्तिनिर्ग्राह्य !, सद्भक्तिस्त्वयि तादृशी ।
निश्चलाऽद्यापि सम्पन्ना, न मे भुवनभूषण ! ॥ ९

लीलादलितनिःशेष-कर्मजाल ! कृपापर ! ।
मुक्तिमर्थयते नाथ !, येनाद्यापि न दीयते ! ॥ १०

स्फुटं च जगदालम्ब !, नाथेदं ते निवेद्यते ।
नास्तीह शरणं लोके, भगवन्तं विमुच्य मे ॥ ११

त्वं माता त्वं पिता बन्धु-स्त्वं स्वामी त्वं च मे गुरुः ।
त्वमेव जगदानन्द !, जीवितं जीवितेश्वर ! ॥ १२

त्वयाऽवधीरितो नाथ !, मीनवज्जलवर्जिते ।
निराशो दैन्यमालम्ब्य, म्रियेऽहं जगतीतले ॥ १३

स्वसंवेदनसिद्धं मे, निश्चलं त्वयि मानसम् ।
साक्षाद्भूतान्यभावस्य, यद्वा किं ते निवेद्यताम् ? ॥ १४

मच्चित्तं पद्मवन्नाथ !, दृष्टे भुवनभास्करे ।
त्वयीह विकसत्येव, विदलत्कर्मकोशकम् ॥ १५

अनन्तजन्तुसन्तान,-व्यापाराक्षणिकस्य ते ।
ममोपरि जगन्नाथ !, न जाने कीदृशी दया ! ॥ १६

समुन्नते जगन्नाथ !, त्वयि सद्धर्मनीरदे ।
नृत्यत्येष मयूराभो, मद्दोर्दण्डशिखण्डिकः ॥ १७

तदस्य किमियं भक्तिः ?, किमुन्मादोऽयमीदृशः ? ।
दीयतां वचनं नाथ !, कृपया मे निवेद्यताम् ॥ १८

मञ्जरीराजिते नाथ !, सच्चूते कलकोकिलः ।
यथा दृष्टे भवत्येव लसत्कलकलाकुलः ॥ १९

तथैष सरसानन्द-बिन्दुसन्दोहदायक ! ।
त्वयि दृष्टे भवत्येव, मूर्खोऽपि मुखरो जनः ॥ (युग्मम्) २०

तदेनं माऽवमन्येथा, नाथासम्बद्धभाषिणम् ।
मत्वा जनं जगज्ज्येष्ठ !, सन्तो हि नतवत्सलाः ॥ २१

किं बालोऽलीकवाचाल, आलजालं लपन्नपि ।
न जायते जगन्नाथ !, पितुरानन्दवर्धनः ? ॥ २२

तथाऽश्लीलाक्षरोल्लाप-जल्पकोऽयं जनस्तव ।
किं विवर्धयते नाथ !, तोषं किं नेति कथ्यताम् ! ॥ २३

अनाद्यभ्यासयोगेन, विषयाशुचिकर्दमे ।
गर्ते सूकरसङ्काशं, याति मे चटुलं मनः ॥ २४

न चाहं नाथ ! शक्नोमि, तन्निवारयितुं चलम् ।
अतः प्रसीद तद्देव ! देव !, वारय वारय ॥ २५

किं ममापि विकल्पोऽस्ति, नाथ ! तावकशासने ।
येनैवं लपतोऽधीश !, नोत्तरं मम दीयते ? ॥ २६

आरूढमीयतीं कोटीं, तव किङ्करतां गतम् ।
मामप्येतेऽनुधावन्ति, किमद्यापि परीषहाः ? ॥ २७

किं चामी प्रणताशेष- जनवीर्यविधायक ! ।
उपसर्गा ममाद्यापि, पृष्ठं मुञ्चन्ति नो खलाः ? ॥ २८

पश्यन्नपि जगत्सर्वं, नाथ ! मां पुरतः स्थितम् ।
कषायारातिवर्गेण, किं न पश्यसि पीडितम् ? ॥ २९

कषायाभिद्रुतं वीक्ष्य, मां हि कारुणिकस्य ते ।
विमोचने समर्थस्य, नोपेक्षा नाथ ! युज्यते ॥ ३०

विलोकिते महाभाग !, त्वयि संसारपारगे ।
आसितुं क्षणमप्येकं, संसारे नास्ति मे रतिः ॥ ३१

किं तु किं करवाणीह ? नाथ ! मामेष दारुणः ।
आन्तरो रिपुसङ्घातः, प्रतिबध्नाति सत्वरम् ॥ ३२

विधाय मयि कारुण्यं, तदेनं विनिवारय ।
उद्दामलीलया नाथ !, येनागच्छामि तेऽन्तिके ॥ ३३

तवायत्तो भवो धीर !, भवोत्तारोऽपि ते वशः ।
एवं व्यवस्थिते किं वा, स्थीयते परमेश्वर ? ॥ ३४

तद्दीयतां भवोत्तारो, मा विलम्बो विधीयताम् ।
नाथ ! निर्गतिकोल्लापं, न शृण्वन्ति ? भवादृशाः ॥ ३५

पू.उपा.श्री यशोविजयगणिविरचिता

# ५७. ॥ श्रीपरमात्मपञ्चविंशतिका ॥

(अनुष्टुप्)

परमात्मा परञ्ज्योतिः, परमेष्ठी निरञ्जनः ।
अजः सनातनः शम्भुः स्वयम्भूर्जयताज्जिनः ॥ १

नित्यं विज्ञानमानन्दं, ब्रह्म यत्र प्रतिष्ठितम् ।
शुद्धबुद्धस्वभावाय, नमस्तस्मै परात्मने ॥ २

अविद्याजनितैः सर्वैर्विकारैरनुपद्रुतः ।
व्यक्त्या शिवपदस्थोऽसौ, शक्त्या जयति सर्वगः ॥ ३

यतो वाचो निवर्तन्ते, न यत्र मनसो गतिः ।
शुद्धानुभवसंवेद्यं, तद्रूपं परमात्मनः ॥ ४

न स्पर्शो यस्य नो वर्णो, न गन्धो न रस-श्रुती ।
शुद्धचिन्मात्रगुणवान्, परमात्मा स गीयते ॥ ५

माधुर्यातिशयो यद्वा, गुणौघः परमात्मनः ।
तथाऽऽख्यातुं न शक्योऽपि, प्रत्याख्यातुं न शक्यते ॥ ६

बुद्धो जिनो हृषीकेशः, शम्भुर्ब्रह्माऽऽदिपुरुषः ।
इत्यादि नामभेदेऽपि, नार्थतः स विभिद्यते ॥ ७

धावन्तोऽपि नयाः नैके (सर्वे), तत्स्वरूपं स्पृशन्ति न ।
समुद्रा इव कल्लोलैः, कृतप्रतिनिवृत्तयः ॥ ८

शब्दोपरक्ततद्रूपबोधकृन्नयपद्धतिः ।
निर्विकल्पं तु तद्रूपं, गम्यं नानुभवं विना ॥ ९

केषां न कल्पनादर्वी, शास्त्रक्षीरान्नगाहिनी ।
स्तोकास्तत्त्वरसास्वादविदोऽनुभवजिह्वया ॥ १०

जितेन्द्रिया जितक्रोधा, दान्तात्मानः शुभाशयाः ।
परमात्मगतिं यान्ति, विभिन्नैरपि वर्त्मभिः ॥ ११

नूनं मुमुक्षवः सर्वे, परमेश्वरसेवकाः ।
दूरासन्नादिभेदस्तु, तद्भृत्यत्वं निहन्ति न ॥ १२

नाममात्रेण ये दृप्ता, ज्ञानमार्गविवर्जिताः ।
न पश्यन्ति परात्मानं, ते घूका इव भास्करम् ॥ १३

श्रमः शास्त्राश्रयः सर्वो, यज्ज्ञानेन फलेग्रहिः ।
ध्यातव्योऽयमुपास्योऽयं, परमात्मा निरञ्जनः ॥ १४

नान्तराया न मिथ्यात्वं, हासो रत्यरती च न ।
न भीर्यस्य जुगुप्सा नो, परमात्मा स मे गतिः ॥ १५

न शोको यस्य नो कामो, नाज्ञानाविरती तथा ।
नावकाशश्च निद्रायाः, परमात्मा स मे गतिः ॥ १६

रागद्वेषौ हतौ येन, जगत्त्रयभयङ्करौ ।
स त्राणं परमात्मा मे, स्वप्ने वा जागरेऽपि वा ॥ १७

उपाधिजनिता भावा, ये ये जन्मजरादिकाः ।
तेषां तेषां निषेधेन, सिद्धं रूपं परात्मनः ॥ १८

अतद्व्यावृत्तितो भिन्नं, सिद्धान्ताः कथयन्ति तम् ।
वस्तुतस्तु न निर्वाच्यं, तस्य रूपं कथञ्चन ॥ १९

जानन्नपि यथा म्लेच्छो, न शक्नोति पुरिगुणान् ।
प्रवक्तुमुपमाभावात्, तथा सिद्धसुखं जिनः ॥ २०

सुरासुराणां सर्वेषां, यत् सुखं पिण्डितं भवेत् ।
एकत्रापि हि सिद्धस्य, तदनन्ततमांशगम् ॥ २१

अदेहा दर्शनज्ञानोपयोगमयमूर्त्तयः ।
आकालं परमात्मानः, सिद्धाः सन्ति निरामयाः ॥ २२

लोकाग्रशिखरारूढाः, स्वभावसमवस्थिताः ।
भवप्रपञ्चनिर्मुक्ताः, युक्तानन्तावगाहनाः ॥ २३

इलिका भ्रमरीध्यानात्, भ्रमरीत्वं यथाश्नुते ।
तथा ध्यायन् परात्मानं, परमात्मत्वमाप्नुयात् ॥ २४

परमात्मगुणानेवं, ये ध्यायन्ति समाहिताः ।
लभन्ते निभृतानन्दास्ते यशोविजयश्रियम् ॥ २५

पण्डितश्री वीरविमलगणिकृतम्

## ५८. ॥ श्रीअष्टप्रकारपूजागर्भित-जिनस्तोत्ररूपाष्टकम् ॥

(द्रुतविलम्बित)

विमलकेवलदर्शनसंयुतं, सकलजन्तुमहोदयकारणम् ।
स्वगुणशुद्धिकृते स्नपयाम्यहं, जिनवरं नवरङ्गमयाम्भसा ॥ १

जगदुपाधिचयाद्रहितं हितं सहजतत्त्वकृते गुणमन्दिरम् ।
विनयदर्शनकेशरचन्दनै-रमलहृन्मलहृज्जिनमर्चये ॥ २

सुकरुणासुनृतार्ज्जवमार्दव-प्रशमशौचदमादिसुमैर्जनाः ।
परमपूज्यपदस्थितमर्चत, परमुदारमुदारगुणं जिनम् ॥ ३

अशुभपुद्‌गलसञ्चयवारणं, शमसुगन्धकरं तपधूपनम् ।
भगवतस्तु पुरा हतकर्म्मणो, जयवतो यवतोऽक्षयसम्पदाम् ।।४

बहुलमोहतमिस्रनिवारकं, स्वपरवस्तुविकाशकमात्मनः ।
विमलबोधसुदीपकमादधे, भुवनपावनपारगताग्रतः ॥ ५

सकलमङ्गलसम्भवकारणं, परममक्षतभावकृते जिनम् ।
सुपरिणाममयैरहमक्षतैः, परमया रमया युतमर्चये ॥ ६

अमलशान्तिरसैकनिधिं, शुचि-गुणफलैर्मलदोषहरैरहम् ।
परमसिद्धिफलाय यजे जिनं, परहितं रहितं परभावतः ॥ ७

सकलचेतनजीवनदायिनी, विमलभक्तिविशुद्धरसान्विता ।
भगवतः स्तुतिसारसुखाशिका, श्रमहरा महरास्तु विभोः पुरः॥८

इति जिनवरवृन्दं शुद्धभावेन कीर्त्ति-
विमलमिह जगत्यां पूजयन्त्यष्टधा ये ।
निजकलिमलहेतोः कर्मणोऽन्तं विधाय,
परमगुणमयं ते यान्ति मोक्षं हि वीराः ॥ (मालिनी) ९

पण्डितश्री लक्ष्मीकल्लोलगणिकृतम्
परागशब्दाष्टोत्तरशतार्थनिबद्धम्

## ५९. ॥ श्रीसाधारणजिनस्तवनम् ॥

श्रीदेवेन्द्रनरेन्द्रमौलिमुकुटोद्‌घृष्टाङ्घ्रियुग्मं जिनं
नत्वाऽकुर्वि 'पराग' शब्दविविधार्थोत्पत्तिमालां च याम् ।
पापं पिण्ढि तदीयपुण्यवशतो यन्मामकीनं विभो !-
ऽभिध्यातीतफलापवर्जनसुधाविष्वाणकारस्करः ॥ (शार्दूल०) १

(वसन्ततिलका)

वक्त्राब्जवायुजितपद्मपरागपूरं
हृन्मन्दिरस्थखपरागहतप्रचारम् ।
प्रोद्दीप्तकाञ्चनपराऽगसवर्णवर्णं
त्वज्जापरागरसिकः स्तुतिमानये त्वाम् ॥ २

देवाऽपराग ! निकृतिप्रततिप्रतान-
च्छेदे कुठार ! सुपरागसमाङ्गगङ्गम् ।
त्वां संश्रयाम्यनिमिषाधिपचापराग-
संसारमुक्त ! भुवि विस्तृतसम्पराग ! ॥ ३

स्वामिन् ! जय त्वमनिशं सपरम्पराऽऽग-
मादिप्रकाशक ! चिरं गतपापराग ! ।
यश्चाप्युवक्थ ऋषिराजिषु पुष्पराग-
वृत्तिं विघट्टितमणीव कचापराग ! ॥ ४

पूर्वापरस्वरविपर्ययतः पराग !
तत्त्वावबोधमिहिरोद्गमने पराऽग ! ।
त्वं किं परागमयसे मयि मुक्तिदाने
क्लृप्तापरागसि जितारिरथ प्रसीद ॥ ५

तृष्णापरागविरतं निरतं क्रियायां
लीलापरागतिचरन्तमघं हरन्तम् ।
विश्वाऽपरागपतिशुद्धयशोऽभिरामं
वन्दे प्रियंवद ! परागणनीयशीलम् ॥ ६

भूवाःपरागपुरुषेषु कृपां दधानो
मायापरागवनितावधवैनतेयः ।

यः कोपरागरहितस्त्वमसीन ! तेन
सेवे भवन्तमपरागमशैलवज्रम् ॥ ७

ध्वस्तोपरागपरभागविभूषिताङ्गं
सूरापरागमसमीकृतकर्मधर्मम् ।
पुण्यापरागजनदत्तभवं भजेयं
देवाऽपरागणितलक्षणसञ्चयं त्वाम् ॥ ८

सेवाऽपरागणितसौख्यकरं श्रयामि
हृत्तापरागहरणं करणं गुणानाम् ।
प्रोद्यत्परागतिगतं शरणं जनाना-
मिष्टार्थसाधनसुपर्वपरागकल्पम् ॥ ९

तेजोविराजितपराङ्गसमीपराग-
द्वेषच्छिदं धनहयद्विपरागहीनम् ।
गेमे(ये) सति द्रुतपराग ! नमस्करोमि
गेस्थे (ये ?) जयेऽकलितपापपरागमाशु ॥ १०

गेस्थेजिते जननमृत्युजरापरागं
मां देहि तच्छिवपदं विलसत्परागम् ।
रान्नेहतस्मरपरागप्रकोपराग-
रिक्तं परागणधरस्थितिकार्यकारिन् ! ॥ ११

पस्था(?)ङ्गदेवकृतचन्दनसत्परागो
यो द्वापरागमगिरोऽस्ति न जज्ञपूकः ।
गेयं विधाय कृतदुष्कृतसम्पराग-
मीडे प्रतीतमपरागमभिख्यया तम् ॥ १२

गेपाग्रगे जितपुनर्भवभापराग
रास्थानके तमुदिते भुवने पराग ! ।
गेशे कृते निहतमोहमहापराग !
गेस्थे पणे कुरु सुखं शमधीपराग ! ॥ १३

गेऽर्थेपरागकरणोद्यमिनं नमामि
गेसो स्थिते खलपरागभयप्रमुक्तम् ।
गेन्नेकृतेऽर्पितपरागधराधव ! त्वां
पेहे स्थिते शुचिपरागपवित्रकीर्तिम् ॥ १४

गेस्थे भवे सकलजन्तुकृतापराग !
गेदे निवर्हितकषायमहत्पराग ! ।
गेशे विधेहि सुखमुज्झितदुष्पराग !
गेवे सति त्रिजगदङ्गिकृपापराग ! ॥ १५

पेसौपरागसमधैर्य ! सुवर्यवीर्य !
पेसे परागशिवभीरुमभिष्टुवे त्वाम् ।
ये नीकृते धनवधूप्रभुतापराग-
राप्नोदिते शुचिपरागरदालिकान्ते ! ॥ १६

रित्रां कृतेनुचितदेहपरागलेप-
रित्रां गते जय परागभवाधिकश्रीः ।
उन्नेतिरःसुविहिते जनतापराग-
गेधे कृते गलितमोहमदापराग ! ॥ १७

पराङ्गनायास्तु पवे पराग, सङ्गेन मुक्तं मनसा नतोऽस्मि ।
पेवे कृते देव नमत्पराग !, सन्त्यक्तरक्तास्थिपराङ्गसङ्ग ! ॥१८
(उपजातिः)

प्राप्तापरागाधभवाब्धितीरं, वन्दे पराऽगारविमुक्तचिन्तम् ।
तृष्णापरागर्वरुषा निषूदनं, वशापरागार्ह्य(र्द्ध्य)गुणोपपन्नम् ॥१९

दिव्यापरागर्जनतामतीतं, सेवापरागस्त्यमुखर्षिवन्द्यम् ।
परागभस्तिच्छवितोऽधिकप्रभं,
परागजाविःकृतसद्गतिं श्रये ॥ (इन्द्रवंशा) २०

परागतार्थप्रतिपादनात् प्रियं,
जनम्पराऽ(जनापरा)गर्ह्यवचःपरम्परम् ।
परागलद्दूषणधोरणीद्धं, परागदाधिघ्नमहं नवीमि ॥ २१
(उपेन्द्रवंशा)

परागरुत्मत्स्थितिमूर्त्तिसेव्यं, परागरुद्रव्यसुधूपयोग्यम् ।
परागमाचारविचारणीयं, पराऽगदङ्कारमहं भजामि ॥ २२
(उपेन्द्रवज्रा)

माद्यत्परागम्यपदप्रदान-दक्षं परागर्वगुणं श्रयध्वम् ।
सुरूपरागोत्थविकारतर्जकं, जरापरागत्वरभीतिवर्जितम् ॥ २३
(इन्द्रवंशा)

परागजावारिविशुद्धवंशः, परागरिष्टस्थितिभेददर्शी ।
सेवापरारि(? गा)नतचक्रमाब्जः,
कृपापराऽगालिदवाक्य ! जीयाः॥ (उपजाति) २४

यो दीपरागाङ्गिसमात्मबोधनो, विलापरागादिविमुक्तचेताः ।
निःस्वापराऽगास्व(ह्य)तरस्वरूपः,
सुरापरागाह्यगुणः सुसेव्यः ॥ (उपजाति) २५

अपूर्वराणां(गा)ङ्गपरागजात-शीलं पराऽगन्धवचःप्रकाशम् ।
परागतिप्राप्त ! परागतिज्ञं, स्तोष्ये परागोपगतिं प्रतीतम् ॥२६
(उपजाति)

वन्दे परागर्भगतिव्यतीतं, सदापरागाढतपःप्रवृत्तम् ।
क्रूरापराङ्गारकशोणपार्णि, परां गरीयःपदवीं श्रयन्तम् ॥ २७
(उपजाति)

श्रीमद्वाचकचक्रवर्तिसुगुरुश्रीहर्षकल्लोलसच्-
छिष्यः पण्डितमण्डलीबहुमतः श्रीलक्ष्मिकल्लोलकः ।
सैवेदं रचयाञ्चकार सुपरागार्थाष्टयुक्तं शतं
तेनाप्नोतु कृती जनः शिवसुखं पुण्येन लब्धोदयम् ॥ २८
(शार्दूल०)

महामहोपाध्यायश्री साधुराजगणिकृता

## ६०. ॥ भोज्यादिनामगर्भिता जिनस्तुतिः ॥

**आम्बाऽरायण सेलडी** खडहडी**केलामती** रा**ङ्ग**भं
**चञ्चद्दाडिमद्राऽखखारिक** रसात्त्वां साकुची **खाजलाम्** ।
**लाडू**षाण्ड**खजू**रसार**खडबूजा**ङ्कूर**दालि**प्रभो
नौमि श्रीजिनमुद्र**साकर**महं श्री**पानसत्फोऽफलम्** ॥(शा.वि.)१

श्रीजम्बीरमपास्य मोचकरणान् नारङ्गरक्ताधरा-
प्यास्तावायमगुन्दसेवकदहीनाघेनगोक्षीरगुम् ।
**चारोली**नसुरांह्रिपङ्कजरगोजात्यस्त**जाम्बू**नदं
स्तौमि त्वां सुगुणाकरं बुधनतं **पूडा**भला**ञ्जूरिमाम्** ॥(शा.वि.)२

**खसखस**मुरुकीपोली माण्डामाण्डी लघीय**सीङ्घोडाम्** ।
त्वं साकुली: **सुहालीं** टोठा**धाणीचणा**ऽऽच्छिन्धि ॥ ३

**कोठीभ** ! **डा**मरघ्नेश ! **पापड**क्षाब्जभञ्जने ।
**साले वडा**ञ्चिते भक्त्या तिष्ठंस्ते न सुखा**वडी** ॥ ४

(अनुष्टुप्)

**कङ्कोडा**यनमारस्य ददतं कर्मदाहकम् ।
**काकडी**भिश्च**कारेला**विषयं नो जिनं जन: ॥ ५

**रसाङ्ग**रीत्या त्वद्वाणी: क इरम्यं जहत्यघम् ।
मानबाउलियापीय **आमलाङ्ग** ! जिनेश ! नो ॥ ६

घटीं **डूरा**ञ्चितारस्य डोडिकान्तकचस्यते ।
लोकं कुठ**वडी**तप्तमकर्पटाङ्ग ! तर्पयेत् ॥ ७

आयु:**पूरण**मारस्य निरमा: शुभ**सूरणम्** ।
दु:**खाण्ड**मीशाकुरुथा: खण्डश: **सवडाङ्क**: ॥ ८

**राबडी**लासुधामस्येद्रम्भाञ्जङ्घारडीनते ।
**दृढो**ऽ**कला**न्तनार्थेते यस्तस्येशन**बाकला** ॥ ९

**कइरी**न्धनभारस्य नादुस्तेशक**टीण्डसाम्** ।
शु**चीभडा**ञ्छन ! स्वामिन् ! प्राप्याबालहलिस्तुत ! ॥ १०

जन: कल्याणभाजी स्यात् सकडोडीनधी: पदे ।
ते**बोरु**भक्तिमान् देवसुला**पीलू**नदुर्मति: ॥ ११

एवं स्तुति: शुभवतो भवत: प्रसिद्ध-
सद्भोज्य-शाकवरनामविराजिमध्या ।

स्वामिन् ! परार्थघटनापटुराशु कर्तु-
र्निर्दम्भमाभ्युदयिकीं वितनोति लक्ष्मीम् ॥ (वसं. ति.) १२

पू.पं.श्री देवचन्द्रविजयविरचिता

## ६१. ॥ श्रीवीतरागस्तुतिः ॥

कुखगोऽघङचछोऽजाझोऽञट ! ठोडढोऽणतैः ।
थ्युदधिर्निपफो वा(बा)भूर्मो यारलोऽव शंषसः ॥ १

**व्याख्या :** हे अज ! त्वं मां अव-रक्ष ।

अज इति किम् ? न जायते इति अजः यद्वा न विद्यते ज-जन्म जस्यासावजः, तत्सम्बोधने हे अज-हे वीतराग ! कथम्भूतस्त्वम् ?

'कुखगः' कु-पृथ्वी तस्यां खगः-सूर्यः ।

पुनः कथम्भूतस्त्वम् ? 'अघङचछः' अघं-पापं तस्य ङ-विषयस्तस्य छः छेदकः ।

भूयः कथम्भूतस्त्वम् ? 'अझः' न विद्यते झः-बन्धनं यस्यासावझः, बन्धनं किम् ? कर्मणामेव ।

पुनः कीदृशस्त्वम् 'अञट' अ-निषेधे ञे-विषय एव टः-वातो यस्यासावञटस्तत्सम्बुद्धौ हे अञट-त्यक्तविषयवात !

भूयः कीदृशस्त्वम् ? 'अणतैः' अणं-अज्ञानं ताः-क्रोधादयस्तैः अणतैः, ठः शून्यः-रहितः ।

पुनः कथम्भूतस्त्वम् ? 'डढः' डः-चन्द्रमण्डलस्तद्वत् ढः-विख्यातः ।

भूयः कीदृशस्त्वम् ? 'थ्युदधिः' थयो लक्षणानि सामुद्रिकादयस्तेषामुदधिः समुद्रः ।

पुनः कथम्भूतस्त्वम् ? 'निपफः' निस्तन्द्रं तदेव पं-प्रौढं फं-फलं यस्यासौ निपफः ।

पुनः कोदृशस्त्वम् ? 'वाभूः' वः क्लेशस्तस्य न विद्यते भूः उत्पत्तिर्यस्यासौ वाऽभूः ।

भूयः कीदृशस्त्वम् ? 'यारलः' या-पृथिवी तस्या रान्-भयानि लः-लुनातीति यारलः ।

पुनः कथम्भूतस्त्वम् ? 'शंषसः' शं-सुखं तदेव षा-श्रेष्ठा सा-लक्ष्मीर्यस्यासौ शंषसः, इति शब्दार्थव्याख्या ।

पू.पं. लक्ष्मीकल्लोलगणिविरचिता

## ६२. ॥ द्वात्रिंशद्व्यञ्जनमय-जिनस्तुतिः ॥

कखगघङ चछजझ टठडढण तथदधन पफबभम यरलव शषसह। अथ द्वात्रिंशद्व्यञ्जनानां श्लोककरणकाम्यया लघुदीर्घस्वरदानपूर्वं जिनस्तुतिं प्रतिपिपादयिषुरहं कोविदविनोदायानुष्टुब्बन्धं रचयामि । यथा-

**कुखगाऽघं ङचाछाऽज झटठेडढणातिथिः ।**
**दधानः पां फबाभामो यरलावश षासहीः ॥**

अस्य व्याख्या - हे कुखग ! कौ पृथिव्यां, खगः सूर्यस्तत्तुल्य ! । यथा सूर्यः पृथ्वीं प्रकाशयति तथा भगवान् केवलज्ञानेन भूमावुद्योतकरः । हे ङचाछ ! ङः प्राणः बलं, चा शोभा, ताभ्यां छो निर्म्मलः नित्यो वा । जिनस्य नित्यं तारुण्याद् बलशोभायास्तदवस्थत्वापत्तेः । ङः प्राण इति सौभरिमुनिकृत-[नाम]मालायां । चा स्त्री शोभा । छस्त्रिष्वयं निर्म्मले नित्ये -

इत्युरगदण्डाधिपकृत (नाम)मालोक्तत्वात् । हे जिन ! त्वं अघं पापं अज क्षिप । हे झटठेड ! झः प्रतापस्तेन टोऽर्कः, ठः शम्भुस्ताभ्यामीड्यते स्तूयते इति झटठेड । अत्र उणादये (दौ) अः प्रत्ययः । झः प्रतापे । टः पुमान् करटे धूमे तापेऽर्क – इति । ठः शङ्करे – इत्युरगदं० । हे यरलावश ! यश्चन्द्रः, रः सूर्यः, ला लक्ष्मीः, एते सर्वे वशे यस्य स यरलावशस्तस्य सम्बो० । सर्वेषां नमनीयत्वात् । यः सूर्ये तारके चन्द्रे । रः सूर्येऽग्नौ धने कामे । ला च लक्ष्मीर्लमम्बरे इति विश्वशम्भूक्तिः । त्वं किंलक्षणः ? ढणातिथिः । ढः स्वभावेन, णा कृपा, सा अतिथिर्यस्य सः । यतः कृपालोश्चेतोगृहे कृपा आयाति । यत उक्तं – सरिसा सरिसेहिं रच्चन्ति इति वाक्योक्तेः ढः स्वभावे, विमत्सरे इति विश्वशम्भूक्तिः । णा धेनुनासाकृपासु च – इति उरगदं० । त्वं कि कुर्वाणः ? दधानः बिभ्रत् । कां ? पां । पा श्रुतं । पा पातरि तथा श्रुते इत्येकाक्षरनिघण्टुः । त्वं किल० फबाभामः । फो ज्ञानं तस्य बः समुद्रः । न विद्यते भामः क्रोधो यस्य सोऽभामः । फबश्च अभामश्च फबाभामः । फोऽपारदशने देवे न्याये ज्ञाने च । तथा–

वो दन्तोष्ठ्यस्तथौष्ठयोऽपि वरुणे वारणे वरे ।
शोषणे पचने गन्धे वासे वृन्दे च वारिधौ ॥१॥

इति विश्वशम्भूक्तमालायां । पुनः त्वं किंलक्षणः ? षासहीः । षा रसा तया सहितो ही[ः] हर्षस्तद्वान् । लक्ष्मीसहितहर्षवान् इत्यर्थः । यदुक्तम् – षा स्त्री रमायां षं क्लीबे – उरगदण्डाधिपकृतमालोक्तं (हीर्नरो हर्षवान् मृगः) – इति सौभरिमुनिप्रणीतमालोक्तत्वात् ।

कुखगेतिपदेन ज्ञानातिशयः १ । झटठडेतिपदेन पूजातिशयः २ । पापापनोदात् सङ्कटानि नश्यन्तीत्यतः अघं अज इतिपदेन अपायापगमातिशयः ३ ।श्रुतं विना वाक्यस्यादेयता न स्यादतः पां दधान इतिपदेन वचनातिशयः ४ ।

इति द्वात्रिंशद्व्यञ्जनमयः विषमार्थयुगनुष्टुप् धीधनजनमनोविनोदनिबन्धनाय पं. लक्ष्मीकल्लोलगणिना व्यरचि।

पू.मु.श्री. उदयवीरगणिविरचितः

श्रीपार्श्वनाथचरित्र-अन्तर्गतः

## ६३. ॥ श्रीवीतरागस्तवः ॥

(अनुष्टुप्)

मुनीन्द्रहृदयानन्दकन्दकन्दलनाम्बुद ! ।
विकल्पकल्पनापेत ! वीतराग नमोऽस्तु ते ॥ १

ध्यातो येन जिनेश ! त्वं विकासिकमलानन ! ।
तस्य विश्वोत्तमानन्तसौख्यलक्ष्मीनिधिर्भवेत् ॥ २

निर्वापयसि संसारे मरुस्थलं पथि स्थितम् ।
दृष्टोऽप्याकस्मिकाम्भोदसोदरः परमेश्वरः ॥ ३

ध्येयस्त्वमेव भगवन् ! ज्योतीरूपो हि योगिनाम् ।
अष्टकर्मविघातायाष्टाङ्गयोगः कृतस्त्वया ॥ ४

जले वा ज्वलने वापि कान्तारे शत्रुसङ्कटे ।
सिंहाहिरोगविपदि त्वमेव शरणं मम ॥ ५

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## ६४. ॥ श्रीसाधारणजिनस्तोत्रम् ॥

(वैतालीय)

जिनराज ! तवासनं बभौ निजधैर्यैर्जितमन्दरोऽत्र किम् ।
भुवनत्रयराज्यशंसिनी शिरसि च्छत्रततीव सम्पदा ॥ १

सदशोककलेव सेवते भगवन्तं स्वमशोकमूर्त्तिभृत् ।
उपदेशमहीषु कौसुमी रचनाकीर्त्तिरिवाघघातजा ॥ २

यशसी इव रागरोषयोर्विजयैश्चामरयुग्ममीश ! ते ।
भुवनत्रयतापहारिणी तव गीर्भाति मुधेव सङ्गता ॥ ३

इव निर्जितसर्वमन्महा इति भामण्डलमीशपृष्ठगम् ।
किमितीव बभाण दुन्दुभिस्त्रिजगत्तारणतारतेव ते ॥ ४

इत्युदारनुतिभावमागते मागतोरुवचन ! प्रसीद मे ।
मेदुरां वितर सारसम्पदां सूरिहर्षविनयप्रभुत्वदाम् ॥ ५

(रथोद्धता)

पू.मु.श्री भानुचन्द्रगणिविरचितम्

## ६५. ॥ श्रीजिनस्तवनम् ॥

स्वस्ति श्रियं यच्छतु नाभिजातो-
ऽभिजातमुख्यैरभिनन्दितश्रीः ।
यद्वक्त्रशोभातिशयं विलोक्य निशापतिः क्षीणतनुर्बभूव ॥ १

समग्रसिद्धान्तपयोधिपारगं गुरुं नमस्कृत्य निजं जिनेशतः ।
त्वत्साक्षिकं त्वन्मतवासनाञ्चितो ब्रवीमि सौवात्महितानुशासनम्॥ २

तप्तं त्वया पूर्वभवे महत्तपो जिनेन्द्रसेवा विहिताऽथवा किमु ।
प्राप्तं हि येनोज्झितपापकर्मसु प्राणिन् ! प्रसिद्धेषु कुलेषु जन्म ॥३

संसारचक्रे भ्रमतः कदाचिन् मानुष्यको ह्येष भवस्त्वयाप्तः ।
प्राणिंस्तथाराधय शुद्धधर्मं यथा भवेद् ब्रह्मपदोपलब्धिः ॥ ४

प्राणिंस्त्वया प्राणभृतां समक्षं व्रतं गृहीत्वा पुनरेव मुक्तम् ।
तथापि ते दुर्गतिपातदुःखजं भयं कदाचिन्न समागतं हृदि ॥५

प्राणिन् ! परापायविमर्शपूर्वं कालं कियन्तं त्वमजीगमः प्राक् ।
न ज्ञातवानित्यनुचिन्त्यते तु
यत् शत्रोस्तदेवात्मनि जायते ध्रुवम् ॥ ६

जीव ! त्वया जीवितलिप्स्यैव प्राणापहारो विहितः परेषाम् ।
न ज्ञातमेतत् किल यादृगेव वितीर्यते तादृशमेव लभ्यम् ॥ ७

त्वं वेत्सि सर्वं सचराचरं जगद् ज्ञानेन लोकत्रितयावलोकिना ।
तथापि ते नाथ ! पुरो ब्रवीमि किञ्चिन् मदीयाचरणं प्रमादजम्॥८

अन्योऽन्य-दुर्वाक्यपरम्परायाः सम्भाषणेनाऽपि यदार्जितस्य ।
पापस्य निर्नाशनहेतुभूतं स्वामिंस्त्वदीयं चरणद्वयं मे ॥ ९

नैवाभवन्नापि भविष्यतीह कामान्धचेताः खलु मत् सदृक्षः ।
यद् दृष्टवानस्मि सरागया दृशा
वधूजनं श्राद्धजनस्य तादृशम् ॥ १०

स्वामिन् ! मया मन्द इति प्रजल्पितं क्रियासु कैवल्यसुखप्रदासु।
लोभाभिभूतेन न च लब्धिहेतो-
र्भ्रान्तं समन्तादखिलेऽपि देशे ॥ ११

स्वामिन् ! मया यो विहितः परेषां परोपकारः सुकृतैकभाजनम्।
ततोऽपि किञ्चिच्छुभवस्तुलिप्सया
हतः प्रभावः खलु सोऽपि निर्मितः ॥ १२

शनैः शनैः पर्वणि रोगिणेव मया कदाचित् गतमेव चैत्ये ।
प्रधावितं चार्बुदमेखलासु विनोदहेतोर्महतः प्रमोदात् ॥ १३

न तीर्थयात्रासु कृतं मनो मया कदाचिदत्यन्तविमूढचेतसा ।
शिष्यादिसम्पत्तिविशेषहेतो-र्भ्रान्तिश्च सर्वत्र कृता समन्तात् ॥१४

स्वामिन्नृणां धर्मकथासु कारितो नेत्रेभ्य एवाश्रुजलस्य पातः ।
अत्यन्त-वैराग्यरसस्य पोषणात्
तथापि मच्चित्तमभून्न कोमलम् ॥ १५

वेषोप्ययं स्वोदरपूर्तिहेतो-र्यत्स्वीकृतो नैव विशुद्धबुद्ध्या ।
नोचेत् कथं मुक्तिनिदानभूतं सम्यक्त्वरत्नं मलिनीकरोमि ॥१६

वादे मया केचनवादिनोऽमी तिरस्कृता न्यायविशेषयुक्तिभिः ।
स्वोत्कर्षपोषाय परं न जैन-मतस्य संस्थापनकृत्य-हेतोः ॥१७

अधीत्य बिन्दु प्रतिमं श्रुतं क्वचिन् -
मिथ्याभिमानैरधरीकृतो गुरुः ।
नासादितं नाथ ! मनुष्यजन्म फलं मयात्यन्तविमूढचेतसा ॥१८

स्वामिन्मयाऽमुत्र भवे कियन्ति वर्षाणि यावद्विहिता प्रवृत्तिः ।
म्लेच्छाधिपैस्तेन च सत्प्रबोधं
प्रापुः परं लाघवमात्मनोऽभूत् ॥ १९

आकल्पयुक्तेन न च पापभीरुणा संसारतप्त्याभिमुखेन तन्त्रिणा।
स्वामिन्न तत्त्वाभिनिवेशबुद्धिना
शुद्धोऽपि मार्गो मलिनीकृतो मया ॥ २०

भुङ्क्ते मनोहारि सतीमनं यत् घृतेन युक्तं लवणोपयुक्तम् ।
जिनेश ! सुस्वादुसुपक्वमन्न-मेवं महद्दुःखमदायि जिह्वया ॥२१

दानं सुपात्रेषु मया न दत्तं कीर्त्यादि दाने प्रगुणीकृतं मनः ।
न धर्मकृत्यस्य कृता समीहा
स्वामिन् ! वृथा जन्म गतं ममेदम् ॥ २२

जिनेश ! मिथ्यात्वविकारविक्लव-
स्वान्तस्य मे श्रेयसि नाभवद् रुचिः ।
योतऽऽभयग्रस्तशरीरभाजो भोज्ये मनोहारिणि सौख्यदेऽपि ॥२३

अत्यन्तसुस्वादुमयैव भोज्य-मिदं तथा नेति न भक्ष्यमेतद् ।
इत्यादि सर्वं रसनैकहेतुजं जिनेश ! चक्रे मयकाऽधमेन ॥ २४

धामस्थसन्तुष्टिकृते गतागते
मया गते नाथ ! तदीयवेश्मसु ।
जिनालये सौवसमीपवर्त्तिनी
प्रकृष्टबुद्ध्यैव कदापि नो गतम् ॥ २५

तत्तन्मनोहारि पदार्थसार्थे
जिनेश ! मे दृग्पथमागतेऽस्मिन् ।
तल्लिप्सयैवात्र मनो मदीयं
सदैव सन्तप्तमिवावतिष्ठते ॥ २६

स्वामिन् ! सदाचारविचारवद्भि-
र्दत्तं मनोहारि यदेव वासः ।
नैवोपभोगाय मयाऽपि कल्पितं
दत्तं न चान्यस्य तथैव तद्गतम् ॥ २७

स्वामिन् ! मयाकारि यदत्र पुण्यं
स्मयेन सर्वं विफलीकृतं तत् ।
अतोऽत्र नामुत्र च किञ्चनाऽपि
भोक्तव्यमस्तीति भृशं भयं मे ॥ २८

स्वामिन् ! मदीया रसना निंकृत्या
पुरः परेषां मधुरं ब्रवीति ।
शिवप्रदं न त्ववबुद्ध्य सम्यक्
सुशान्तिदं शान्तरसं रसेन्द्रम् ॥ २९

समग्रविद्याभ्यसनेन तावन्
ममैव नैतद् विदितं बभूव ।
इदं हि गर्वस्य विनाशहेतो-
र्निरूपितं तत्त्वकृते च किं मे ॥ ३०

स्वामिन् ! महापर्वणि तत्तपोऽर्थे
श्रद्धावतां जैनमतानुरागिणाम् ।
दत्तो मया तीव्रतरोऽपदेशः,
परं स्वयं नैव कृतं कदाचित् ॥ ३१

श्रीमज्जिनोक्तागमवर्णितेषु
तत्त्वेषु मे चारु रुचिर्नवाऽस्ति ।

संसारसिन्धुं तदहं तरीतु-
मेनं क्षमो नाथ ! कथं भवेयम् ॥ ३२

संसार-मध्यस्थ मयि प्रभो ! त्वां
संसारमुक्तं प्रवदन्ति सन्तः ।
स्थाने विषान्तर्निहितोऽपि सन्मणि-
र्विषेन मुक्तः प्रतिपाद्यते जनैः ॥ ३३

स्वामिंस्त्वदाज्ञाविमुखस्य जन्तोः
सर्वे पदार्था विमुखीभवन्ति ।
यथा हि सेनाधिपतिं प्रतिप्रभौ
कोपंगते तत् क्रमवासिनो जनाः ॥ ३४

स्वामिंस्तव ध्यानरसेन्द्रयोगात्
सञ्जायते स्वात्मनि तारभावः ।
अतो मया मूढधिया तदर्थ-
मभ्यर्थिताः केचन योगिनोऽपि ॥ ३५

चित्तं मदीयं भ्रमयन्ति देव !
तद्भाषितान्येव यदज्ञतायाम् ।
तीव्राऽऽतपे सत्यरुणप्रकाशात्
दूराज्जलभ्रान्ति कुतो भवन्ति ॥ ३६

दुर्बुद्धिबुद्ध्या तव शासनस्य
मालिन्यमाविष्कृतमेव यन्मया ।
तदुत्थपङ्कस्य विनाशहेतोः-
तदंह्रि सेवारसिकं मनो मे ॥ ३७

त्वद् वाक्-सुधापान-विवृद्धतृष्णा-
स्त्वदंह्रिपङ्केरुहचञ्चरीका ।
इहैव ते स्वर्गसुखानि भुक्त्वा
स्वामिन् ! महानन्दपदं भजन्ते ॥ ३८

स्वामिंस्त्वदाज्ञाकरणैकचेतस-
स्त्वदुक्तराद्धान्तरहस्यवेदिनः ।
स्वयं ह्यनाथा अपि विश्वनाथतां
ते प्राप्नुवन्त्येव किमत्र चित्रम् ॥ ३९

स्वामिन्नतोऽहं भयभीतचेता
धामस्थसद्मस्वपि बम्भ्रमीमि ।
त्वदुक्तलेशोऽपि मया कदाचिन्
नाकारि कुत्रापि विमूढभावात् ॥ ४०

लोकत्रयी लोकहितानुबन्धिनं
जगद्गुरुं जाग्रदशेषसम्पदम् ।
ध्यायन्ति ये त्वां मनुजा महर्द्धयो
भवन्ति तेऽप्यत्र भवेप्यदुःखिताः ॥ ४१

स्वामिंस्त्वदीयागममर्मवेदिना
नैवात्र किञ्चिद् विहिता मयाद्भुतम् ।
पाथेयतां याति परत्र गच्छतो
यदेव विश्वत्रितयोपकारी ॥ ४२

कामाभिभूतेन विमूढचेतसा
कदापि शीलस्य कथैव नो कृता ।

तथा परेषामपि नोपदेश-
स्तद्धेतुकः क्वापि मयैव दत्तः ॥ ४३

स्वामिन्! स्वयं चौर्यरतो हि यः पुमान्
स एव नो तत् प्रतिषेधकृद् भवेत्।
इतीव हेतोर्मयकापि शीलः
सम्यक् प्रवृत्तिर्विशदीकृता नो ॥ ४४

स्वामिन्नहं दुष्टधियां पुरोगः
ततः कृपां नैति मदीयचित्ते।
यतो हि जन्तून् निजदेहसम्भवान्
हस्तेन सर्वान् विकरोमि भूमौ ॥ ४५

वितीर्य यत् सौवपितुर्धनं महद्
गृहीतदीक्षे सति साम्प्रतं मयि।
ज्ञानस्य हेतोर्धनसङ्ग्रहेच्छा
सञ्जायते धिग् मम जीवितं प्रभो! ॥ ४६

स्वामिन्! मया यत् सुकृतं क्रियादिकं
करिष्यते यत् क्रियते कृतं च।
तदेव सर्वं सफलीभवेत् तदा
यदा हि दुर्बुद्धिरियं विमुच्यते ॥ ४७

रहःसमाख्याय जनस्य पृच्छतः
किञ्चित् तदन्यद् विहितं पुनः प्रगे।
इत्यस्मि विश्रम्भविनाशहेतुः
स्वामिन्नहं पापकृतां हि मुख्यः ॥ ४८

श्रद्धावतां मानसरञ्जनाय
माधुर्यमेवाधिकृतं मुखेऽस्मिन् ।
मया न दूरीकृत एव यत्ना-
दन्तस्थ - कालुष्य-कलङ्कपङ्कः ॥ ४९

समर्थसार्थाधिपतेः परस्य
स्वामिन् ! मयाकारि यदत्र कृत्यं ।
तन्निस्पृहत्वेन न नोपकार-
बुद्ध्याऽपि किन्त्वीप्सितलब्धिहेतोः ॥ ५०

स्वामिंस्त्वदीयागम एष पञ्च-
दज्ञानदावानल वारिवाहः ।
प्रवर्तते सम्प्रति सोऽपि वैया-
वृत्त्यस्य हेतोर्मयका प्रपाठितः ॥ ५१

सद्ज्ञान- चारित्र-विशेषरत्नयो-
र्मया कदाचिन् न हि संस्कृतिः कृता ।
तदीयतन्त्राणि विशेषितानि
जिनेश ! सौन्दर्यविशेषभाञ्जि ॥ ५२

स्वामिंस्त्वदीयः खलु यो नियोगः
सुरासुराणामपि माननीयः ।
विहाय तं मूढधिया प्रवृत्तिः
कृता मया दुष्टजनस्य बुद्ध्या ॥ ५३

उत्सर्गमार्गश्च तथापवादो
द्वयं जिनप्रोक्तमिति प्रकल्प्य ।

स्वामिन् ! मया सर्वमकृत्यकृत्यं
द्वितीयमार्गे निहितं प्रमादात् ॥ ५४

स्वामिन् ! मया सद्गुरुसन्निधावपि
व्रतं गृहीत्वा न तथैव रक्षितम् ।
तद्भङ्गसम्भूत-तमोभराच्च यद्
बिभेमि नाहं तदशिष्टपद्धतिः ॥ ५५

प्रभो ! मयाऽकब्बरनामधेय-
श्रीमद् सुरत्राणबलेन साकम् ।
समेत्य कश्मीरभुवं स्वकीयं
कृतं न कृत्यं स्मरणोचितं यत् ॥ ५६

मयाकृतं पर्वणि तूपवासो
जनेष्विति प्रोच्य च साभिमानम् ।
प्रतिश्रयं प्राप्य तदेव जग्धं
स्वामिन्नहो मोहविजृम्भितम् मे ॥ ५७

कायेन विष्वक् परिवेष्टितस्य
हालाहलस्येव मम स्वरूपं ।
जानीहि विश्वत्रितयावतंस !
बहिर्मनोहृत् कटुकं यदन्तः ॥ ५८

स्वामिन् ! समग्रास्वपि यत् क्रियासु
वैदग्ध्यमेवादधदप्यहं यत् ।
प्रवृत्तवांस्तास्वपि नो कदाचित्
विशुद्धबुद्ध्या गुरुनोदितोपि ॥ ५९

स्वामिन् ! जहाङ्गीर-महीश-सन्निधौ
स्थित्वा कियत् कालमनिन्द्यवैभवम् ।
परस्य कृत्यानि कृतान्यनेकशः
स्वार्थस्तथावस्थित एव तस्थौ ॥ ६०

असारसंसारपयोधिमज्जतां
त्राता त्वमेवाऽसि नृणां न चापरः ।
जानन्नपीदं यदभूवमुच्चै-
स्त्वदन्यसेवारसलम्पटोऽहम् ॥ ६१

ईक्षे कुमारान् व्रजतो हि यावतः
कर्तुं विनेयान् स्पृहयामि तावतः ।
स्वामिन् ! कुकर्मोदयतः किमेषा
प्रवर्धते लोभ-परम्परा मे ॥ ६२

इति स्तुतोऽर्हन् स्वहितानुशासन-
प्रमादजन्याचरणप्रकाशनात् ।
श्रीभानुचन्द्राभिध-वाचकस्य मे
भवे भवे त्वं भव बोधिलाभदः ॥ ६३

पू.उपा.श्री समयसुन्दरविजयविरचितम्

## ६६. ॥ श्रीवीतरागस्तव-छन्दोजातिमयम् ॥

श्रीसर्वज्ञं जिनं स्तोष्ये, छन्दसां जातिभिः स्फुटम् ।
यतो जिह्वा पवित्रा स्यात्, सु**श्लोको**पि भवेद्भुवि ॥ १

श्रीभगवन्तं भक्त्या, सुरनिर्म्मितसमवशरणमध्यस्थम् ।
देवा देव्यो मनुजा, **आर्या** मुनयश्च सेवन्ते ॥ २

कथं नौम्यऽहं तं जिनं स्तोतुमीशाः ।
सुभामा **सोमराजीव** युक्तानेसेन्द्राः (?) ॥ ३

प्रमुदित - हृदहं स्तुति-गुण-निकरे ।
मधुकर इव ते **मधुमति** कुसुमे ॥ ४

भ्रमति भ्राजमान सुतरां सर्व्व-लोके ।
तव कीर्त्तिविशाला धवला **हंसमाला** ॥ ५

दृष्टो मया-ऽर्त्तिहतो भाग्याद्भवं भ्रमता ।
श्रीवीतराग-जग-**च्चूडामणि** स्वमहो ॥ ६

शुक्लध्यान-श्रेणी वार्हन्, शुभ्रा दभ्रा प्रौढस्फुर्त्ते ।
त्वन्मूर्त्ते का वा पुष्पाणां, रेजे रम्या **विद्युत्माला** ॥ ७

भव्यजीवकृतभावुकं, पापवृक्षवनपावकम् ।
साभजित जनत जिन, **भद्रिका** भवति या भृशम् ॥ ८

नाश्रयति त्वां सद्गुणवन्तं, वञ्चित एवासौ गुणवृन्दैः ।
या मधुकृत प्राणी भगवन्तं, **चम्पकमाला**यामृतवन्तम् ॥ ९

क्षोभं नो प्रापयति कदाचित्सान्ते स्वाशतव गिरिधीर (?) ।
स्वर्गस्य स्त्री मदमदनेनोत्**मत्ता क्रीडा** करण विदग्धा ॥ १०

लोकप्रदीपाऽखिललोक–पापावलीपङ्कपयोद ! नाथ ! ।
जीयाज्जगज्जन्तुहितप्रदाता, न**मेन्द्रवंशा**भरण ! प्रभो ! त्वं ॥११

रूप्य–सुवर्ण–सुरत्न–मयोच्चैः, वप्र–सुमध्य–चतुर्मुख–मूर्त्तेः ।
त्वं जन राजसि मानव–तिर्यग्, दिवस–**दोधकर**–प्रतिबोधेः॥१२

मम चेतसि तीर्थकरोस्ति तमो, वद–हर्प्पति बिम्ब–रुचि–रुदये।
अध–पातक दतरं दयाया (?)
सहि**तोटकर**: सुमतेः सुगतेः ॥ १३

अहिकुलं गरुडा–गमने यथा, तव जिनेश्वरसंस्तवने तथा ।
अरिकरिज्वलनानल सम्भवं,
**द्रुत विलम्बित**–मुग्र–भयं भवेत् ॥ १४

भव–भय कानन–भेद–कुठारं, रतिपद सुन्दर–रूप मुदारम् ।
प्रणमत तीर्थकरं सुखकारं,
चरणन**तामरसं** (?) संतति–सारम् ॥ १५

देव ! त्वदीयशरणं समुपागतं मां,
संसार–सागर–भयादथ रक्ष रक्ष ।
स्नात भवेषु बहुशः सुख–वृक्ष–लक्ष–
वल्ली **वसन्ततिलका**त्मकुले कृपालो ! ॥ १६

त्रिभुवनहितकर्त्ता दुःखदावाग्निहर्त्ता,
विषम–विषय गर्त्ता सम्पतत्प्राणिधर्ता ।

जिनवर ! जयतात्त्वां देहि मे मोक्षतत्त्वं,
कलि-गह ? न कृशानो **मालिनी**हारमानो ॥ १७

अशरण-शरण-मरण-भय-हरण,
सुरपति-नरपति-शिवसुख-करण ।
जय जिनवर भव-जल-निधि-तरण,
**गुणमणि निकर**-चरण-मय-धरण ॥ १८

तिमिर-निकर-ध्वंश-सूर्य भवोदधि-तारणम्,
हित-सुखकर-भव्य-प्राणि-व्रजा-सुख-वारणम् ।
तव सुवचन पीयूषाभं करिष्यति नान्यथा,
नरकगतितो नश्येत् प्राणी यथा **हरिणी** हरेः ॥ १९

दुःखोत्या[त्पा]दि परिथा[भ्रा]ति (?) सहने नोत्साहभाजो भृशं,
सत्सांसारिक-सौख्य-लक्ष विषये व्यासक्तिमच्चेतसः ।
संसाराम्बुधि-मज्जदङ्गिनिकरोत्तारे समर्थस्तबन्तः (?),
साहाय्यं मम देहि संयमविधौ **शार्दूलविक्रीडितम्** ॥ २०

ब्रह्माणं केपि देवं पुनरपि गिरिशं केपि नारायणं च,
केचिच्छक्तिस्वरूपं पुनरपि सुगतं केचिदल्लाभिधानम् ।
मुग्धा ध्यायन्त्यहं सद्गुणमणिजलधिं वीतरागं स्मरामि,
को वाञ्छेत्काचमालां यदि मिलति
महाकाञ्चिनी **स्त्रग्धरायाम्** ॥ २१

एवं छन्दो जातिभिरभिष्टुतो वीतराग-गुण-लेशः ।
इति वदति समयसुन्दरं इह पर-जन्मेऽस्तु जिनधर्म्मः ॥ २२

पू.उपा. श्री समयसुन्दरविजयविरचितम्

## ६७. ॥ समस्याऽष्टकम् ॥

(अनुष्टुप्)

प्रभुस्नात्रकृते देवानीयमानान् नभे घटान् ।
रौप्यान् दृष्ट्वा नराः प्रोचुः शतचन्द्रनभस्तलम् ॥ १

रामया रममाणेन कामोद्दीपनमिच्छता ।
प्रोक्तं तच्चारु यद्येवं शतचन्द्रनभस्तलम् ॥ २

सर्वज्ञेन समादिष्टं सादृर्धद्वीपद्वये ध्रुवम् ।
द्वात्रिंशताधिकं भाति शतचन्द्रनभस्तलम् ॥ ३

हस्त्यारोहशिरस्त्राणश्रेणिमालोक्य सङ्गरे ।
पतितो विह्वलोऽवादीत् शतचन्द्रनभस्तलम् ॥ ४

दीपान् दीपालिकापर्वे कृतानुच्चैस्तरं निशि ।
वीक्ष्य विस्मयतो ज्ञातं शतचन्द्रनभस्तलम् ॥ ५

भुक्तधत्तूरपूरत्त्वाद् भ्रान्तदृष्टिरितस्ततः ।
अपश्यत्कोऽपि सर्वत्र शतचन्द्रनभस्तलम् ॥ ६

दर्पणश्रेणिमालोक्य सौधाभ्रंलिहतोरणे ।
स्माह सुप्तोत्थितः कोपि शतचन्द्रनभस्तलम् ॥ ७

नभः प्रकाशवद्भाति यथैकेन खरांशुना ।
तथा सखि कदापि स्यात् शतचन्द्रनभस्तलम् ॥ ८

यत्र तत्र जलस्थाने दृश्यते जलचन्द्रमाः ।
तत्किं सखि सञ्जातं शतचन्द्रनभस्तलम् ॥ ९

परस्परं बुधोल्लापे शतचन्द्रनभस्तलम् ।
समस्यामिति सम्पूर्णां चक्रे समयसुन्दरः ॥ १०

पू.पण्डितश्री पद्मसागरविजयविरचितः
नयप्रकाशापरनामकः

## ६८. ॥ श्रीजैनशासनस्तवः ॥

तस्मै नमः श्रीजिनशासनाय,
सत्सप्तभङ्गीनयवासनाय ।
आसाद्य माद्यन्ति यदीयदेश-
मप्यक्षपादादिकदर्शनानि ॥ (इन्द्रवज्रा) १

(उपजाति)

प्रमाणवाक्यं नयवाक्यगर्भितं,
निर्दूषणं दुर्नयवाक्यदूरितम् ।
स्यादेव युक्तं जिनराजशासने,
सतां चमत्कारकरं भवेन्न किम् ॥ २

एकत्र धर्माः युगपद्विरुद्धाः,
कालाद्यभेदान्निहिता हि येन ।
आदेशमासाद्य तमत्र शासने,
जयन्ति जैना परवादिदर्शनम्(ने) ॥ ३

क्रमान्नयाः सप्त परैर्गृहीताः,
परस्परं ये विवदन्त एव ।
सप्तापि ते श्रीजिनशासनेऽस्मिन्-
नेकीभवन्ति स्म जिनेन्द्रवाचा ॥ ४

यया विधिश्चापि निषेध एवा-
स्मिन् साध्यतेऽर्थे युगपत् क्रमाच्च-
सा सप्तभङ्गी जिनराजशासने,
जयत्यनेकान्तविचारवर्द्धिनी ॥ ५

विशेषसामान्यमयाः पदार्थाः
भवन्ति सर्वेऽप्यविशेषमेतत् ।
अर्थान्तरत्वं त्वनवस्थितेस्तयोर्न
स्यात् कदाचित् जिनराजशासने ॥ ६

यथातिभेदो विबुधैर्निरस्यते,
सम्बन्धहानेः खलु धर्मधर्मिणोः ।
भेदः कथञ्चित् तु तयोस्तथा न,
श्रीमज्जिनेन्द्रागमसम्मतस्तैः ॥ ७

उत्पादनाशस्थितिमद्घटात्मा-
दिकं मतं वस्तु जिनेन्द्रशासने ।
नाशादिकं ह्येकतरं न मन्यते,
चेत् स्यादिवासत् खसुमं तदार्थः ॥ ८

जयत्यसौ श्रीजिनशासनस्तवः,
स्याद्वादतात्पर्यनिबन्धबन्धुरः ।
नयप्रकाशाष्टकनामधारकः
स्वार्थं कृतः पण्डितपद्मसागरैः ॥ ९

पू.पं.श्री हर्षवर्द्धनगणिकृतम्

# ६९. ॥ श्रीसर्वजिनस्तोत्रम् ॥

मानवा जिनवर ! त्वयि शश्वन् - मानवारणहरे ! रचयन्ति ।
मानवारमिह ये बहुभक्त्ये-मानवाऽभिनतशक्र ! भवाब्धेः ॥१

पारदप्रवरवर्णभरेण, पार(?)दर्पकुमताम्बुजचन्द्र !
पारद ! त्रिजगतीश ! पुपूरे-ऽपार ! दभ्रितनताङ्गितमस्ते ॥ २

सावधान ! नयनैर्विजितैण-साव ! धानधन ! विश्वहिते त्वम् ।
सा वधान कृतजन्तुवृषैक - सावधानखिलवैरिसमाजान् ॥ ३

सत्त्वराजिविहिताद्भुतसौख्य-स्सत्त्वराजित ! भवार्णवपारम् ।
सत्त्वराजिविजितारिगण ! त्वं,
सत्त्वराऽऽजिरिन ! मां नय शीघ्रम् ॥ ४

आनताखण्डलाऽखण्डलाजादिभि-
र्वर्यसत्त्वा मुदा त्वामुदारं नराः ।
संयजन्ते सदा ते सदानामगुः, क्षिप्तहासं परं सम्पदं संविदाम्॥५

भीषणासारसंसारसंहारकं, दुःखसन्तारकं तारकण्ठाधरम् ।
मोहतापापहं पापहन्ता कृती,
त्वां विभोऽनादरं नाऽदरं नौति कः ॥ ६

पुण्यसारा वराराव ! रागोज्झिता, मोहसंहारिणी हारिणी भारती।
दुर्गतिं पङ्कजां पङ्कजांह्रिद्वया-ऽपास्यते सर्वदा सर्वदा ते विशाम्७

त्वं सदानन्दनो नन्द नोद्यापदां, क्षोणिभृन्नन्दनो नन्दनोद्यानवत् ।
शीतलोऽमान ! वा मानवार्च्यचितः, कृद्धवे मानवाऽमानवारिप्रद!८

सुजनताऽजनताज ! नता यका, वरमते ! रमतेऽरम ! ते शिवम्।
अममताम ! मताम ! मतालये, नरहिताऽरहिताऽऽर हि ताभरैः॥९

अविपदे विपदे विपदेहरुग् !, गतवतोऽतवतोऽत ! वतोदधेः ।
शुभवतो भवतो भवतोऽवता-
मसुमतः सुमतः सुमतः (त!) क्रमौ ॥ १०

असमरं समरं समरञ्जकं, प्रमददं मददं मद-दम्भहृत् ! ।
प्रकरते करतेकर ! ते वचो वितमसं तमसन्तमसम्भवम् ॥११

विनमतेऽनम ! तेऽनमते पदे-ऽरितपने तपने ! तपने त्विषा ।
गजगते ! जगतेऽज ! गतेहको, दिश मदं शमदं शमदम्भक !॥१२

जिनवरं नवरं नवरङ्गतो, गतमलं तमलं तमलं श्रये ।
कुकृतमाकृतमाकृतमाररुग् - विशरणं शरणं शरणं श्रियाम् ॥१३

समेतिः क्षयं मङ्क्षु यस्मात् समेति,
तमोदं जिनाधीश्वराऽनन्तमोदम् ।
क्षमाऽरं भवोत्तारणे त्वां क्षमारं,
दरागं स्तुवे धैर्यतो मन्दरागम् ॥ १४

विपक्षालिमध्येऽस्तपुण्या विपक्षाः,
समानन्दकृत् ! किं लभन्तेऽसमानम् ।
जयं ते ? शुभालीवने पूजयन्ते,
नरा ये जिनाधीश ! तुभ्यं न राये ॥ १५

भयानां प्रमाथिन् ! सुरेशेभयाना-
ऽन्तरङ्गारिविध्वंसक ! श्रीतरङ्गाः ।
सदायं भजन्ते नतानां सदायं,
सुखानि प्रकुर्या रमाणां सुखानिः ॥ १६

समूहं शरण्यं जिनानां समूहं, गुरूणां गुणौघैरपास्तागुरूणाम् ।
गरिष्ठान्निजश्वासतो द्रागरिष्टा-
श्रयध्वंसकानां पुमांसः ! श्रयध्वम् ॥ १७

क्रमाम्भोरुहैस्ते रमानन्ददानै-रमानं ददानैः शुभं भक्तिभाजाम् ।
भवारण्यतोऽनञ्जनः सार्थवाहै-
र्जनः सार्थवाहैर्लघूत्तार्यतेऽसौ ॥ १८

नयन्तं विनाशे सदारम्भवन्तं, सदारं भवं तन्द्रया सार्द्धमुच्चैः ।
प्रभो ! प्रौढवंशेऽसदारं भवं तं,
सदाऽरं भवन्तं श्रये भूरिभक्त्या ॥ १९

पदार्थावलीनां विदन्तं स्वरूपं,
विदन्तं स्वरूपश्रियाऽपास्तमारम् ।
महोत्साह ! सिद्धाविभाभासुराणां,
विभाभासुराणां ततिर्वन्दते त्वाम् ॥ २०

गुणा यस्य ते निस्तुषा रञ्जयन्त-स्तुषारं जयन्तस्त्रिलोकं जयन्ति।
प्रभो ! मुक्तिकान्तावराऽम्भोजवासा-
वराम्भोज ! वासाऽनिशं तं स्तुवेऽहम् ॥ २१

सकल ! सकलसम्पद्दायकं नायकं ना,
वरद ! वरदमादेर्लाभवन्तं भवन्तम् ।
महति महति कृत्ये सोऽधिकासोऽधिकारी,
भवति भवतिरस्कारक्षमाऽरं क्षमारम् ॥ २२

समय ! समयदानान्नेत्रकल्पाऽत्र कल्पा-
मल ! समल ! समग्रारम्भवारेऽभवारे ! ।

सरसि सरसिजास्यो यो न सोऽमानसो मा,
समव समवशीनस्त्वं सदायः सदायः ॥ २३

विभव ! विभवदाऽभ्रध्वानमध्वानमस्ता-
शिव ! न शिवनगर्या रक्षितारं क्षितारम् ।
भविकभविकद ! त्वां मोदराजं दराजं,
नमति न मतिवर्यो मोक्षमाणः समाणः ॥ २४

सदय ! सदय ! याऽपास्ताञ्जनाली जनाली,
विषयविषयनागे वैनतेयं नतेयम् ।
महद ! महदमुष्यै शंवर ! त्वं वरत्वं,
वितर वित ! रसात् त्वाऽभ्रमारिभ्रमारिः ॥ २५

विनय ! विनयसारं यामले यामले स-
च्चरण ! चरणयोस्ते श्रीनिशान्ते निशान्ते ।
विमल ! विमलते यो मानसं मान-संविन्-
मुदयमुदयतेऽस्मिन् वीतमोहे तमोहे ॥ (मालिनी) २६

श्रीसोमसुन्दरगुरुत्तमपादपद्म-सेवापरो रचितवान् जन एष हर्षात्।
आद्यन्तमध्य-यमकै[ः] स्तवनं त्रिलोक-
श्रीसोम ! सुन्दरगुणार्णव ! ते जिनेन्द्र ! ॥(वसन्ततिलका)२७

सार्वं मोहस्मरादिद्विपकुलदलनासक्तदुर्धर्षसिंहं,
दक्षो हर्षप्रकर्षात् सुविपुलकमलं संस्तवेनाऽमुना यः ।
भक्त्यैवं वर्द्धमानो नुवति लसदया-नन्द-सौख्य-प्रभाभि-
र्भित्वा(त्त्वा) संसारकन्दं स हि भजति महं मोहनीयं तमोभित्।२८

पू.आ.श्री सोमतिलकसूरिविरचितम्
श्रीपृथ्वीधर(पेथड)साधुकारित-

# ७०. ॥ श्रीजिनभुवनस्तवनम् ॥

(शार्दूलविक्रीडित)

श्रीपृथ्वीधरसाधुना सुविधिना दीनादिषूद्दानिना
भक्तश्रीजयसिंहभूमिपतिना स्वौचित्यसत्यापिना ।
अर्हद्भक्तिपुषा गुरुक्रमजुषा मिथ्यामनीषामुषा
सच्छीलादिपवित्रितात्मजनुषा प्रायः प्रणश्यद्रुषा ॥ १

नैकाः पोषधशालिकाः सुविपुला निर्मापयित्रा सता
मन्त्र-स्तोत्रविदीर्णलिङ्गविवृतश्रीपार्श्वपूजायुजा ।
विद्युन्मालिसुपर्वनिर्मितलसद्देवाधिदेवाह्वय-
ख्यातज्ञाततनूरुहप्रतिकृतिस्फूर्जत्सपर्यासृजा ॥ २

त्रिःकाले जिनराजपूजनविधिं नित्यं द्विरावश्यकं
साधौ धार्मिकमात्रकेऽपि महतीं भक्तिं विरक्तिं भवे ।
तन्वानेन सुपर्वपौषधवता साधर्मिकाणां सदा
वैयावृत्त्यविधायिना विदधता वात्सल्यमुच्चैर्मुदा ॥ ३

श्रीमत्सम्प्रतिपार्थिवस्य चरितं श्रीमत्कुमारक्षमा-
पालस्याऽथ च वस्तुपालसचिवाधीशस्य पुण्याम्बुधेः ।
स्मारं स्मारमुदारसम्मदसुधासिन्धूर्मिषून्मज्जता
श्रेयःकाननसेचनस्फुरदुरुप्रावृट्भवाम्भोमुचा ॥ ४

सम्यग्न्यायसमर्जितोर्जितधनैः सुस्थानसंस्थापितै-
र्ये ये यत्र गिरौ तथा पुरवरे ग्रामेऽथवा यत्र ये ।
प्रासादा नयनप्रसादजनका निर्मापिताः शर्मदा-
स्तेषु श्रीजिननायकानभिधया सार्द्धं स्तुवे श्रद्धया ॥(पं. कु.)५

श्रीमद्विक्रमतस्त्रयोदशशतेष्वब्देष्वतीतेष्वथो !
विंशत्यभ्यधिकेषु मण्डपगिरौ शत्रुञ्जयभ्रातरि ।
श्रीमानादिजिनः शिवाङ्गजजिनः श्रीउज्जयन्तायिते
निम्बस्थूरनगेऽथ तत्तलभुवि श्रीपार्श्वनाथः श्रिये ॥ ६

जीयादुज्जयिनीपुरे फणिशिराः श्रीविक्रमाख्ये पुरे
श्रीमान्नेमिजिनो जिनौ मुकुटिकापुर्यां च पार्श्वादिमौ ।
मल्लिः शल्यहरोऽस्तु विन्धनपुरे पार्श्वस्तथाऽऽशापुरे
नाभेयो बत घोषकीपुरवरे शान्तिर्जिनोऽर्यापुरे ॥ ७

श्रीधारानगरेऽथ वर्द्धनपुरे श्रीनेमिनाथः पृथक्
श्रीनाभेयजिनोऽथ चन्द्रकपुरीस्थाने सजीरापुरे ।
श्रीपार्श्वो जलपद्र–डाहडपुरस्थानद्वये सम्पदं
देयाद् वोऽरजिनश्च हंसलपुरे मान्धातृमूलेऽजितः ॥ ८

आदीशो धनमातृकाभिधपुरे श्रीमङ्गलाद्ये पुरे
तुर्यस्तीर्थकरोऽथ चिक्खलपुरे श्रीपार्श्वनाथः श्रिये ।
श्रीवीरो जयसिंहसञ्ज्ञितपुरे नेमिस्तु सिंहानके
श्रीवामेयजिनः सलक्षणपुरे पार्श्वस्तथैन्द्रीपुरे ॥ ९

शान्त्यै शान्तिजिनोऽस्तु ताल्हणपुरेऽरो हस्तिनाद्ये पुरे
श्रीपार्श्वः करहेटके नलपुरे दुर्गे च नेमीश्वरः ।
श्रीवीरोऽथ विहारके स च पुनः श्रीलम्बकर्णीपुरे
खण्डोहे किल कुन्थुनाथ ऋषभः श्रीचित्रकूटाचले ॥ १०

आद्यः पर्णविहारनामनि पुरे पार्श्वश्च चन्द्रानके
वङ्क्यामादिजिनोऽथ नीलकपुरे जीयाद् द्वितीयोः जिनः ।

आद्यो नागपुरेऽथ मध्यकपुरे श्रीअश्वसेनात्मजः
श्रीदर्भावतिकापुरेऽष्टमजिनो नागह्रदे श्रीनमिः ॥ ११

श्रीमल्लिर्धवलक्कनामनगरे श्रीजीर्णदुर्गान्तरे
श्रीसोमेश्वरपत्तने च फणभृल्लक्ष्मा जिनो नन्दतात् ।
विंशः शङ्खपुरे जिनः सचरमः सौवर्त्तके वामन-
स्थल्यां नेमिजिनः शशिप्रभजिनो नासिक्यनाम्न्यां पुरि ॥ १२

श्रीसोपारपुरेऽथ रूणनगरे चोरुङ्गलेऽथ प्रति-
ष्ठाने पार्श्वजिनः शिवात्मजजिनः श्रीसेतुबन्धे श्रिये ।
श्रीवीरो वटपद्र-नागलपुरे (ऽष्ठ)ष्टक्कार(रि)कायां तथा
श्रीजालन्धर-देवपालपुरयोः श्रीदेवपूर्वे गिरौ ॥ १३

चारूपे मृगलाञ्छनो जिनपतिर्नेमिः श्रये द्रोणते
नेमी रत्नपुरेऽजितोऽर्बुकपुरे मल्लिश्च कोरण्टके ।
पार्श्वो ढोरसमुद्रनीवृति सरस्वत्याह्वये पत्तने
कोटाकोटिजिनेन्द्रमण्डपयुते शान्तिश्च शत्रुञ्जये ॥ १४

श्रीतारापुर-वर्द्धमानपुरयोः श्रीनाभिभू-सुव्रतौ
नाभेयो वटपद्र-गोग-पुरयोः चन्द्रप्रभः पिच्छने ।
ॐकारेऽद्भुततोरणं जिनगृहं मान्धातरि त्रिक्षणं
नेमिर्विक्कननाम्नि चेलकपुरे श्रीनाभिभूर्भूतये ॥ १५

इत्थं पृथ्वीधरेण प्रतिगिरि-नगर-ग्राम-सीमं जिनाना-
मुच्चैश्चैत्येषु विष्वग् हिमगिरिशिखरैः स्पर्द्धमानेषु यानि ।
बिम्बानि स्थापितानि क्षितियुवतिशिरः शेखराण्येष वन्दे
तान्यप्यन्यानि यानि त्रिदश-नरवरैः कारिताकारितानि ॥ १६

पू.मु.श्री पद्मसुन्दरविजयविरचिता

# ७१. ॥ परमतव्यवच्छेदस्याद्वादद्वात्रिंशिका ॥

(वसन्ततिलका)

वन्दारुसुन्दरपुरन्दरमौलिमाला-
माणिक्यसंवलितचारुपदारविन्दम् ।
श्रीनाभिराजतनयं नयसानुकूल-
स्याद्वादवादिनमहं जिनमेनमीडे ॥ १

स्यात्कारसूत्रितजगत्त्रयवास्तुवस्तु-
विज्ञानदर्पणविजृम्भितविश्ववृत्तेः ।
भूयात् तव स्तवनतो मम युक्तिवल्ली-
हल्लीसके मलयमारुतचारुसंविद् ॥ २

एकान्तपक्षनयवादपरम्पराया,
नैकान्ततां विदधती तव सूक्तियुक्तिः ।
स्याद्बीजहृष्यसदसन्नयसिद्धमन्त्र-
मुक्तावली लसतु मे हृदयोपकण्ठे ॥ ३

**साङ्ख्यमताभिमतप्रकृतिपुरुषकल्पनानिराकरणम्-**

कर्ता प्रधानमगुणः पुरुषोऽस्ति भोक्ता
बुद्धिर्जडा मुकुरवन्नचिदर्थविज्ञा ।
आत्माक्रियश्च कुरुते न तु बन्धमोक्षा
वित्थं कुतर्कमुखराः त्वयि दुर्विदग्धाः ॥ ४

**नैयायिकाभिमतज्ञानस्वरूपनिराकरणम्-**

स्याद्वस्तु संविदितमर्थनिषङ्गजन्यं
ज्ञानं चिदात्मसमवेतमनात्मरुपम् ।

स्वान्यप्रकाश्यमसमञ्जसमुद्गिरन्ति
त्वच्छासनप्रणयसेवधि विप्रलब्धाः ॥ ५

**नैयायिकाभिमतेश्वरकल्पनाखण्डनम्-**

भू-भूधरादिकरणे करुणः स्वतन्त्रः
स्रष्टैक एव जगतोऽप्यतनुरनिच्छुः ।
सद्व्यापको ध्रुव इति त्वदुपज्ञशुद्ध-
सिद्धान्तबुद्धिविधुराः कुदृशो विवव्रुः ॥ ६

**मीमांसाभिमतयज्ञहिंसानिराकरणम्-**

यः श्रौतमन्त्रविधिना विहितो वधोऽपि
स्वर्गाय कल्पत इति क्रतुजो वधो न ।
स स्नाति पङ्किलजले न विशुद्धिकाम-
स्त्वत्सूक्तसूत्रकरुणाकरणानभिज्ञः ॥ ७

**अर्थाः स्वतोऽन्वयविपर्ययवृत्तिभाजो**

नार्थान्तरैरितरथा हि न धर्मिधर्माः ।
उद्गाय सर्वरजनीमिव घट्टशाला-
जातं प्रभातमपरे भवतः श्रयन्तु ॥ ८

स्यादाश्रयाश्रयिवशेन तु धर्मिधर्म-
भेदोऽपि चेदमिहवृत्तिरिहानुविद्धा ।
स्याद्दृष्टहानिरसमीक्षितकल्पनेत्थ-
मन्यादृशां भवतु च स्वपदे कुठारः ॥ ९

**नैयायिकाभिमतात्मस्वरूपकल्पनानिराकरणम्-**

अर्थेषु केष्वपि परेषु न सत्सु सत्ता
चिन्नात्मधर्म इह कश्चिदुपाधिभेदः ।

मोक्षः सुखानुभवसंविदभाव आत्मा
पाषाणकल्प इति कुण्ठधियस्त्वदन्ये ॥ १०

**आत्मविभुत्वनिराकरणम्-**

आत्मा स्वसंविदनुभूतगुणः स्वदेहे
नान्यत्र चिल्लवणिमाऽस्य कुतो विभुत्वम् ।
सर्वत्र चेत्कथमचेतनता घटादौ
भूमन्परे गुणिगुणव्यभिचारदुष्टाः ॥ ११

**अद्वैतवादनिराकरणम्-**

सत्या माया चेद् द्वयवादः स्फुटसिद्धो
मिथ्याऽसौ चेन्नास्ति घटादिव्यवसायः ।
विद्राणास्ते पाशभयात्प्रत्युपेता-
श्चै(दै)न्यं पाता पाति न पदे शराकुन्ताः ॥ (मत्तमयूर) १२

विद्या विद्याद्वैतमथो कर्मफलादे-
र्मुक्तै र्वध्यस्यागमसिद्धो द्वयवादः ।
लोकाद्वैतं चाऽपलपन्तः स्फुटदुष्टं
त्वद्दुष्टानां हीभ-निमीलनमद्वैतम् ॥ (मत्तमयूर) १३

**एकाऽनेकात्मस्वरूपं हि वाच्यं**

भेदाभेदा लिङ्गित वञ्चकञ्च ।
त्वद्बाह्यानामेककक्षाग्रहाणाम् ॥ (शालिनी) १४

**क्षणिकवादनिराकरणम्-**

हेतुः फलं च न तयोर्युगपत्प्रसूतिः
र्ज्ञानक्षणे विघटिते न पदार्थबोधः ।

नाऽद्वैतसंविदि पदार्थगुणोपलम्भः,
किं सौगतेषु सुगतत्वमताात्त्विकेषु ॥ (वसन्ततिलका) १५

शून्यार्थता यदि कुतो व्यवहारसन्धा
नो चेत्ततस्तदपि सन्धिपदे कुठारः ।
व्याघ्रस्तटीत्युभयतो भयमत्त्वदीये,
निष्कण्टकं जयति श्रीजिनशासनं ते ॥ (वसन्ततिलका) १६

**क्षणिकाभिमतवासनानिराकरणम्-**

वासं क्षणक्षयि यदा क्व च वासना नु
स्युतिः क्व नु क्षणततिर्विशरारुरूपा ।
भेदेतरानुभयदुर्घटमत्वदीया
वन्ध्या स्तनन्धयमिवाकलयन्ति तत्त्वम् ॥(वसन्ततिलका) १७

बार्हस्पतान्धकरिणोऽनुमितिं विनाऽन्यत्
तत्त्वाभिसन्धिमनुमातुमनीश्वरस्य ।
जीवाद्यपह्नवपरस्य विनोपपत्तिम्,
स्यान्नोचिती भणितयेऽत्र जिनः प्रमाणम् ॥(वसन्ततिलका)१८

सकलं प्रतिक्षण मुदेतिविलयमपि गच्छति ध्रुवम् ।
वस्तु जगति विदितं भविनामुपकारक इति
त्वमादिशः ॥ १९

यदनन्तधर्ममयवस्तु सकलमपि सत्त्वसाधनम् ।
स्वान्यकलननिरपेक्षतया
गगनारविन्दमिव यद् व्यजिज्ञपत् ॥ २०

यदनेकमेकमिव भेदनिल(यं)यविलयादपर्ययम् ।
द्रव्यनिगमविगमादखिलं खलु पर्यायात्ममवीवदत् भवान् ॥२१

सनयप्रमाणमपि वस्तु सकलविकलोपदेशतः ।
धर्मसमुदयविगाहपरां
नयसप्तभङ्गघटा(म्) अजीघटः ॥ २२

सविधिर्निषेध इति सत्त्वमसति सद्वा(वो)च्यते भिदा ।
तेन किमपि न विरोधि मिथो
गुणमुख्यताप्रणयणं न्यवीवदः ॥ २३

सदसच्च शाश्वतमनित्यत्वमनुगतमतो विपर्ययम् ।
वाच्यमितरदविरुद्धमिदं कथमेव कोटिमिति वावरिर्भवान् ॥२४

यदि भङ्गुरं किमुत नित्यमपि च सततं विविच्यते ।
वस्तु सकलमनुपाख्यतया
प्रतयत्यतीव नि(वि)रचायि तत्त्वया ॥ २५

असतो न जन्म न सतो विनशनमिति सर्वथा न ते ।
दीपविघटनत एव तमः
किल सत् तदस्ति हि विदाञ्चकार यः ॥ २६

सदिति नयः सदेव कुनयश्च कथञ्चन सत्,
प्रमितिरिति त्रिधाऽर्थ घटता घटते जगति ।
प्रमितिनयद्वयेन कुपेयं निरकासय
दित्यमलविदां मतोऽसि भगवन्निरुपाधितया ॥ २७

तव नयता विधा हृदि दधा मुद एव
निरवघाततयापि सुधा-।
जिन सुदृशां शिवाय च भवाय विरुद्धदृशां
रविरपितामसद्द्विजकुले घनभृङ्गनिभः ॥ २८

यदुत मितात्मतां हि भवतः शिवमेति शिवाद्
भवमगुणोऽपि चैत्यपरथा भवभङ्गभयम् ।
तव नहि दोष एष यदनन्तचिदात्ममयं
भुवनमुपादिशोऽन्वितप्रवादिविभुस्त्वमसि ॥ (नर्कुटक) २९

अपि कुदृशां दृशः स्व(पर)पक्षविपक्षतया
स्मयमुखराननतासु हृदिनीषु भवानुदधिः ।
त्वयि सकला मिलन्ति जलधाविव ताः सरितो
निश्चलनयात्मको हि भगवन् भवतः समयः ॥ (नर्कुटक) ३०

स्यात्काराङ्कितविग्रहास्तव नयाः सर्वार्थसिद्धिप्रदाः
विद्धाः सिद्धरसेन हाटकमयाः स्युर्लोहभेदा यथा ।
त्वच्छासनवासिताश्चरणयोर्वन्दारुवृन्दारकाः
भूयासुस्तव पद्मसुन्दरपदानन्दादमृताऽऽस्वादिनः ॥ ३१
(शा.वि.)

दृशैवैकाकिन्या भवति शकलं वस्तुविषयः
तदेव स्याद्वादद्वयनयनगम्यं हि सकलम् ।
जगद्बन्धो ! सिन्धोरमृतमिव मिथ्यात्वगरल-
प्रतीकारं तस्मात् तव मतमुदारं विजयते ॥ (शिखरिणी) ३२

पू.मु.श्री चारित्रसुन्दरविजयविरचितम्

## ७२. ॥ श्रीवीतरागस्तवनम् ॥

ॐकारस्फाररूपं परमपदगतं छिन्नमोहप्ररोहं
मायाहङ्कारमुक्तं त्रिगुणविरहितं त्यक्तनिःशेषसङ्गम् ।
ध्यायन्ति ध्यानगम्यं यमिह हृदि सदोद्योतिनं योगिनाथा-
स्तं वन्दे देवदेवं निरुपमपरमज्ञानतेजःस्वरूपम् ॥(स्रग्धरा)१

न क्रोधो न भयं न मोहमहिमा नाऽहङ्कृतिर्नो मृति-
र्न द्वेषो न जरा न चाऽरति-रती निद्रा न यस्य क्षुधा ।
लोकालोकविभासकं निरुपमं यज्ज्ञानमव्याहतं
नीरागाय निरञ्जनाय निरहङ्काराय तस्मै नमः ॥ (शा.वि.) २

मोहद्रोहपरः स्वकर्मगहनं भस्मीचकाराऽखिलं
शुक्लध्यानहुताशनेन सहसा यो योगिचूडामणिः ।
प्राप्तानन्तचतुष्टयं गतभयं निःसङ्ख्यतेजोमयं
तं वन्दे जिनमप्रमेयमहिमागारं सुरेशार्चितम् ॥ (शा.वि.) ३

भक्तिं ते जगदीश ! ये जडधियो हित्वा परैः कर्मभिः
कायक्लेशकरैस्तपःप्रभृतिभिः क्लिश्यन्ति मुक्त्याप्तये ।
तेषां क्लेशभरं विमुच्य भगवन्नाऽन्यत् फलं सम्भवे-
न्नूनं स्थूलतुषावगहारनकृतां यद्वज्जनानामिह ॥ (शा.वि.) ४

गर्वावेशविसंस्थ(स्थु)लाः कति सुराः केचिच्च रोषोद्धुराः
केचित् कामविडम्बिताः कति जगद्व्यापारबद्धादराः ।
रागद्वेषपराङ्मुखः शमरसास्वादैकबद्धस्पृहो
नीरागो निरहङ्कृतिस्त्वमिव नो देवः परः श्रीजिन ! ॥(शा.वि.)५

वश्या सिद्धिवधूर्ध्रुवं करतले ताः सिद्धयोऽष्टावपि
स्वर्गश्चात्मगृहं सुकेवलरमा तेषां न दूरस्थिता ।
ये त्वां जन्मजरान्तदुःखदलनं संसारवारच्छिदं
कर्मातीतमनन्तमुज्ज्वलतरं ध्यायन्ति योगीश्वराः ॥(शा.वि.) ६

ते धन्यास्ते गुणज्ञास्त इह सुनिपुणा ज्ञानतः स्वास्त एव
श्लाघ्यास्ते ते नमस्या जगति गुणवतां ते सदभ्यस्तशास्त्राः ।

योगाभ्यासे निलीना असमशमरसास्वादपीना हृदन्त-
र्ये त्वामव्यक्तरूपं जिनवर ! दिवसाश्चिन्तयन्तो नयन्ति ॥ ७
(स्रग्धरा)

वीतातङ्कं विशङ्कं विगतकलिमलं निश्चलं निःकलङ्कं
ध्येयं ध्यातृप्रदत्तोत्तमसुखनिचयं ध्यानगम्यस्वरूपम् ।
ध्यायेदव्यक्तरूपं स्वहृदयकमले यश्चिदानन्दकन्दं
त्वामानन्दाद् वृणीते प्रगुणगुणगणं तं स्वयं मुक्तिलक्ष्मीः ॥ ८
(स्रग्धरा)

तत्त्वज्ञानमयं महोदयमयं कारुण्यलीलामयं
शान्तं सूक्ष्ममनन्तमक्षरमनाकारं परं त्वां विभो ! ।
ध्यायेद् यो हृदयाम्बुजे हततमस्तोमं शतार्कप्रभं
तस्याऽऽदेशकरी च निर्वृतिपुरी निःसङ्ख्यसम्पत्करी ॥ ९
(शा.वि.)

रामास्त्रेण जिगाय यो हरिहरब्रह्मादिदेवान् क्षणाद्
ध्यानाग्नौ मदनृत्तमाप मदनः स ख्यातवीर्योऽपि ते ।
ज्ञानाब्धौ त्रिजगद् बिभर्त्ति भगवन् ! सूक्ष्मैकमत्स्योपमां
स त्वं कोऽपि जिनाऽस्यचिन्त्यमहिमा तत्त्वं परं योगिनाम् ॥ १०
(शा.वि.)

गात्रं पात्रं कृपायाः परमशमरसास्वादहृद्या गिरस्ते
शत्रौ मित्रे समानं हृदयमपगतद्वेषरागं सदैवम् ।
दुर्जेयं मोहमल्लं तदपि किल भवान् द्राग् विजिग्य(ग्ये?) स्वरूपं
तत् ते को वेत्ति सम्यग् जिनवर ! विमलज्ञानिनं वै विहाय ॥ ११
(शा.वि.)

यद्वद् हंसाः स्मरन्ति प्रतिदिनममलं मानसं मानसान्त-
श्चन्द्रं यद्वच्चकोरास्तरपि(णि)मुरुरसाच्चक्रवाका यथैव ।
स्वामिन्नव्यक्तरूपं परमपदगतं पुण्यपापोज्झितं त्वां
तद्वद् ध्यायन्ति नित्यं त्रिभुवनमहितं योगिनो मोक्ष[लब्ध्यै ?]॥
(स्रग्धरा) १२

याचे न प्राज्यराज्यं न च विषयसुखं न श्रियं नापि भोगान्
न स्वर्गं न त्रिवर्गं न च वररमणीसङ्गमं नोरुकीर्तिम् ।
वृत्तादिप्रोक्तमन्त्रस्मृतिधृतिरुचिरं नित्यवैराग्यरङ्गं
चारित्रं सुन्दरं मे जिन ! जननहरं देहि त्व (स)द्भक्तियुक्तम् ॥
(स्रग्धरा) १३

पू.मु.श्री आनन्दवल्लभविजयविरचितम्

## ७३. ॥ षीचून्दजिनाधिपतिस्तवनम् ॥

शङ्के नृलोकं कलिभीमसिन्धोरुद्धर्त्तुकामः प्रकटीबभूव ।
यो विश्वमानं मुनिसेवितं तं, वन्दे चतुष्षष्टिजिनं मुदाऽहम् ॥१
(इन्द्रवज्रा)

(उपजाति)

वराङ्गनागानसमूहयुक्तं, दशाङ्गधूपार्पणचारुभक्तिम् ।
सद्गन्धपुष्पार्चितपादपद्मं, वन्दे चतुष्षष्टिजिनं मुदाऽहम् ॥२

सुश्रीकटीपालिसुदीप्तिमन्तं, नवीनपक्वान्नकृतोपहारम् ।
विन्यस्तमुक्ताफलस्वस्तिकाग्रं, वन्दे चतुष्षष्टिजिनं मुदाऽहम्॥

तीर्थोऽदकव्यूहनिषिक्तगात्रं, सुगन्धिवासादिविलिप्तदेहम् ।
सुनालिकेरादिफलार्चनीयं, वन्दे चतुष्षष्टिजिनं मुदाऽहम् ॥४

यस्याग्रतो देवनरेन्द्रसङ्घाः, कुर्वन्ति भक्त्या परया सहर्षम् ।
आरात्रिकां तं भवनाशदक्षं, वन्दे चतुष्षष्टिजिनं मुदाऽहम् ॥५
(इन्द्रवज्रा)

इत्यष्टभेदां बुधवृन्दमान्यां, भव्याश्रितां मोक्षपथानुकूलाम् ।
सुद्रव्यपूजां लभमानमार्यं, वन्दे चतुष्षष्टिजिनं मुदाऽहम् ॥ ६
(इन्द्रवज्रा)

गजादिभीनाशकरं सदैव, सर्वार्थदानैकसुरद्रुकल्पम् ।
आधिप्रणाशे सुधियांसुरत्नं, वन्दे चतुष्षष्टिजिनं मुदाऽहम् ॥७

षीचून्दसुस्थानविराजमानं, गवाक्षजालान्वितमन्दिरस्थम् ।
सज्ज्ञानयोगीश्वरयातपारं, वन्दे चतुष्षष्टिजिनं मुदाऽहम् ॥ ८

चतुर्णिकायाधिपसेवनीयं, विद्याधरेन्द्रार्जितहृद्यसेवम् ।
अतीन्द्रियं शान्तिकरं जनानां, वन्दे चतुष्षष्टिजिनं मुदाऽहम्॥९

निधि-कायाष्ट-सिध्यब्दे(१८९५), आषाढे माससश्रमे ।
तृतीयाकर्मवाट्यां च, चतुष्षष्टिजिनाधिपः ॥ (अनुष्टुप्) १०

विदुषो रामचन्द्रस्य, विनेयेन हितैषिणा ।
आनन्दवल्लभेनाऽसावनावि स्तोत्रतो मुदा ॥ (अनुष्टुप्) ११

पू.श्री महीमेरुमुनिविरचिता

# ७४. ॥ श्रीजिनस्तुतिपञ्चाशिका ॥

(क्रियागुप्ता) (आर्या)

सकलसुरेश्वरमुख्या विबुधाः सुविशुद्धबुद्धिनिधयोऽपि ।
स्तवनं तीर्थाधिपते ! जिनेश ! ते नैव कर्तुमिह ॥ १

इति जानन्नपि नित्यं तथाप्यहं मुग्धमानसः पवितुम् ।
विनयी हे जिनराज ! स्तवनमिषात्ते निजां जिह्वाम् ॥ २

मन्ये न सर्वशास्त्रे तव वृत्तं विबुधवर्ण्यमानमिह ।
पुण्यप्रभूतगुरुतरमहिमाऽतिक्रान्तसकलसुरम् ॥ ३

स्तुतिवादीक्षेऽमकरध्वजं जिन ! त्वां सुरेशसंसेव्यम् ।
समवसृतिमध्यभाजं संसृतिहरणं कदा मोदात् ? ॥ ४

तत्त्वतरुजलदधारासासितभूवलय ! भव्यजनवाराः ।
अतिशयसमूहशाली नाथ ! भवांश्चरणगुणपाली ॥ ५

सकल ! ससार ! सलक्षण ! संसारासारतां समधिगत्य ।
सर्वज्ञ ! सर्वसङ्गे भगवन्न भवानभावाय ॥ ६

संसारवारिराशिं विषमतरं दुस्तरं च जिनराज ! ।
विदभासिततारसुखं लब्ध्वा वैराग्यमत्र भवान् ॥ ७

भाषितशुचिसत्यागम उदितोदितधाम ! सद्गुणग्राम ! ।
कृत्वा कर्मनिरासं दूरीकृतदुःखभववासम् ॥ ८

निर्जितमनोज ! हारोज्ज्वलगुणमण्डल ! विशालतमभाल ! ।
कृपया भावारिभयं भविनां भूमौ भवानेव ॥ ९

अष्टविधकर्मरोगापनोदविशदागदः सदा विमदः ।
त्वमविपदं जन्तूनां हितेच्छया शुद्धसिद्धान्तम् ॥ १०

शशिशोभमानसाधित यशोऽतिधवलीकृतावनीवलयः ।
निःशेषजन्तुकरुणां निष्कारणवत्सलोऽत्र भवान् ॥ ११

कनकविराजितमोचे सुरनरतिर्यग्विजातसङ्कोचे ।
भवतेश ! समवसरणे द्वेधा धर्मो धराभरणे ! ॥ १२

न कदा करुणाम्बुनिधे रजनीश ! परोपकारिता भवतः ।
विद्रुतेह यथा तपनात् प्रकाशिता विश्वविश्वहिता ॥ १३

उज्झितसंसृतदोषे पापिन्यपि जनितपुण्यमतिपोषे ।
मैत्र्याऽपरत्र रोषे निरीक्षिते भवति कृततोषे ॥ १४

ननु निर्ममे त्वदीये हृदये जिन ! वेद्मि मुदितया वासः ।
मित्रामित्रेषु यतस्त्वमेकरूपः सदा विदितः ॥ १५

शिवपदसाधनविहितादरस्य भवतस्तपः समाचरतः ।
हृदये सत्क्षान्तिमये स्थानं न कदापि रोषेण ॥ १६

दुःसहसुरनरतिर्यक्कृतोपसर्गावली त्वया त्रेधा ।
विश्वे क्षमीश ! सम्यक् सिद्धिसुखास्वादरसिकेण ॥ १७

दुर्जनजनेन लपितं दुर्वचनं श्रवणशूलसदृशमपि ।
भवता सुरपतिविहितस्तुतितुल्यममानिमुनिमुख्य ! ॥ १८

भव्यजननयनकैरववने विकाशं सदा ददानेन ।
चन्द्रोपमितिर्भवतासितेन युक्तं जगन्नाथः ॥ १९

विषयमतिविषमरजनीविनाशमनिशं वितन्वता भवता ।
रवितोऽधिकेन लोके भावि ख्यातिप्रतापेन ॥ २०

भव्यविभारोचिष्णुर्निराकरिष्णुर्भवं भयोपेतम् ।
एकस्त्वमेव संवरमिन्द्रियजयसम्भवं सत्यम् ॥ २१

चित्रं विशददयास्थः क्षमावतां मुख्यतां सदैव दधत् ।
सकलं भावारिकुलं नाथ ! त्वं त्रिभुवने विदितः ॥ २२

अमृतरसादपि समधिकरसं विशेषादशेषशान्तरसम् ।
नक्तं दिवापि चित्रं त्वं न सदा सावधान जिन ! ॥ २३

ननु नव्यरम्यरञ्जितसुरनम्यपद ! प्रभावतो भवतः ।
आजन्मजातवैराच्चित्रं तिर्यग्गणेनापि ॥ २४

विदितचरित्रेषु रहो मुख्यां के के न विषयजं सौख्यम् ।
जिनवर ! भवता तु जने तत् त्यक्तं विषमिवाऽवेत्य ॥ २५

दोषैरष्टादशभिर्नाथ ! मनस्ते मलीमलं न जने ।
समतानितरां क्षालितकर्ममलत्वात् कदाचिदपि ॥ २६

इह ते विशदाचाराचरणपरस्य प्रभो ! मनो न मनाक् ।
संवेगसावधानं कदापि पञ्चप्रमादेषु ॥ २७

हरिहरमुख्या देवा जिन ! विख्याता जगत्त्रये सन्तु ।
त्वय्येव परं प्रकटं दृश्यतया वीतरागत्वम् ॥ २८

परिनम्रनृपे देदीप्यमानचरणे सुभक्तिरिह भवति ।
येन जिनेश्वर ! सत्या दुःप्रापा मुक्तिरपि तेन ॥ २९

प्रकटितसुख ! कलिकाले लयालयं शमरसं जने योऽत्र ।
स तव प्रसादविशदः परमां पुष्टिं जगामैवम् ॥ ३०

ये परमायुरमायं तव शासनयानपात्रमतिनिविडम् ।
ते तेरुरतारतरं भवजलधिं लीलया लोके ॥ ३१

ये दुर्गतिभयभीता नैव विकारेषु मानसं स्वीयम् ।
लब्ध्वा ते जिन ! वचनं ते धन्याः शिवपुरं प्राप्ताः ॥ ३२

या भवमतयो धुर्या मोहबले मुख्यतां क्षमाधीश ! ।
तास्तत्त्वज्ञस्तरसा तवाज्ञया वर्जिताः सततम् ॥ ३३

कामाग्निं जलद ! दुर्बलदुःखक्षेप्येषु ये कषायेषु ।
चित्तप्रसरं न जनास्ते वसुधायां तवादेश्याः ॥ ३४

यः परमविभाव ! सदानन्दमये तव मते ह्यकम्पमतिः ।
तस्य जिनेश्वर ! विश्वे न दुर्लभा शिवपदावाप्तिः ॥ ३५

यः किल निर्मलमनसाऽस्मरदेवममाय ! निर्ममाधीश ! ।
तव नाम महामन्त्रं समीहितं करगतं तस्य ॥ ३६

यः श्रीजिनेन्द्र ! मिथ्यामतिमुदितो मानसे नवक्रोधात् ।
शुभवति भवति द्वेषं नहि भवति स भव्यताशाली ॥ ३७

सङ्ख्याव्यतीतनवनवभवसम्भूतानि पापकर्माणि ।
तव शिवकर ! सद्ध्यानाज्जिनातिभक्तिप्रसक्तात्मा ॥ ३८

तापं पापं च जने समन्ततः सन्ततं निरस्यन्ती ।
तव वागविबुद्धेर्गङ्गावादीन्द्रवर्ण्यतम ! ॥ ३९

तादृक्षसमवसरणं भवभयहरणं जगत्त्रयीशरणम् ।
न तव पुरा के भव्या दृष्ट्वा पुरतः परानन्दम् ? ॥ ४०

भक्त्या धाम मनोरमसुरनिर्मितसमवसरण ऋद्धिवरम् ।
हृदये भवन्तमीशं न वयं मिथ्यात्वमतिमूढाः ॥ ४१

सुरतरुरिह तव चरितं निशम्य मन्ये विदूरतरदेशम् ।
चिन्तातिगफलदातुर्बहुधाम विराजमानस्य ॥ ४२

अकृतकलाविलासादिलातलाभासिकेवलालोकात् ।
भवतोऽधिगत्य सुकृतं संसारं मूलतः सुजनः ॥ ४३

विज्ञप्तेः पापपारावदलितनरकालिमोहनृपकारा ।
कांस्कान्न ते जिनाज्ञा सुपालिता साधुजनमान्या ॥ ४४

आज्ञा यदि त्वदीया लब्धा भवकोटिदुर्लभेह मया ।
तत्तां कामगवीमपि नाहं तु समीहया युक्तः ॥ ४५

संसारे कान्तारेऽनन्तभवान्नाथ ! जन्तुनाऽनेन ।
दुःखं वचनातीतं विना तवाज्ञां जिनाधीश ! ॥ ४६

त्रिभुवनविदितोद्द्योत त्वयि दृष्टे यद्यहं न जगदीश ! ।
मोहान्धकारभिदुरे सकोऽपि दोषो ममैव तदा ॥ ४७

नित्यं प्रीणितहृदये भाषितनिःशेषजन्तुजातदये ।
विहितान्तरारिविजये त्वयीक्षिते मोदमहमभये ॥ ४८

सितकरसौम्यतरास्ये योगिजनैस्तत्त्वतस्तु समुपास्ये ।
मोहेनाहं दास्ये कथं त्वयीशे श्रितेऽहास्ये ? ॥ ४९

अहमिह हरिहरमुख्याऽनेकसुराणां चरित्रमाकर्ण्य ।
त्वामेव देवदेवं निष्कारणवत्सलं लोके ॥ ५०

भव्यजनेशाधीश्वर ! पवित्रचारित्रराधनं सुमतिम् ।
सततं समीहमानं माममलज्ञाननीरनिधिः ॥ ५१

पदनतनिर्जरराजे भवत्यहं सेवकोऽपि गाढतरम् ।
तेन त्वदीयसेवा भवे भवे म[द्] भृशं भूयात् ॥ ५२

गच्छाधिपश्रीजयकीर्त्तिसूरिशिष्यो महीमेरुरहं स्तवं ते ।
कृत्वा क्रियागुप्तकवित्वमित्थं
त्वामेव दध्यां हृदये जिनेन्द्र ! ॥ ५३

पू.मुनिश्री रूपचन्द्रविजयविरचिता

## ७५. ॥ समस्तजिनस्तुतिः ॥

पद्धडी

जय वीतमोह ! जय वीतदोष !
जय वीतलोभ ! जय वीतरोष ! ।
जय वीतराग ! देवाधिदेव !
मम भवतु नाथ ! तव शरणमेव ॥ १ ॥ आंकणी ॥
जय वीतमान ! जय वीतमाय !
जय शान्तिकान्त ! विगतान्तराय ! ॥ २ ॥ जय.

जय निर्विकार ! भवनिःप्रचार !
जय कर्मकन्द कल्पनकुठार ! ॥ ३ ॥ जय.

जय निर्विकल्प ! विमलावलोक !
जय वीतकाम ! जय वीतशोक ! ॥ ४ ॥ जय.

जय विश्वनाथ ! विशदात्मरूप !
जय सिद्ध रूपचन्द्राभिरूप ! ॥ ५ ॥ जय.

पू.मु. श्री विवेकसागरविरचितः

## ७६.॥ हरिशब्दार्थगर्भितःश्रीवीतरागस्तवः ॥

इन्द्रे-भा-श्व-शुक-प्लवाऽहि-पवन-स्वर्णा-शु-लोकान्तरे-
भारि-ब्रध्न-कपी-न्दु-पीत-गरुड-श्री-शुक्र-विष्ण्वऽ-र्कजैः।
सूत-स्कन्द-शनी-श-वंश-वरुण-प्राणाऽ-ग्नि भीताऽऽसितै-
रर्थैस्त्वां हरिजैः क्रमाज्जिनपते ! त्रिंशन्मितैः स्तौम्यहम् ॥ १
(शार्दूल०)

(तोटक)

भज भक्तिविनम्रनरेशहरिं भज कर्ममहीरुहभङ्गहरिम् ।
भज सिद्धिपुरीपथपान्थहरिं भज योगिमनःसहकारहरिम् ॥ २
(पादाकुलकम्)

भज वाणिफणिह्व(क्ष)तवादिहरिं भज भीमभवानिलहानिहरिम्।
भज पापरजोव्रजनाशहरिं भज सौवशरीररुगस्तहरिम् ॥ ३

भज शोकतटाकतपोऽर्कहरिं भज चिद्विदिताङ्गिसमस्तहरिम् ।
भज दर्पमतङ्गजराजिहरिं भज पारगतं तिमिरौघहरिम् ॥ ४

भज यन्त्रितपञ्चहृषीकहरिं भज वादिकदम्बककोकहरिम् ।
भज चम्पकसूनविशेषहरिं भज मारसरीसृपजग्धिहरिम् ॥ ५

भज दत्तनमज्जननैकहरिं भज लोकदनूद्भवशास्तिहरिम् ।
भज तं नरकक्षयकारहरिं भज रूपरमापरिभूतहरिम् ॥ ६

भज केवलकाञ्चनसिद्धिहरिं भज हासहिमप्रभशीलहरिम् ।
भज सौख्यविधातृतृतीयहरिं भज मोहविषाभ्यवहारहरिम् ॥७

भज जन्मपवित्रितहारिहरिं भज संयमनीरधिवासहरिम् ।
भज रक्षितसर्वजनौघहरिं भज कर्मसमिद्दहनैकहरिम् ॥ ८

भज दुस्तरसंसृतिसङ्गहरिं भज नेत्रविकारविनाशहरिम् ।
भज शारदचन्द्रसमानयशोघनसारसुगन्धितभूवलयम् ॥ ९

जिनवर ! परमार्हतस्तवरते व्यरचि मया गुरुसोमसुन्दरास्य (?)
प्रवितर सुविशालराजराजद्गुणं मम वर्यविवेकसागरं त्वम् ॥१०

पू.आ.श्री जैत्रसूरिशिष्यकृता

## ७७. ॥ श्रीवीतरागस्तुतिः ॥

(वसन्ततिलका)

शान्तं शिवं शिवपदस्य परं निधानं
सर्वज्ञमीशममलं जितमोहमानम् ।
संसारमारवपथाद्भुतनिर्झरागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ १

अव्यक्तमुक्तिपदपङ्कजराजहंसं
विश्वावतंसममरैर्विहितप्रशंसम् ।
कन्दर्पभूमिरुहभञ्जनमत्तनागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ २

दुःकर्मभीतजनताशरणं सुरेन्द्रै-
र्निश्शेषदोषरहितं महितं नरेन्द्रैः ।
तीर्थंकरं भविकदापितमुक्तिभागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ ३

दान्तं नितान्तमतिकान्तमनन्तरूपं
योगीश्वरैः किमपि संविदित(श्च रुपम्)स्वरूपम् ।
संसारवारिनिधिमन्थनमन्दरागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ ४

संसारवारिनिधितारणयानपात्रं
ज्ञानैकपात्रमतिमात्रमनोन्यगात्रम् ।
दुर्वारवा(मा)रघनवातनिशातनागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ ५

कल्याणवल्लिनवपल्लवनाम्बुवाहं
त्रैलोक्यलोकनयनैकमुधाप्रवाहम् ।
सिद्ध्यङ्गनावरविलासनिबद्धरागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ ६

दारिद्र्यदुःखवनदावदुरन्तनीरं
मायामहीस्फुटविदारणसारसीरम् ।
वाणीतरङ्गनवरङ्गधरं तडागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ ७

कल्याणकीरविहितालयकल्पवृक्षं
ध्यानानलज्वलितमानमदादिकक्षम् ।
नित्यं क्षमाधरगुरुं गुरुशेषनागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ ८

श्रीजैत्रसूरिविनतक्रमपद्म(युग्म)मेनं
लीलाविनिर्दलितमोहमहेन्द्रसेनम् ।

हेलाविलङ्घितभवाम्बुधिमध्यभागं
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥ ९

पू.मुनिश्री रत्नसिंहविरचितम्

## ७८. ॥ श्रीसर्वजिनस्तोत्रम् ॥

(भुजङ्गप्रयात)

नमस्ते सदानन्दसन्दोहकारिन्
नमस्ते नमस्ते गुणव्रातधारिन् ! ।
नमस्ते विभो ! विश्वविज्ञातकीर्त्ते !,
नमस्ते नमस्ते जनाद्वैतमूर्ते ! ॥ १

नमस्तेऽन्तरङ्गारिविध्वंसवीर !,
नमस्ते नमस्ते सुपर्वाद्रिधीर ! ।
नमस्ते महानन्दमाकन्दकीर !,
नमस्ते नमस्ते शुगप्पित्तनीर ! ॥ २

नमस्ते नमन्नाकिनाथस्तुताय,
नमस्ते नमस्ते शिवश्रीयुताय ।
नमस्तेऽघतापस्फुरच्चन्दनाय,
नमस्ते नमस्ते जनानन्दनाय ॥ ३

नमस्ते महामोहमातङ्गसिंह !,
नमस्ते नमस्ते हतानागरंहः (हताऽनङ्गरंह !) ।
नमस्ते सुधासिन्धुजिद्वाग्विलास !
नमस्ते नमस्ते शिवश्रीनिवास ! ॥ ४

नमस्ते तमस्तोमनिर्नाशनांशो !,
नमस्ते नमस्ते सुधीदृक्सुधांशो ! ।
नमस्ते समस्तावलोकावबोध !,
नमस्ते नमस्ते कृतक्रोधरोध ! ॥ ५

नमस्ते सुधारश्मिरम्याननाय,
नमस्ते नमस्ते समस्तावनाय ।
नमस्ते गुणव्याप्तदिङ्मण्डलाय,
नमस्ते नमस्ते नताखण्डलाय ॥ ६

नमस्ते भजे पादपद्मं त्वदीयं,
नमस्ते नमस्ते क्षिपाऽघं मदीयम् ।
नमस्ते विभो ! पाहि मं(मां) दासदासं,
नमस्ते नमस्ते तनु स्वाङ्कवासम् ॥ ७

श्रीसङ्घहर्षसुविनेयकधर्मसिंह-
पादारविन्दमधुलिण्मुनिरत्नसिंहः ।
श्रीमज्जिनेश्वरगुणग्रहणप्रसक्तः,
स्तोत्रं चकार रुचिरं चिरभक्तियुक्तः ॥ (व.ति.) ८

पू.मु. श्री रत्नसिंहविजयविरचितम्

## ७९. ॥ आनन्दलहरी ॥

(शिखरिणी)

चिदानन्दं नत्वा विशदविधिनाऽऽनन्दलहरीं
सुधाधारासाराममरपदविश्राणनफलाम् ।

ब्रुवे पादं पूर्वं चरममय सौन्दर्यलहरी-
स्तवादासाद्योच्चैर्जिनपदगुणग्रामरुचिराम् ॥ १

तनीयांसं पांसुं तव चरणपङ्केरुहभवं,
ललाटे ये भक्तिप्रणतिवशतः साधु ददते ।
लभन्ते ते भव्या जनव(वि)दितजैनेन्द्रपदवीं,
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम् ॥ २

समुन्मीलत्संवित्कमलमकरन्दैकरसिकं,
प्रभो ! प्राणायामप्रभृतिभिरुपायैर्निजहृदि ।
सनाध्यानासक्तिस्तिमितनयनास्त्वामवितथं,
महान्तः पश्यन्तो दधति परमाह्लादलहरीम् ॥ ३

शिवं(वः) शक्तिः कामः क्षितिरथ रविः शीतकिरणः,
सुखं सत्त्वं तत्त्वं त्वमसि मम माहात्म्यमतुलम् ।
कृपासिन्धोस्ते तच्चरणपरिचर्याप्रवणधी-
र्भवानि ! त्वद्दासे मयि वितर दृष्टिं सकरुणाम् ॥ ४

दृशा द्राघीयस्या ह्यविदलितनीलाम्बुजरुचा,
सुचारुश्रीमत्त्वद्वदनकमलालोकनपरः ।
स्फुरद्भक्त्यासक्त्या पुलकिततनुः श्रीपतिरिव,
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः ॥ ५

दवीयांसं दीनं स्नपय कृपया मामपि शिवे,
स्पृहासक्तस्वान्तं शुचिसमयवाक्यामृतरसैः ।
अयं पुण्यः पापः किमिति न विधेयं मनसि यद्,
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥ ६

क्वणत्काञ्चीदामा करिकलभकुम्भस्तनभरा,
नितम्बिन्योऽनेका मदनमदहृत्वर्ष्म विरुजम् ।
यशः शुभ्रं दिव्या द्युतिरिह भवत्पत्कजनते
मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः ॥ ७

महापद्माटव्यां मृदितमलमायेन मनसा,
स्वयं गत्वा भक्त्या सुमु(म)निचयमानीय महसा ।
तवाऽर्चां यः कुर्यात्सकृदपि तदुक्तेन विधिना,
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीम् ॥ ८

भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरी
पयःपारावारं भवति ननु तेषामथ तदा ।
प्रणाशोऽज्ञानस्य प्रतनघनघोरं यदुदितं,
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥ ९

दरिद्राणां चिन्तामणिगणनिका जन्मजलधौ,
निमज्जज्जन्तूनां प्रवरतरणिः शं वितनुतात् ।
तवाऽमोघा वाणी विशदगुणसन्दोहसुभगाः,
जडानां चैतन्यस्तबकमकरन्दस्रुतिशिरा ॥ १०

भवात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं,
विना त्वां नो कश्चिद् प्रभुरिह जगन्नाथ ! जगति ।
अतस्त्वामेवोच्चैर्गुणगण ! नयामि स्तुतिपथं,
वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥ ११

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननी,
यथेच्छं कर्णाभ्यां तव गिरमथापीय मधुराम् ।

यथा मोदं धत्ते मनसि निभृतं नाम न तथा,
सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरि(र)णीम् ॥ १२

त्वदन्यः पाणिभ्यामभयवरदो दैवतगणो,
न कोऽपि त्वं वाचा जगदखिलमाह्लादयसि च ।
भवज्वालाजालाकलितवपुषामीश ! मनुजां,
दयार्द्रा दृष्टिस्ते शिशिरमुपचारं रचयति ॥ १३

विसा(शा)ला कल्याणी स्फुटरुधिरबोधा कुवलयै-
र्निरौपम्या दृष्टिर्निपतति जने पुण्यवति ते ।
भवद्भक्त्यासक्ते सुरमहितसम्यक्त्वसुभगे,
ददाने दीनेभ्यः श्रियमनिशमाशा(शां)नु सदृशीम् ॥ १४

विपद्यन्ते विश्वे विधिशतमखाद्या दिविषद-
स्तदा सद्यः पातिन्यहह ! ममता का निजतनौ ? ।
प्रमादं हित्वाऽतः स्तुतिपथममुं नाम नय भोः !,
कवीन्द्राणां चेतःकमलवनबालातपरुचिम् ॥ १५

श्रीसङ्घहर्षसुविनेयकधर्मसिंहपादारविन्दमधुलिण्मुनिरत्नसिंहः ।
शैलात्मजास्तवपदद्वयसन्निबद्धं,
स्तोत्रं चकार परमं परमेश्वरस्य ॥ (वसन्ततिलका) १६

पू.मु.श्री साधुरत्नविरचितम्

वीतरागशब्दस्य षष्टिरर्थगर्भितम्

## ८०. ॥ श्रीवीतरागस्तोत्रम् ॥

अम्ब ! त्र्यम्बकभाललालितसुधाधाम क्रमं ते किम-
प्यन्तश्चिन्तितवान् व्यपोहितमहामोहप्ररोहं महः ।
तस्मादस्मितमस्मि विस्मयकरव्याहारसारैर्गिरा-
मुद्गारैः कवयन्नयं सविनयं व.... श्री गुरून् ॥ (शार्दूल) १

(वसन्ततिलका)

श्रीवीतराग वरशासनसार्वभौम !,
कुर्वीत रागतरुतर्हणसार्वभौम ! ।
पूर्वीतरागम ! नवं भवतोऽभिधेयै,-
स्तैर्वीतरागरवसम्भविभिर्विधेयः [यम्] ॥ २

तन्वीत रागरजनीकरराहुकल्प !,
नौ[र्वीतराग]मिव मां भववारिराशौ ।
धून्वीत रागरजमेष भवान् समीर-
वद् वीतरागविसरोरुशिरोऽग्रहीरः ॥ ३

मन्वीत रागशमकं जनकं जनोऽयं,
वन्वीत रागरहितः स्वहितं ततस्त्वाम् ।
चिन्वीत रागमनिशं त्व... हेतो-
र्मिन्वीत रागमत एव मनो मदीयम् ॥ ४

स्तृण्वीत रागमभितो मतिनां महस्ते,
वृण्वीत रागरचनामुचितं वचस्ते ।

कृण्वीत रागममृतांशुरुचो यतस्ते,
घृण्वीत रागरुचिमुक्(ग्)भुवने भवांस्त[त्] ॥ ५

तृण्वीत रागवनभङ्गमरुत्तरङ्ग !,
गौ वींतराग ! तव संशयमिट्तृणानि ।
गुर्वीतरागमिव मां निजदर्शनोत्क-
मृण्वीत रागनिकरेण भवान् नतस्तत् ॥ ६

सिन्वीत रागः परिपन्थिनं मे,
शिन्वीत रागन्म-सां महीं च ।
सुन्वीत रागः श्रितपन्नखे यः,
सन्वीत रागर्जितमूर्जितात् ते ॥ (इन्द्र.) ७

लल्वीत रागर्जितुलां मदीया,
वेवीत रागध्रुवमाधुरीं च ।
वावीत रागच्छितिमात्मनो यद्,
वावीत रागर्ह्यगुरो....नः ॥ (उपेन्द्र) ८

भुवीतरागं जित ! तात् पि वाद,
भुवीतरागः परभागयोगात् ।
ब्रुवीत रागद्रवितां तथा गां,
स्तुवीत रागस्तु न को भवन्तम् ? ॥ (उपेन्द्र) ९

ह्वुवीत रागप्रथिमानमभ्रं, सुवीत रागल्भ्यविभान्तद...(?) ।
स वीतरागं भवतः प्रतापो-
ऽश्नुवीत रागं जलधिं समिद्धः ॥ (उपजाति) १०

वावीत रागप्रवरान्तरीपो–पवीतरागस्थवरान्तरीपाः (?) ।
स वीतरागस्थवरावभास–सद्वीतरागस्थवरान्तरीपाः ॥ ११
(उपजाति)

प्रमोदमुद्योतितवीतरागः, द्वीपाधिपाम्भोनिधिवीतरागः ।
गुरोर्गुणौघः श्रितवीतरागः, वराम्बुधीरेऽसति वीतरागः ॥ १२

वरावभासादिगवीतराग, वार्द्ध्यन्तरीपाच्युपवीतरागम् ।
...न् चमत्कार्यपवीतरागः, यद्वः प्रियात्संवरवीतरागः ॥
त्रिभिर्विशेषकम् (उपजाति) १३

मावीत रागं भवसम्भवं भो, मावीत रागं यशसां च यूयम्।
मावीत रागं मनसाऽत्र येन, वेवीत रागं पुरतो गुणानाम् ॥१४

वेवीत रागप्रमुखानि यूयं, वेवीत राग द्युतितां वसूनि ।
संवीतरागस्य गुरोर्नखालीं,
वावीत राग त्वमहो ! विहाय ॥ (इन्द्र.) १५

देवीतरा[ग]द्रुमवज्जनानां, यद् व्यञ्जनं व्यञ्जितवीतरागः ।
श्रीवीतरागश्रितधर्मकर्म, वाग्वीतरागं जय साधुरत्न ! ॥ (इन्द्र.)१६

पू.मु.श्री तेजसिंहविजयरचितम्
गो शब्दचतुर्विंशतिविभिन्नार्थयुतम्

# ८१. ॥ श्रीसर्वजिनसाधारणस्तोत्रम् ॥

(भुजङ्गप्रयात)

मुखे-लेषु-वाक्-दृग्(क्)-कपी-भा-शु-तन्त्रै-
भिदु-क्षा-ऽग्नि-गत्या(त्य)[प्]-प्रकाशा-स्त्र-सत्त्वैः ।
पवित्रा-ऽग-दिग् धेनु-गान्धर्व-स्वर्गैः,
समुद्राऽक्षि(२४) सङ्ख्यैर्जिनां(नान्)स्तौमि गौ(गो)जैः ॥ १

द्वारकाव्यम्

मुदे वोऽब्जसोदर्यसादृक्षगावो
मुदे वोऽस्तु भूय[यि]ष्ट(ष्ठ)पुण्यैकगावः ।
मुदे वोऽप्रकृष्टारिसम्भेदगावो
मुदे वोऽन्धमिष्टानसोमालगावः ॥ २

मुदे वोऽब्जसाधारणद्वैतगावो
मुदे वोऽस्तु सन्दानितस्वात(न्त)गाव(वः) ।
मुदे वोऽस्तु लोभद्रु[म]प्रौढगावो
मुदे वोऽस्तु मिथ्यात्वपांशुप्रगावः ॥ ३

मुदे वोऽस्तु सम्भाषिताशेषगावो
मुदे वोऽस्तु गर्वाद्रिदेवेन्द्रगावः ।
मुदे वोऽस्तु वाचंयमव्यूहगावो
मुदे वोऽस्तु कर्मेन्धनादग्धगावः ॥ ४

मुदे वोऽस्तु सञ्छेदितानिष्टगावो
मुदे वोऽच्युताङ्गोत्थदर्पाग्निगावः ।

मुदे वोऽस्तु भव्याब्जबोधार्कगावो
मुदे वोऽस्तु जीवावनारत्रै(स्वे)कगावः ॥ ५

मुदे वो क्रुधारीषुमुक्प्रौढगावो
मुदे वोऽस्तु रोगेभशार्दूलगावः ।
मुदे वो गुणानेकगात्राङ्गगावो
मुदे वोऽस्तु विट् भव्यपक्षीष्टगावः ॥ ६

मुदे वो मताधोदूर्ध्वतिर्यक्षुगावो
मुदे वोऽस्तु मर्त्येष्टशंदेष्टगावः ।
मुदे वोऽस्तु नम्रासुरामर्त्यगावो
मुदे वः समाख्यातभूमुक्तिगावः ॥ ७

गणिव(ख)रतरगच्छाधीश्वरः केशवाख्य-
स्तदनुग(ज)? - मुनिशिष्येणातपेभद्विषेण ।
रचितमलमिदं हि स्तोत्रकान्त (न्तं?) गुणौघं,
सकलजिनवराणां भव्यसौख्याकराणाम् ॥ (मालिनी) ८

पू.विबुधपर्वत?विरचितम्
चतुःषष्टिकर्णिकोपेतम्
कमलबन्धमयम्
प्रतिपदं चाद्यन्ते सारङ्ग-हरिशब्दमण्डितम्

## ८२. ॥ श्रीजिनस्तवनम् ॥

(मोटनक)

सारङ्गधरं सुवृषात्तहरिं, सारङ्गमुखं वृषभं नृहरम् (हरिम्) ।
सारङ्गकुलानिस(भ)चारुहरिं, सारङ्गधरं कविचक्रहरिम् ॥ १

सारङ्गगतिप्रमदोग्रहरिं, सारङ्गनिभालनकामहरिम् ।
सारङ्गवितानसुतानहरिं, सारङ्गगतिं नमिताशुहर(रि)म् ॥ २

सारङ्गजने कृपयात्तहरिं, सारङ्गनमिं सुवशं सुहरिम् ।
सारङ्गधराजितपार्श्वहरिं, सारङ्गनिभं नरपापहरिम् ॥ ३

सारङ्गदिने सुकृतेन हरिं, सारङ्गनिभं समताद्रिहर(रि)म् ।
सारङ्गसुकीर्त्तिललालहरिं, सारं गरिमासुमदेभहरिम् ॥ ४

सारङ्गचलाविषयास्तहरिं, सारङ्गचलाधिपवाणिहरिम् ।
सारङ्गरवं धृतसारहरं(रिं), सारङ्गविभारगताशुहर(रि)म् ॥ ५

सारङ्गकृपापरपार्श्वहरिं, सारङ्गसुपार्श्वमघाहिहरिम् ।
सारङ्गसुनकृजिताग्रहरिं(?), सारङ्गशुभाननतारहरिम् ॥ ६

सारङ्गकचाजितविश्वहरिं, सारङ्गनिदानविमुक्तहरिम् ।
सारङ्गसुशीलसुवासहरिं, सारङ्गमहातपनीयहरिम् ॥ ७

सारङ्गकलालयनोमिहरिं, सारङ्गवशाङ्गिकभोगहरिम् ।
सारङ्गततिस्फुरिताङ्गहरिं, सारङ्गसुधामरमास्थहरिम् ॥ ८

सारङ्गनिधानसुदानहरिं, सारङ्गलसन्त(त्त)नुकान्तिहरिम् ।
सारङ्गभवं बललब्धहरिं, सारङ्गपदं रमयाभू(भ्र?)हरिम् ॥ ९

सारङ्गभवं मदशत्रुहरिं, सारङ्गबलाभिकुरङ्गहरिम् ।
सारङ्गधरं नतदेवहरिं, सारङ्गभवादरसत्तहरिम् ॥ १०

सारङ्गनृपाननशुल्कहरिं, सारङ्गधरं धनदोग्रहरिम् ।
सारङ्गशरोर्मभिनं नृहरिं, सारङ्गधरं जिनहस्तिहरिम् ॥ ११

सारङ्गजिनेन्द्रसुरेन्द्रहरिं, सारङ्गधुराद्रविणाब्जहरिम् ।
सारङ्गधरं वदनाब्जहरिं, सारं गरिमारमयाङ्कहरिम् ॥ १२

सारङ्गपतेः गणगीतहरिं, सारङ्गपरिच्छदघस्रहरिम् ।
सारङ्गणनायकहारिहरिं, सारङ्गसुकायमहीनहरिम् ॥ १३

सारङ्गधुरार्कतुषारहरिं, सारङ्गमहीनतुषारहरिम् ।
सारङ्गधयारपचारुहरिं, सारङ्गमनोविधहस्तहरिम् ॥ १४

सारङ्गकजस्थपदाब्जहरिं, सारङ्गसुतायसिवाग्रसुहरिम् (?) ।
सारङ्गजसूरतयोग्रहरिं, सारि(र)ङ्गनिभं रिपुदावहरिम् ॥ १५

सारङ्गकृपं प्रशमाग्रहरं(रिं), सारङ्गसुतापसहस्रहरिम् ।
सारङ्गसुपर्वदनोमिहरिं, सारङ्गगतिं तमसो विहरिम् ॥ १६

इत्थं मया निजधिया जिनराजवर्य(ः)
पुण्योदयेन बत संस्तुत आदरेण ।
सूरीशहीरविजयाह्वपदाब्जसेवा-
हेवाकिना विबुधपर्वतसेवकेन ॥ (वसन्ततिलका) १७

पू.मू.श्री पद्मनन्दिविजयविरचितम्

## ८३. ॥ श्रीपरमात्मराज-स्तोत्रम् ॥

(वसन्ततिलका)

यस्य प्रसाद-वशतो वृषभादयोऽपि
प्रापुर्जिनाः परम-मोक्षपुराऽधिपत्यम् ।
आद्यन्तमुक्त-महिमानमनन्त-शक्तिं
भक्त्या नमामि तमहं परमात्मराजम् ॥ १

त्वां चिद्घनं समयसारमखण्डमूर्तिं
ज्योतिःस्वरूपममलं पर-भाव-मुक्तम् ।

स्तोतुं न सूक्ष्म-मतयो यतयोऽपि शक्ताः
कोऽहं चिदात्मक पुनर्जडिमैक-पात्रम् ॥ २

प्रोक्तं कथञ्चिदिह तत्त्वविदांवरेण
चिद्रूप तत्र भवतो भवतः स्वरूपम् ।
नो बुद्ध्यते बुधजनोऽप्यथवा प्रबुद्धं
तन्मोक्षमक्षय-सुखं द्रुतमातनोति ॥ ३

यो ज्ञानवान्स्व-परयोः कुरुते विभेदं
ज्ञानेन नीर-पयसोरिव राजहंसः ।
सोऽपि प्रमोद-भर-निर्भरमप्रमेय-
शक्तिं कथञ्चिदिह विन्दति चेतनत्वम् ॥ ४

तादात्म्य-वृत्तिमिह कर्म-मलेन साकं
यः स्वात्मनो वितनुते तनुधीः प्रमादात् ।
स त्वां चिदात्मक कथं प्रथितप्रकाशं
विश्वाऽतिशायि-महिमानमवैति योगी ॥ ५

चित्राऽऽत्म-शक्ति-समुदाय-मयं चिदात्मन्
ये त्वां श्रयन्ति मनुजा व्यपनीत-मोहाः ।
ते मोक्षमक्षय-सुखं त्वरितं लभन्ते
मूढास्तु संसृति-पथे परितो भ्रमन्ति ॥ ६

चित्पिण्ड-चण्डिम-तिरस्कृत-कर्मजाले
ज्योतिर्मये त्वयि समुल्लसति प्रकामम् ।
निक्षेपधीः क्व नयपक्षविधिः क्व शास्त्रं
कुत्राऽऽगमः क्व च विकल्पमतिः क्व मोहः ॥ ७

स्याद्वाद-दीपित-लसन्महसि त्वयीशे
प्राप्तोदये विलयमेति भव-प्रसूतिः ।
चञ्चत्प्रताप-निकरेऽभ्युदयं दिनेशे
याते हि वल्गति कियत्तमसः समूहः ॥ ८

कुर्वन्तु तानि विविधानि तपांसि शीलं
चिन्वन्तु शास्त्र-जलधिं च तरन्त्वगाधम् ।
चिद्रूप ते हृदय-वागतिवर्ति-धाम्नो
ध्यानं विना न मुनयोऽक्षय-सौख्य-भाजः ॥ ९

सिद्धान्त-लक्षण-सदध्ययनेन चित्त-
मात्मीयमत्र नियतं परिरञ्जयन्ति ।
ये ते बुधाः प्रतिगृहं बहवश्चिदात्मन्
ये त्वत्स्वरूप-निरता विरलास्त एव ॥ १०

दृग्गोचरत्वमुपयासि न वा ममत्वं
धत्से न संस्तवनतोऽपि न तुष्टिमेसि ।
कुर्वे किमत्र तदपि त्वमसि प्रियो मे
यस्माद्भवाऽऽमय-हृतिर्भवदाश्रितेयम् ॥ ११

आनन्द-मेदुरमिदं भवतः स्वरूपं
नृणां मनः स्पृशति चेक्षणमप्यमोहात् ।
दुःखानि दुर्द्धर-भव-भ्रमणोद्भवानि
नश्यन्ति चेत्तदिह किं कुरु कश्चिदात्मन् ॥ १२

ज्ञानं त्वमेव वरवृत्तमपि त्वमेव
त्वं दर्शनं त्वमपि शुद्धनयस्त्वमीशः ।

पुण्यः पुराणपुरुषः परमस्त्वमेव
यत्किञ्चनत्वमपि किं बहु-जल्पितेन ॥ १३

सच्चिच्चमत्कृति-चिताय जगन्नुताय
शुद्धस्फुरत्समरसैक-सुधार्णवाय ।
दुःकर्म-बन्धन-भिदेऽप्रतिम-प्रभाय
चिद्रूप तत्र भवते भवते नमोऽस्तु ॥ १४

अच्छोच्छलत्परमचित्ति-चितं कलङ्क-
मुक्तं विविक्त-महसं परमात्मराजम् ।
यो ध्यायते प्रतिदिनं लभते यतीन्द्रो
मुक्तिं स भव्य-जन-मानस-पद्मनन्दी ॥ १५

पू.मु. सकलचन्द्रविजयविरचितम्

## ८४. ॥ दृष्टाष्टकस्तोत्रम् ॥

(वसन्ततिलका)

दृष्टं जिनेन्द्रभवनं भवतापहारि
भव्यात्मनां विभवसम्भवभूरिहेतुः ।
दुग्धाब्धि-फेनधवलोज्ज्वल-कुट-कोटी-
नद्धध्वजप्रकरराजिविराजमानम् ॥ १

दृष्टं जिनेन्द्रभवनं भुवनैकलक्ष्मी
धामर्द्धिवर्द्धित महामुनिसेव्यमानम् ।
विद्याधरामर-वधूजनमुक्तदिव्य-
पुष्पाञ्जलि-प्रकरशोभितभूमिभागम् ॥ २

दृष्टं जिनेन्द्रभवनं भवनादिवास-
विख्यात-नाक-गणिका-गणगीयमानम् ।
नानामणिप्रचयभासुर-रश्मिजाल-
व्यालीढ-निर्मल-विशाल-गवाक्षजालम् ॥ ३

दृष्टं जिनेन्द्रभवनं सुरसिद्धयक्ष-
गन्धर्व-किन्नर-करार्पित-वेणुवीणा ।
सङ्गीतमिश्रित-नमस्कृत-धीरनादै-
रापूरिताम्बरतलोरुदिगन्तरालम् ॥ ४

दृष्टं जिनेन्द्रभवनं विलसद्विलोल-
माला-कुलालिललितालक-बिभ्रमाणम् ।
माधुर्य-वाद्यलय-नृत्य-विलासिनीनां
लीलाचलद्वलयनूपुरनादरम्यम् ॥ ५

दृष्टं जिनेन्द्रभवनं मणीरत्नहेम-
सरोज्ज्वलैः कलश-चामर-दर्पणाद्यैः ।
सन्मङ्गलैः सततमष्टशतप्रभेदै-
र्विभ्राजितं विमलमौक्तिकदाम शोभाम् ॥ ६

दृष्टं जिनेन्द्रभवनं वरदेवदारु-
कर्पूर-चन्दन-तुरुष्क-सुगन्धिधूपैः ।
मेघायमानगगने पवनाभिघात-
चञ्चच्चलद्विमलकेतनतुङ्गशालम् ॥ ७

दृष्टं जिनेन्द्रभवनं धवलातपत्र-
च्छायानिमग्न-तनुयक्ष-कुमारवृन्दैः ।
दोधूयमानसितचामर-पङ्क्तिभासं
भामण्डलद्युतियुतं च प्रतिभा(मा)भिरामम् ॥ ८

दृष्टं जिनेन्द्रभवनं विविधप्रकार-
पुष्पोपहाररमणीयसुरत्नभूमि ।
नित्यं वसन्ततिलकश्रियमादधानं
सन्मङ्गलं सकलचन्द्रमुनीन्द्रवन्द्यम् ॥ ९

दृष्टं मयाद्य मणिकाञ्चनचित्रतुङ्ग-
सिंहासनादि-जिनबिम्ब-विभूतियुक्तम् ।
चैत्यालयं यदतुलं परिकीर्तितं मे
सन्मङ्गलं सकलचन्द्रमुनीन्द्रवन्द्यम् ॥ १०

श्री जटासिंहनन्दीकृतम्
श्रीवराङ्गचरितान्तर्गत-

## ८५. ॥ श्रीसाधारणजिनमङ्गलम् ॥

(वसन्ततिलका)

अर्हंस्त्रिलोकमहितो हितकृत्प्रजानां
धर्मोऽर्हतो भगवतस्त्रिजगच्छरण्यः ।
ज्ञानं च यस्य सचराचरभावदर्शि
रत्नत्रयं तदहमप्रतिमं नमामि ॥ १

येनेह मोहतरुमूलमभेद्यमन्यै-
रुत्पाटितं निरवशेषमनादिबद्धम् ।
यस्यर्द्धयस्त्रिभुवनातिशयास्त्रिधोक्ताः
सोऽर्हञ्जयत्यमितमोक्षसुखोपदेशी ॥ २

प्राप्येत येन नृसुरासुरभोगभारो
नानातपोगुणसमुन्नतलब्धयश्च ।
पश्चादतीन्द्रियसुखं शिवमप्रमेयं
धर्मो जयत्यवितथः स जिनप्रणीतः ॥ ३

ज्ञानेन येन जिनवक्त्रविनिर्गतेन
त्रैलोक्यभूतगुणपर्ययसत्पदार्थाः ।
ज्ञाताः पुनर्युगपदेव हि सप्रपञ्चं
जैनं जयत्यनुपमं तदनन्तरं तत् ॥ ४

अर्हन्मुखागतमिदं गणदेवदृष्टं
सद्धर्ममार्गचरितं परया विशुद्ध्या ।
संश्रृण्वतः कथयतः स्मरतश्च नित्य-
मेकान्ततो भवति पुण्यसमग्रलम्भः ॥ ५

श्री जटासिंहनन्दीकृतम्

श्रीवराङ्गचरितान्तर्गत-

# ८६. ॥ श्रीजिनस्तुत्यष्टकम् ॥

(वंशस्थ)

विनष्टकर्माष्टकबुद्धिगोचरं
समस्तबोध्येष्टहितार्थदर्शनम् ।
सुदृष्टिचारित्रपथाधिनायकं
नतोऽस्मि निर्वाणसुखैधितं जिनम् ॥ १

व्यपेतसर्वैषणधीरसद्व्रतं
प्रशस्तशुक्लप्रविधूतदुर्नयम् ।
अवाप्तनिर्वाणसुखं निरामयं
नतोऽस्मि तं विघ्नविनायकं जिनम् ॥ २

प्रपश्यतां दृष्टिपथानुरोधिनीं
सुरूपतां चापि सुयौवनं वपुः ।
सुबिभ्रतो यस्य मनो मनोभुवा
न नाशितं तं प्रणतोऽस्मि यत्नतः ॥ ३

चतुर्विधामेत्य गतिं सुदुःखिताः
स्मराग्निना ये निहताः शरीरिणः ।
शमाम्भसा शान्तिमिताः स यस्य वै
जिनो हि मेऽद्य प्रददातु सत्सुखम् ॥ ४

शरीरिकायस्थितिसङ्गदर्शिनं
निरञ्जनं निर्दुरितं निरामयम् ।

अमोघविद्यं निरवद्ययोगिनं
शरण्यतां यामि तमद्य शान्तये ॥ ५

त्रिलोकबन्धुस्त्रिजगत्प्रजाहित-
स्त्रिलोकचूडामणिरात्तकेवलः ।
त्रिकालदर्शी सुगतिं समेयिवा-
न्स मां जिनो रक्षतु दुःखसङ्कटात् ॥ ६

सजातयो रोगजरोरुमृत्यवो
यथाक्रमं लोकमिमं जिघांसवः ।
समुद्धृता येन चिराय निस्तुषाः
स मे विमुक्तिं विदधातु नक्रतः ॥ ७

निरस्तदुर्नीतिविशेषसाधनो
विशिष्टदिव्याष्टसहस्त्रलक्षणः ।
परीषहक्लेशविजिष्णुरद्य मां
स रक्षतु ग्राहमुखाज्जिनेश्वरः ॥ ८

श्री पात्रकेसरिस्वामिकृता

## ८७. ॥ श्रीजिनेन्द्रगुणसंस्तुतिः ॥

(पृथ्वी)

जिनेन्द्र ! गुणसंस्तुतिस्तव मनागपि प्रस्तुता
भवत्यखिलकर्मणां प्रहतये परं कारणम् ।
इति व्यवसिता मतिर्मम ततोऽहमत्यादरात्
स्फुटार्थनयपेशलां सुगत ! संविधास्ये स्तुतिम् ॥ १

मतिः श्रुतमथवावधिश्च सहजं प्रमाणं हि ते
ततः स्वयमबोधि मोक्षपदवीं स्वयम्भूर्भवान् ।
न चैतदिह दिव्यचक्षुरधुनेक्ष्यतेऽस्मादृशां
यथा सुकृतकर्मणां सकलराज्यलक्ष्म्यादयः ॥ २

व्रतेषु परिरज्यसे निरुपमे च सौख्ये स्पृहा
बिभेष्यपि च संसृतेरसुभृतां वधं द्वेक्ष्यपि ।
कदाचिददयोदयो विगतचित्तकोऽप्यञ्जसा
तथाऽपि गुरुरिष्यसे त्रिभुवनैकबन्धुर्जिनः ॥ ३

तपः परमुपश्रितस्य भवतोऽभवत्केवलं
समस्तविषयं निरक्षमपुनश्च्युति स्वात्मजम् ।
निरावरणक्रमं व्यतिकरादपेतात्मकं
तदेव पुरुषार्थसारमभिसम्मतं योगिनाम् ॥ ४

परस्परविरोधवद्विविधभङ्गशाखाकुलं
पृथग्जनसुदुर्गमं तव निरर्थकं शासनम् ।
तथापि जिन ! सम्मतं सुविदुषां न चात्यद्भुतं
भवन्ति हि महात्मनां दुरुदितान्यपि ख्यातये ॥ ५

सुरेन्द्रपरिकल्पितं बृहदनर्घ्यसिंहासनं
तथाऽऽतपनिवारणत्रयमथोल्लसच्चामरम् ।
वशं च भुवनत्रयं निरुपमा च निःसङ्गता
न सङ्गतमिदं द्वयं त्वयि तथाऽपि सङ्गच्छते ॥ ६

त्वमिन्द्रियविनिग्रहप्रवणनिष्ठुरं भाषसे
तपस्यपि यातयस्यनघदुष्करे संश्रितान् ।

अनन्यपरिदृष्टया षडसुकायसंरक्षया
स्वनुग्रहपरोऽप्यहो ! त्रिभुवनात्मनां नापरः ॥ ७

ददास्यनुपमं सुखं स्तुतिपरेष्वतुष्यन्नपि
क्षिपस्यकुपितोऽपि च ध्रुवमसूयकान्दुर्गतौ ।
न चेश ! परमेष्ठिता तव विरुद्ध्यते यद्भवान्
न कुप्यति न तुष्यति प्रकृतिमाश्रितो मध्यमाम् ॥ ८

परिक्षपितकर्मणस्तव न जातु रागादयो
न चेन्द्रियविवृत्तयो न च मनस्कृता व्यावृतिः ।
तथाऽपि सकलं जगद्युगपदञ्जसा वेत्सि च
प्रपश्यसि च केवलाभ्युदितदिव्यसच्चक्षुषा ॥ ९

क्षयाच्च रतिरागमोहभयकारिणां कर्मणां
कषायरिपुनिर्जयः सकलतत्त्वविद्योदयः ।
अनन्यसदृशं सुखं त्रिभुवनाधिपत्यं च ते
सुनिश्चितमिदं विभो ! सुमुनिसम्प्रदायादिभिः ॥ १०

न हीन्द्रियधिया विरोधि न च लिङ्गबुद्ध्या वचो
न चाप्यनुमतेन ते सुनय ! सप्तधा योजितम् ।
व्यपेतपरिशङ्कनं वितथकारणादर्शना-
दतोऽपि भगवंस्त्वमेव परमेष्ठितायाः पदम् ॥ ११

न लुब्ध इति गम्यसे सकलसङ्गसंन्यासतो
न चाऽपि तव मूढता विगतदोषवाग्यद्भवान् ।
अनेकविधरक्षणादसुभृतां न च द्वेषिता
निरायुधतयाऽपि च व्यपगतं तथा ते भयम् ॥ १२

यदि त्वमपि भाषसे वितथमेवमाप्तोऽपि सन्
परेषु जिन ! का कथा प्रकृतिलुब्धमुग्धादिषु ।
न चाऽप्यकृतकात्मिका वचनसंहतिर्दृश्यते
पुनर्जननमप्यहो ! न हि विरुध्यते युक्तिभिः ॥ १३

सजन्ममरणर्षिगोत्रचरणादिनामश्रुते-
रनेकपदसंहतिप्रतिनियामसन्दर्शनात् ।
फलार्थिपुरुषप्रवृत्तिविनिवृत्तिहेत्वात्मनां-
श्रुतेश्च मनुसूत्रवत्पुरुषकर्तृकैव श्रुतिः ॥ १४

स्मृतिश्च परजन्मनः स्फुटमिहेक्ष्यते कस्यचित्
तथाप्तवचनान्तरात्प्रसृतलोकवादादपि ।
न चाऽप्यसत उद्भवो न च सतो निमूलात्क्षयः
कथं हि परलोकिनामसुभृतामसत्तोह्यते ॥ १५

न चाऽप्यसदुदीयते न च सदेव वा व्यज्यते
सुराङ्गमदवत्तथा शिखिकलापवैचित्र्यवत् ।
क्वचिन्मृतकरन्धनार्थपिठरादिके नेक्ष्यते
कथं क्षितिजलादिसङ्गगुण इष्यते चेतना ॥ १६

प्रशान्तकरणं वपुर्विगतभूषणं चाऽपि ते
समस्तजनचित्तनेत्रपरमोत्सवत्वं गतम् ।
विनाऽऽयुधपरिग्रहाज्जिन ! जितास्त्वया दुर्जयाः
कषायरिपवो परैर्न तु गृहीतशस्त्रैरपि ॥ १७

धियान्तरतमार्थवद्गतिसमन्वयान्वीक्षणात्
भवेत्खपरिमाणवत्क्वचिदिह प्रतिष्ठा परा ।

प्रहाणमपि दृश्यते क्षयवतो निमूलात्क्वचित्
तथाऽयमपि युज्यते ज्वलनवत्कषायक्षयः ॥ १८

अशेषविदिहेक्ष्यते सदसदात्मसामान्यवित्
जिन ! प्रकृतिमानुषोऽपि किमुताखिलज्ञानवान् ।
कदाचिदिह कस्यचित्क्वचिदपेतरागादिता
स्फुटं समुपलभ्यते किमुत ते व्यपेतैनसः ॥ १९

अशेषपुरुषादितत्त्वगतदेशनाकौशलं
त्वदन्यपुरुषान्तरानुचितमाप्ततालाञ्छनम् ।
कणादकपिलाक्षपादमुनिशाक्यपुत्रोक्तयः
स्खलन्ति हि सुचक्षुरादिपरिनिश्चितार्थेष्वपि ॥ २०

परैरपरिणामकः पुरुष इष्यते सर्वथा
प्रमाणविषयादितत्त्वपरिलोपनं स्यात्ततः ।
कषायविरहान्न चाऽस्य विनिबन्धनं कर्मभिः
कुतश्च परिनिर्वृतिः क्षणिकरूपतायां तथा ॥ २१

मनो विपरिणामकं यदिह संसृतिं चाश्नुते
तदेव च विमुच्यते पुरुषकल्पना स्याद् वृथा ।
न चाऽस्य मनसो विकार उपपद्यते सर्वथा
ध्रुवं तदिति हीष्यते द्वितयवादिता कोपिनि ॥ २२

पृथग्जनमनोनुकूलमपरैः कृतं शासनं
सुखेन सुखमाप्यते न तपसेत्यवश्येन्द्रियैः ।
प्रतिक्षणविभङ्गुरं सकलसंस्कृतं चेष्यते
ननु स्वमतलोकलिङ्गपरिनिश्चितैर्व्याहितम् ॥ २३

न सन्ततिरनश्वरी न हि च नश्वरी नो द्विधा
वनादिवदभाव एव यत इष्यते तत्त्वतः ।
वृथैव कृषिदानशीलमुनिवन्दनादिक्रियाः
कथञ्चिदविनश्वरी यदि भवेत्प्रतिज्ञाक्षतिः ॥ २४

अनन्यपुरुषोत्तमो मनुजतामतीतोऽपि स-
मनुष्य इति शस्यसे त्वमधुना नरैर्बालिशैः ।
क्व ते मनुजगर्भिता क्व च विरागसर्वज्ञता
न जन्ममरणात्मता हि तव विद्यते तत्त्वतः ॥ २५

स्वमातुरिह यद्यपि प्रभव इष्यते गर्भतो
मलैरनुपसंप्लुतो वरसरोजपत्राऽम्बुवत् ।
हिताहितविवेकशून्यहृदयो न गर्भेऽप्यभूः
कथं तव मनुष्यमात्रसदृशत्वमाशङ्क्यते ॥ २६

न मृत्युरपि विद्यते प्रकृतिमानुषस्येव ते
मृतस्य परिनिर्वृतिर्न मरणं पुनर्जन्मवत् ।
जरा च न हि यद्वपुर्विमलकेवलोत्पत्तितः
प्रभृत्यरुजमेकरूपमवतिष्ठते प्राङ्मृतेः ॥ २७

परः कृपणदेवकैः स्वयमसत्सुखैः प्रार्थ्यते
सुखं युवतिसेवनादिपरसन्निधिप्रत्ययम् ।
त्वया तु परमात्मना न परतो यतस्ते सुखं
व्यपेतपरिणामकं निरुपमं ध्रुवं स्वात्मजम् ॥ २८

पिशाचपरिवारितः पितृवने नरीनृत्यते
क्षरद्रुधिरभीषणद्विरदकृत्तिहेलापटः ।

हरो हसति चायतं कहकहाट्टहासोल्बणं
कथं परमदेवतेति परिपूज्यते पण्डितैः ॥ २९

मुखेन किल दक्षिणेन पृथुनाऽखिलप्राणिनां
समत्ति शवपूतिमज्जरुधिरान्त्रमांसानि च ।
गणैः स्वसदृशैर्भृशं रतिमुपैति रात्रिन्दिवं
पिबत्यपि च यः सुरां स कथमाप्तताभाजनम् ॥ ३०

अनादिनिधनात्मकं सकलतत्त्वसम्बोधनं
समस्तजगदाधिपत्यमथ तस्य सन्तृप्तता ।
तथा विगतदोषता च किल विद्यते यन्मृषा
सुयुक्तिविरहान्न चाऽस्ति परिशुद्धतत्त्वागमः ॥ ३१

कमण्डलुमृगाजिनाक्षवलयादिभिर्ब्रह्मणः
शुचित्वविरहादिदोषकलुषत्वमभ्यूह्यते ।
भयं विघृणता च विष्णुहरयोः सशस्त्रत्वतः
स्वतो न रमणीयता च परिमूढता भूषणात् ॥ ३२

स्वयं सृजति चेत्प्रजाः किमिति दैत्यविध्वंसनं
सुदुष्टजननिग्रहार्थमिति चेदसृष्टिर्वरम् ।
कृतात्मकरणीयकस्य जगतां कृतिर्निष्फला
स्वभाव इति चेन्मृषा स हि सुदुष्ट एवाऽऽप्यते ॥ ३३

प्रसन्नकुपितात्मनां नियमतो भवेद् दुःखिता
तथैव परिमोहिता भयमुपद्रुतिश्चामयैः ।
तृषाऽपि च बुभुक्षया च न च संसृतिश्छिद्यते
जिनेन्द्र ! भवतोऽपरेषु कथमाप्तता युज्यते ॥ ३४

कथं स्वयमुपद्रुताः परसुखोदये कारणं
स्वयं रिपुभयार्दिताश्च शरणं कथं बिभ्यताम् ।
गतानुगतिकैरहो त्वदपरत्र भक्तैर्जनैः
अनायतनसेवनं निरयहेतुरङ्गीकृतम् ॥ ३५

सदा हननघातनाद्यनुमतिप्रवृत्तात्मनां
प्रदुष्टचरितोदितेषु परिहृष्यतां देहिनाम् ।
अवश्यमनुषज्यते दुरितबन्धनं तत्त्वतः
शुभेऽपि परिनिश्चितस्त्रिविधबन्धहेतुर्भवेत् ॥ ३६

विमोक्षसुखचैत्यदानपरिपूजनाद्यात्मिकाः
क्रिया बहुविधासुभृन्मरणपीडनाहेतवः ।
त्वया ज्वलितकेवलेन न हि देशिताः किं नु ताः
त्वयि प्रसृतभक्तिभिः स्वयमनुष्ठिताः श्रावकैः ॥ ३७

त्वया त्वदुपदेशकारिपुरुषेण वा केनचित्
कथञ्चिदुपदिश्यते स्म जिन ! चैत्यदानक्रिया ।
अनाशकविधिश्च केशपरिलुञ्चनं चाऽथवा
श्रुतादनिधनात्मकादधिगतं प्रमाणान्तरात् ॥ ३८

न चासुपरिपीडिनं नियमतोऽशुभायेष्यते
त्वया न च शुभाय वा न हि च सर्वथा सत्यवाक् ।
न चाऽपि दमदानयोः कुशलहेतुतैकान्ततो
विचित्रनयभङ्गजालगहनं त्वदीयं मतम् ॥ ३९

त्वयाऽपि सुखजीवनार्थमिह शासनं चेत्कृतं
कथं सकलसङ्ग्रहत्यजनशासिता युज्यते ।

तथा निरशनार्द्ध-भुक्तिरसवर्जनाद्युक्तिभि-
र्जितेन्द्रियतया त्वमेव जिन इत्यभिख्यां गतः ॥ ४०

जिनेश्वर ! न ते मतं पटकवस्त्रपात्रग्रहो
विमृश्य सुखकारणं स्वयमशक्तकैः कल्पितः ।
अथायमपि सत्पथस्तव भवेद्यथा नग्नता
न हस्तसुलभे फले सति तरुः समारुह्यते ॥ ४१

परिग्रहवतां सतां भयमवश्यमापद्यते
प्रकोपपरिहिंसने च परुषानृतव्याहृती ।
ममत्वमथ चोरतो स्वमनसश्च विभ्रान्तता
कुतो हि कलुषात्मनां परमशुक्लसद्ध्यानता ॥ ४२

स्वभाजनगतेषु पेयपरिभोज्यवस्तुष्वमी
यदा प्रतिनिरीक्षतास्तनुभृतः सुसूक्ष्मात्मिकाः ।
तदा क्वचिदपोज्झने मरणमेव तेषां भवे-
दथाऽप्यभिनिरोधनं बहुतरात्मसम्मूर्च्छनम् ॥ ४३

दिगम्बरतया स्थिताः स्वभुजभोजिनो ये सदा
प्रमादरहिताशयाः प्रचुरजीवहत्यामपि ।
न बन्धफलभागिनस्त इति गम्यते येन ते
प्रवृत्तमनुबिभ्रति स्वबलयोग्यमद्याप्यमी ॥ ४४

यथागमविहारिणामशनपानभक्ष्यादिषु
प्रयत्नपरचेतसामविकलेन्द्रियालोकिनाम् ।
कथञ्चिदसुपीडनाद्यदि भवेदपुण्योदय-
स्तपोऽपि वध एव ते स्वपरजीवसन्तापनात् ॥ ४५

मरुज्ज्वलनभूपयःसु नियमा क्वचिद्युज्यते
परस्परविरोधितेषु विगतासुता सर्वदा ।
प्रमादजनितागसां क्वचिदपोहनं स्वागमात्
कथं स्थितिभुजां सतां गगनवाससां दोषिता ॥ ४६

परैरनघनिर्वृतिः स्वगुणतत्त्वविध्वंसनं
व्यघोषि कपिलादिभिश्च पुरुषार्थविभ्रंशनम् ।
त्वया सुमृदितैनसा ज्वलितकेवलौघश्रिया
ध्रुवं निरुपमात्मकं सुखमनन्तमव्याहतम् ॥ ४७

निरन्वयविनश्वरी जगति मुक्तिरिष्टा परैः
न कश्चिदिह चेष्टते स्वव्यसनाय मूढेतरः ।
त्वयाऽनुगुणसंहतेरतिशयोपलब्ध्यात्मिका
स्थितिः शिवमयी प्रवचने तव ख्यापिता ॥ ४८

इत्यपि गुणस्तुतिः परमनिर्वृतेः साधनी
भवत्यलमतो जनो व्यवसितश्च तत्काङ्क्षया ।
विरस्यति च साधुना रुचिरलोभलाभे सतां
मनोऽभिलषिताप्तिरेव ननु प्रयासावधिः ॥ ४९

इति मम मतिवृत्या संहतिं त्वद्गुणाना-
मनिशममितशक्ति संस्तुवानस्य भक्त्या ।
सुखमनघमनन्तं स्वात्मसंस्थं महात्मन्
जिन ! भवतु महत्या केवल श्रीविभूत्या ॥ (मालिनी) ५०

भट्ट–अकलङ्कदेवकृतम्

## ८८. ॥ 'श्रीस्वरूपसम्बोधनस्तोत्रम्' ॥

(अनुष्टुप्)

मुक्ताऽमुक्तैकरूपो यः कर्मभिः संविदादिना ।
अक्षयं परमात्मनं ज्ञानमूर्तिं नमामि तम् ॥ १

सोऽस्त्यात्मा सोपयोगोऽयं क्रमाद्धेतुफलावहः ।
यो ग्राह्योऽग्राह्यानाद्यन्तः स्थित्युत्पत्तिव्ययात्मकः ॥ २

प्रमेयत्वादिभिर्धर्मैरचिदात्मा चिदात्मकः ।
ज्ञानदर्शनतः तस्मात् चेतनाचेतनात्मकः ॥ ३

ज्ञानाद्भिन्नो न चाभिन्नो भिन्नाभिन्नः कथञ्चन ।
ज्ञानं पूर्वापरीभूतं सोऽयमात्मेति कीर्त्तितः ॥ ४

स्वदेहप्रमितश्चायं ज्ञानमात्रोऽपि नैव सः ।
ततः सर्वगतश्चायं विश्वव्यापी न सर्वथा ॥ ५

नानाज्ञानस्वभावत्वादेकोऽनेकोऽपि नैव सः ।
चैतनैकस्वभावत्वादेकानेकात्मको भवेत् ॥ ६

नाऽवक्तव्यः स्वरूपाद्यैः निर्वाच्यः परभावतः ।
तस्मान्नैकान्ततो वाच्यो नापि वाचामगोचरः ॥ ७

स स्याद्विधिनिषेधात्मा स्वधर्मपरधर्मयोः ।
समूर्तिर्बोधमूर्तित्वादमूर्तिश्च विपर्ययात् ॥ ८

इत्याद्यनेककर्मत्वं बन्धमोक्षौ तयोः फलम् ।
आत्मा स्वीकुरुते तत्तत्कारणैः स्वयमेव तु ॥ ९

कर्ता यः कर्मणां भौक्ता तत्फलानां स एव तु ।
बहिरन्तरुपायाभ्यां तेषां मुक्तत्वमेव हि ॥ १०

सद्दृष्टिज्ञानचारित्रमुपायः स्वात्मलब्धये ।
तत्त्वे याथात्म्यसंस्थित्यमात्मनो दर्शनं मतम् ॥ ११

यथावद्वस्तुमिर्णोतिः सम्यग्ज्ञानं प्रदीपवत् ।
तत्स्वार्थव्यवसायात्म कथञ्चित्प्रमितेः पृथक् ॥ १२

दर्शनज्ञानपर्यायेषूत्तरोत्तरभाविषु ।
स्थिरमालम्बनं यद्वा माध्यस्थ्यं सुखदुःखयोः ॥ १३

ज्ञाता द्रष्टाऽहमेकोऽहं सुखे दुःखे न चापरः ।
इतीदं भावनादार्ढ्य-चारित्रमथवापरम् ॥ १४

तदेतन्मूलहेतोः स्यात्कारणं सहकारकम् ।
तद्बाह्यं देशकालादि तपश्च बहिरङ्गकम् ॥ १५

इतीदं सर्वमालोच्य सौस्थ्ये दौःस्थ्ये च शक्तितः ।
आत्मानं भावयेन्नित्यं रागद्वेषविवर्जितम् ॥ १६

कषायै रञ्जितं चेतस्तत्त्वं नैवावगाहते ।
नीली रक्तेम्बरे रागो दुराधेयो हि कौङ्कुमः ॥ १७

ततस्त्वं दोषनिर्मुक्त्यै निर्मोहो भव सर्वतः ।
उदासीनत्वमाश्रित्य तत्त्वचिन्तापरो भव ॥ १८

हेयोपादेयतत्त्वस्य स्थितिं विज्ञाय हेयतः।
निरालम्बो भवान्यस्मादुपेये सावलम्बनः ॥ १९

स्व परं चेति वस्तुत्वं वस्तुरूपेण भावय ।
उपेक्षा भावनोत्कर्ष-पर्यन्ते शिवमाप्नुहि ॥ २०

मोक्षेऽपि यस्य नाकाङ्क्षा स मोक्षमधिगच्छति ।
इत्युक्तत्वाद्धितान्वेषी काङ्क्षा न क्वापि योजयेत् ॥ २१

सोऽपि च स्वात्मनिष्ठत्वात्सुलभां यदि चिन्त्यते ।
आत्माधीने सुखे तात ! यत्नं किं न करिष्यसि ॥ २२

स्वं परं विद्धि तत्रापि व्यामोहं छिन्धि किन्त्विमम् ।
अनाकुलस्वसंवेद्ये स्वरूपे तिष्ठ केवले ॥ २३

स्वः स्वं स्वेन स्थितं स्वस्मै स्वस्मात्स्वस्याविनश्वरे ।
स्वस्मिन् ध्यात्वा लभेत्स्वेस्थमानन्दममृतं पदम् ॥ २४

इति स्वतत्त्वं परिभाव्य वाङ्मयं य एतदाख्याति श्रृणोति चादरात्।
करोति तस्मै परमार्थसम्पदं, स्वरूपसम्बोधनपञ्चविंशति ॥२५

'प्रबन्धचतुष्टय' अन्तर्गता

## ८९. ॥ श्रीजिनस्तुतिः ॥

(अनुष्टुप्)

नम्राखण्डल-सन्मौलि-श्रस्त-मन्दार-दामभिः ।
यस्यार्चितं क्रमाम्भोजं भ्राजिते तं जिनं स्तुवे ॥ १

यथोपहास्यतां याति तितीर्षुः सरितां पतिम् ।
दोर्भ्यामहं तथा जिष्णो जिनानन्त-गुण-स्तुतौ ॥ २

तथाऽपि भक्तितः किञ्चिद्वक्ष्येऽहं गुणकीर्तनम् ।
महात्मनां गुणांशोऽपि दुःख-विद्रावणक्षमः ॥ ३

नमस्तुभ्यं जिनेशाय मोहराज-बलच्छिदे ।
निःशेष-जन्तु-सन्तान-संशयच्छेदि संविदे ॥ ४

नमस्तुभ्यं भवाम्भोधि-निमज्जज्जन्तु तारिणे ।
दुर्गापवर्ग-सन्मार्ग-स्वर्ग-संसर्ग-कारिणे ॥ ५

नमस्तुभ्यं मनोमल्ल-ध्वंसकाय महीयसे ।
द्वेषद्विप-महाकुम्भ-विपाटन-पटीयसे ॥ ६

धन्यास्ते यैर्जिनाधीश ! ददृशे त्वत्मुखाम्बुजम् ।
मोक्षमार्गं दिशत्साक्षात् द्रव्यानां स्फारदृष्टिभिः ॥ ७

न मया माया-विनिर्मुक्तः शङ्के दृष्टः पुरा भवान् ।
विनाऽऽपदां पदं जातो भूयो भूयो भवार्णवे ॥ ८

दृष्टोऽथवा तथा भक्तिर्नो वा जाता कदाचन ।
तवोपरि ममात्यर्थं दुर्भाग्यस्य दुरात्मनः ॥ ९

साम्प्रतं देवयोगान्मे त्वया सार्द्धं गुणावहः ।
योगोऽजनि जनानन्त-दुर्लभो भवसागरे ॥ १०

दयां कुरु तथा नाथ ! भवानि न भवे यथा ।
नोपेक्षन्ते क्षमाः क्षीणं यतो मोक्षश्रयाश्रितम् ॥ ११

निर्बन्धुर्भ्रष्टभाग्योऽयं निःसरन् योगतः प्रभुः ।
त्वां विनेति प्रभो ! प्रीत प्रसीद प्राणिवत्सलः ॥ १२

तावदेव निमज्जन्ति जन्तवोऽस्मिन् भवाम्बुधौ ।
यावत्त्वदंह्रितकासि(न) श्रयन्ति जिनोत्तम ॥ १३

एकोऽपि यैर्नमस्कारश्चक्रे नाथ ! तवाञ्जसा ।
संसार-पारावारस्य तेऽपि पारं परं गताः ॥ १४

इत्येवं श्रीक्रमालीढं जन्तुत्राणपरायण ! ।
देहि मह्यं शिवे वासं देहि सूरिनतक्रम ॥ १५

श्री कुमारपालभूपालविरचितम्

## १०. ॥ श्रीसाधारणजिनस्तवनम् ॥

(उपजाति)

नम्राखिलाखण्डलमौलिरत्न-
रश्मिच्छटापल्लवितांह्रिपीठ ! ।
विध्वस्तविश्वव्यसनप्रबन्ध !
त्रिलोकबन्धो ! जयताज्जिनेन्द्र ! ॥ १

मूढोऽस्म्यहं विज्ञपयामि यत्त्वामपेतरागं भगवन् ! कृतार्थम् ।
न हि प्रभूणामुचितस्वरूपनिरूपणाय क्षमतेऽर्थिवर्गः ॥ २

मुक्तिं गतोऽपीश ! विशुद्धचित्ते
गुणाधिरोपेण ममाऽसि साक्षात् ।
भानुर्दवीयानपि दर्पणेंऽशुसङ्गान्न किं द्योतयते गृहान्तः ? ॥ ३

तव स्तवेन क्षयमङ्गभाजां भजन्ति जन्मार्जितपातकानि ।
कियच्चिरं चण्डरुचेर्मरीचिस्तोमे तमांसि स्थितिमुद्वहन्ति ॥ ४

शरण्य ! कारुण्यपरः परेषां निहंसि मोहज्वरमाश्रितानाम् ।
मम त्वदाज्ञां वहतोऽपि मूर्ध्ना
शान्तिं न यात्येष कुतोऽपि हेतोः ? ॥ ५

भवाटवीलङ्घनसार्थवाह ! त्वामाश्रितो मुक्तिमहं यियासुः ।
कषायचौरैर्जिन ! लुण्ट्यमानं रत्नत्रयं मे तदुपेक्षसे किम् ? ॥६

लब्धोऽसि स त्वं मयका महात्मा
भवाम्बुधौ बम्भ्रमता कथञ्चित् ।
आः ! पापपिण्डेन नतो न भक्त्या
न पूजितो नाथ ! न तु स्तुतोऽसि ॥ ७

संसारचक्रे भ्रमयन् कुबोधदण्डेन मां कर्ममहाकुलालः ।
करोति दुःखप्रचयस्थभाण्डं ततः प्रभो ! रक्ष जगच्छरण्य ! ॥८

कदा त्वदाज्ञाकरणाप्ततत्त्वस्त्यक्त्वा ममत्वादिभवैककन्दम् ।
आत्मैकसारो निरपेक्षवृत्तिर्मोक्षेऽप्यनिच्छो भवितास्मि नाथ !॥९

तव त्रियामापतिकान्तिकान्तैर्गुणैर्नियम्यात्ममनःप्लवङ्गम् ।
कदा त्वदाज्ञामृतपानलोलः
स्वामिन् ! परब्रह्मरतिं करिष्ये ? ॥ १०

एतावतीं भूमिमहं त्वदंह्रि-पद्मप्रसादाद् गतवानधीश ! ।
हठेन पापास्तदपि स्मराद्या ही ! मामकार्येषु नियोजयन्ति ॥११

भद्रं न किं त्वय्यपि नाथ ! नाथे
सम्भाव्यते मे यदपि स्मराद्याः ? ।
अपाक्रियन्ते शुभभावनाभिः
पृष्ठिं न मुञ्चन्ति तथापि पापाः ॥ १२

भवाम्बुराशौ भ्रमतः कदापि मन्ये न मे लोचनगोचरोऽभूः ।
निस्सीमसीमतकनारकादि-
दुःखातिथित्वं कथमन्यथेश ! ? ॥ १३

चक्रा-ऽसि-चापा-ऽङ्कुश-वज्रमुख्यैः
सल्लक्षणैर्लक्षितमंह्रियुग्मम् ।
नाथ ! त्वदीयं शरणं गतोऽस्मि
दुर्वारमोहादिविपक्षभीतः ॥ (इन्द्रवज्रा) १४

अगण्यकारुण्य ! शरण्य ! पुण्य !
सर्वज्ञ ! निष्कण्टक ! विश्वनाथ ! ।
दीनं हताशं शरणागतं च मां रक्ष रक्ष स्मरभिल्लभल्लेः ॥ १५

त्वया विना दुष्कृतचक्रवालं नान्यः क्षयं नेतुमलं ममेश ! ।
किं वा विपक्षप्रतिचक्रमूलं
चक्रं विना छेत्तुमलम्भविष्णुः ? ॥ १६

यद्देव ! देवोऽसि महेश्वरोऽसि बुद्धोऽसि विश्वत्रयनायकोऽसि
तेनान्तरङ्गारिगणाभिभूतस्तवाग्रतो रोदिमि हा ! सखेदम् ॥१७

स्वामिन्नधर्म्मव्यसनानि हित्वा मनः समाधौ निदधामि यावत् ।
तावत्क्रुधेवान्तरवैरिणो मामनल्पमोहान्ध्यवशं नयन्ति ॥ १८

त्वादागमाद्वेद्मि सदैव देव ! मोहादयो यन्मम वैरिणोऽमी ।
तथापि मूढस्य पराप्तबुद्ध्या
तत्सन्निधौ ही न किमप्यकृत्यम् ॥ १९

म्लेच्छैर्नृशंसैरतिराक्षसैश्च विडम्बितोऽमीभिरनेकशोऽहम् ।
प्राप्तस्त्विदानीं भुवनैकवीर !
त्रायस्व मां यत्तव पादलीनम् ॥ २०

हित्वा स्वदेहेऽपि ममत्वबुद्धिं श्रद्धापवित्रीकृतसद्विवेकः ।
मुक्तान्यसङ्गः समशत्रुमित्रः
स्वामिन् ! कदा संयममातनिष्ये ॥ (इन्द्रवज्रा) २१

त्वमेव देवो मम वीतराग ! धर्मो भवद्दर्शितधर्म एव ।
इति स्वरूपं परिभाव्य तस्मान्नोपेक्षणीयो भवति स्वभृत्यः ॥२२

जिता जिताशेषसुराऽसुराद्याः
कामादयः काममभी त्वयेश ! ।

त्वां प्रत्यशक्तास्तव सेवकं तु
निघ्नन्ति ही मां परुषं रुषेव ॥ २३

सामर्थ्यमेतद्भवतोऽस्ति सिद्धिं
सत्त्वानशेषानपि नेतुमीश ! ।
क्रियाविहीनं भवदंह्रिलीनं
दीनं न किं रक्षसि मां शरण्य ! ? ॥ २४

त्वत्पादपद्मद्वितयं जिनेन्द्र ! स्फुरत्यजस्रं हृदि यस्य पुंसः ।
विश्वत्रयीश्रीरपि नूनमेति तत्राश्रयार्थं सहचारिणीव ॥ २५

अहं प्रभो ! निर्गुणचक्रवर्ती
क्रूरो दुरात्मा हतकः सपाप्मा ।
ही दुःखराशौ भववारिराशौ
यस्मान्निमग्नोऽस्मि भवद्विमुक्तः ॥ २६

स्वामिन्निमग्नोऽस्मि सुधासमुद्रे
यन्नेत्रपात्रातिथिरद्य मेऽभूः ।
चिन्तामणौ स्फुर्जति पाणिपद्मे
पुंसामसाध्यो न हि कश्चिदर्थः ॥ (इन्द्रवज्रा) २७

त्वमेव संसारमहाम्बुराशौ निमज्जतो मे जिन ! यानपात्रम् ।
त्वमेव मे श्रेष्ठसुखैकधाम विमुक्तिरामाघटनाभिरामः ॥ २८
(उपेन्द्रवज्रा)

चिन्तामणिस्तस्य जिनेश ! पाणौ
कल्पद्रुमस्तस्य गृहाङ्गणस्थः ।
नमस्कृतो येन सदाऽपि भक्त्या
स्तोत्रैः स्तुतो दामभिरर्चितोऽसि ॥ २९

निमील्य नेत्रे मनसः स्थिरत्वं
विधाय यावज्जिन ! चिन्तयामि ।
त्वमेव तावन्न परोऽस्ति देवो निःशेषकर्मक्षयहेतुरत्र ॥ ३०

भक्त्या स्तुता अपि परे परया परेभ्यो
मुक्तिं जिनेन्द्र ! ददते न कथञ्चनाऽपि ।
सिक्ताः सुधारसघटैरपि निम्बवृक्षा
विश्राणयन्ति न हि चूतफलं कदाचित् ॥ (व.ति.) ३१

भवजलनिधिमध्यान्नाथ ! निस्तार्य कार्यः
शिवनगरकुटुम्बी निर्गुणोऽपि त्वयाऽहम् ।
न हि गुणमगुणं वा संश्रितानां महान्तो
निरुपमकरुणार्द्राः सर्वथा चिन्तयन्ति ॥ (मालिनी) ३२

प्राप्तस्त्वं बहुभिः शुभैस्त्रिजगतश्चूडामणिर्देवता
निर्वाणप्रतिभूरसावपि गुरुः श्रीहेमचन्द्रप्रभुः ।
तन्नातः परमस्ति वस्तु किमपि स्वामिन् यदभ्यर्थये
किन्तु त्वद्वचनादरः प्रतिभवं स्ताद् वर्द्धमानो मम ॥ (शा.वि.) ३३

श्री जम्बूकविविरचिता

## ९१. ॥ श्रीसामान्यजिनस्तुतिः ॥

(अनुष्टुप्)

नतस्ते चरणानीश ! शिशिरसंसारतेजसः ।
सन्ततत्रिदशाधीशशिरःस्रस्तस्रगर्चितान् ॥ १

स नाथ ! नाथते नान्यं दीनचेताः कदाचन ।
यस्ते शासनसद्रत्नं दधाति हृदयालये ॥ २

कथं यास्यन्ति ते शान्तं देशं शान्तेश ! नाश्रिता ।
यैस्तेंऽह्रिशाखिनश्छाया संसारारण्यगैरिह ॥ ३

संसारे सारताहीने संसारी यदरार्यते ।
तज्जाने निश्चितं नाज्ञा चक्रे शक्रेश ! तेऽन्यदा ॥ ४

यदि स्यात्सा कृता सत्यं तत्किं तिष्ठेदिहार्दितः ? ।
नद्यासाद्य नदीं सक्तां क्वचिदास्ते तृडाहतः ॥ ५

असद्दृष्टिग्रहग्रस्ता यदा चादीनरेक्षया (?) ।
रक्ष नः शरणायातानिदानीं नन्दिदायकः ॥ ६

नास्ति नः शरणं किञ्चिदन्यदत्र दयोदधे ! ।
तेन ते तरसा लीनाः कान्ते चरणनीरजे ॥ ७

श्रमणोपासकश्री दलपतरायविरचितम्

## १२. ॥ श्रीसिद्धविंशिकास्तोत्रम् ॥

(शिखरिणी)

मुनीनां दुस्तर्क्यः खलु दुरधिगम्योऽमृतभुजां
गुणानां ते राशिः कलयति नरस्तत् कथममुम् ? ।
विवक्षुः प्रौत्सुक्यात् स्वधियमविजानञ् जडमति-
र्निधातुं कुम्भान्तर्निधिमभिलषामीह पयसाम् ॥ १

त्वमीशानोऽस्माकं वयमपि च भृत्यास्तव विभो !
तदुच्चैर्भृत्यानां भवसि न कथं हन्त वरदः ? ।
यदा मादृक्षेण स्फुरति तव लज्जा जडधिया
धियः स्वस्या दाने वद किमिति कार्पण्यमतुलम् ? ॥ २

न रोधो नाऽवज्ञा न च खलभयं नाऽनवसरो
न चाऽसिद्धिर्नास्था चिरपरिचये नो चटुवचः ।
विभो ! त्वत्सेवायामिह यदपि सौकर्यमखिलं
तथाप्यस्मच्चेतो हतमितरसेवां स्पृहयति ॥ ३

श्रुते न व्यासङ्गो न च सततसङ्गोऽपि विदुषा-
मभङ्गो नोत्साहस्तपसि न च दानं न विरतिः ।
गुणैरस्पृष्टं नो बत जनममुं तारयसि चे-
ज्जडानामुद्धारे बत वरद ! काऽऽहोपुरुषिका ॥ ४

भजन्तेऽमी मामप्यहह विषयारूढमनस-
स्तदुद्धारे मा भूः श्लथितविनियोगो जडधियाम् ।
त्यजामो व्यासङ्गं विषमविषयाणां यदि तदा
स्वयं तूर्णं तीर्णास्त्वयि किमिति दैन्येन भगवन् ? ॥ ५

त्वमुद्धर्ता नृणामपि भवपयोधौ निपततां
विदित्वेत्यागां ते दुरितभरभुग्नोऽपि शरणम् ।
कुरूद्धारं नो चेत् सममिह मदीयैश्च दुरितैः
पराभूतिं गन्ता बत बत विवादव्यतिकरे ॥ ६

ममाङ्गीचक्रे त्वं परमपदलाभाहितधिया
त्वमीशौदासिन्यं भजसि यदि वाच्यं किमु पुनः ? ।
विदूरेऽभीष्टार्थप्रवितरणकीर्तिः किमुत मे
कृताङ्गीकारस्त्वं परमनृणभावं न भजसि ॥ ७

त्वमीश ! स्मर्तॄणां बहुलभवभावं निरसय-
न्न तर्क्यां मादृक्षैः श्रियमनुपमेयां वितनुषे ।

जनस्त्वामाख्याति श्रुतविदिह नीराग इति यत्
तदाश्चर्यं यद्वाऽद्भुतचरितलक्ष्या हि विभवः ॥ ८

उदासीनो नाथ ! त्वमिह भजतामप्यभजतां
सुखं वा दुःखं वा न खलु समदृश्वा स्पृहयसि ।
परं त्वन्नामैवाऽवति जनममुं विघ्नभरतो-
ऽभिधैव श्लाघ्या तत् त्वयि किमिति मोघं बत यशः ॥ ९

त्रिलोकी त्वामेवावसति जगदीशेति महिमा
तव श्लाघ्यो लोकेऽखिलजनचमत्कारजननः ।
मम त्वामप्यन्तर्हृदि निवहतः किञ्च न यशो
विना पुण्यैः कीर्तिं जगति किल कश्चिन्न लभते ॥ १०

समाच्छन्ना या श्रीः कृतकलुषकर्मोग्रपटलैः
प्रदेया सैवाऽऽशु स्वयमिह समुद्घाट्य सहसा ।
अये कीर्तिं सौधाकरकिरणकान्त्या सहचरीं
मदीयां तां मह्यं श्रियमवितरन् किं न भजसे ? ॥ ११

प्रकुर्वन्तः पापान्यपि भयमुपैमो नहि मनाक्
तवैवार्थेऽस्माभिर्व्यरचि दुरितानां व्यतिकरः ।
विना मादृक्षैस्ते विषमभवपाथोधिपतितैः
कथङ्कारं लभ्या वरद ! पतितोद्धारपदवी ॥ १२

त्वमुद्धर्तुं दीनान् दुरितभरभुग्नानपि विभो !
भवाब्धौ निक्षेप्तुं मम दुरितमत्याग्रहपरम् ।
दिदृक्षामो ब्रह्मन्निह विततवादव्यतिकरे
प्रतिज्ञायां कस्योल्लसति दृढभूमिः खलु हठः ॥ १३

समक्षस्त्वं नाऽक्ष्णोर्न च वरद ! चित्तानुकृतिभाग्
न वा लक्ष्यः स्वप्ने कथमपि न सेव्योऽसि वपुषा ।
तथाऽप्यस्मच्चेतस्त्वयि भजति रागाद्वशगतां
न जाने तद् ब्रह्मन् ! कतममभिचारं प्रथयसि ॥ १४

भवश्वभ्रापातः स्फुरति बत रागप्रभव इ-
त्युपास्ते त्वां लोको बत नियतरागं च विमृशन् ।
अये चित्रं चित्रं चरितमविचिन्त्यं वरद ! ते
श्रुतोऽप्यन्तर्नृणामतुलमनुरागं जनयसि ॥ १५

निशम्य स्वं दासं क्वचिदपि विपद्विघ्नितनुं
त्वरन्ते स्वां व्रीडां हृदि निदधतो हन्त विभवः ।
अये मामाक्रान्तं दृढदुरितलुण्ठाकनिकरै-
र्मुहुः पश्यन् पश्यन् बत बत न लज्जां कलयसि ॥ १६

पयोधेर्गाम्भीर्यं विषमतिमिनक्रैरुपहतं
हतः काठिन्येन ध्रुवमचलराजस्य महिमा ।
विनिर्मुक्ते दोषैरगणितगुणौघं श्रितवति
त्वयि ब्रह्मन् ! धत्ते सततसु(मु)पमां तद् द्वयमपि ॥ १७

पशुर्धेनुः शैलो मणिरवनिजन्मा तरुरथ
स्फुटं याञ्चा दैन्ये ददति मितमर्थं कथमपि ।
तव ब्रह्मन् ! स्वैरं श्रियमपरिमेयां वितरतो
न जाने त्रैलोक्यं कतरदुपमानं विलसति ॥ १८

इत्थं भक्तिचरातुरेण मनसा वाचामगम्योऽपि यन्
नूनं नाथ ! नुतोऽसि नव्यचरितैरत्युग्रकाव्यैर्मया ।

तुष्टो यद्यपि साम्प्रतं भवभयक्लेशाकुलं हन्त मा-
मङ्गीकुर्वनुकम्पया जिनपते ! नो चेदनङ्गीकुरु ॥(शा.वि.) १९

त्वमनङ्गोऽसि भगवन्नङ्ग मय्यनुकम्पताम् ।
यथाऽयं नाङ्गसंसर्गैः कर्हिचित् परिभूयते ॥ (अनु.) २०

श्रमणोपासक श्री दलपतरायविरचितम्

## १३. ॥ प्रश्नाष्टकम् ॥

(शिखरिणी)

अनाद्येयं मुक्तिर्ध्रुवमुपगतास्तां पुनरित-
स्तथाऽप्येषा रिक्ता नहि खलु कदाचित् समभवत् ।
तदेवं दुस्तर्क्यव्यतिकरनिराशाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ १

वहत्यध्वा मुक्तेरविरतमयं भव्यनिकरा-
ननन्तोऽसौ कालस्तदपि न च ते यान्ति विरतिम् ।
तदेवं दुस्तर्क्यव्यतिकरनिरासाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ २

अवश्यं सेत्स्यन्ति स्फुटमिह हि भव्यास्तदपि भो
अमी सिद्धेभ्यः स्युः खलु यदि कदाऽनन्तगुणिताः ।
तदेवं दुस्तर्क्यव्यतिकरनिरासाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ ३

अभाज्ये क्षेत्राणौ स्थितिमुपगतः पुद्गलगणः
पृथग्रूपेणाऽऽस्ते न च भजति सङ्घातनिचयम् ।

तदेवं दुस्तर्क्यव्यतिकरनिरासाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ ४

प्रदेशः स्वस्यैकः स्पृशति खलु दिक्स्थानपि परान्
पृथग्देशैः स्वस्याऽप्यवयवविहीनस्तदपि सः ।
तदेवं दुस्तर्क्यव्यतिकरनिरासाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ ५

दिगन्तं जीवोऽयं व्रजति समयैकेन घटयन्
नभोऽणून् निःसङ्ख्यास्तदपि च निराशो हि समयः ।
तदेवं दुस्तर्क्यव्यतिकरनिरासाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ ६

अणौ शीतादीनां द्वयमिह चतुर्णां निगदितं
कुतः स्कन्धे चाऽष्टौ कथमिह च शब्दादिघटना ।
तदेवं दुस्तर्क्यव्यतिकरनिरासाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ ७

कृतं पुंसा कर्म प्रभवति कथं तस्य घटना
निरादिः स्याद्वास्तां कथमिह निरादेर्विघटना ।
तदेवं दुस्तर्क्यव्यतिकरनिरासाक्षमधिया-
मचिन्त्यस्ते वाचां वहति महिमाऽऽश्वासनविधिम् ॥ ८

श्रीअमितगतिविरचिता

# १४. ॥ श्रीपरमात्मद्वात्रिंशिका ॥

(उपजाति)

सत्त्वेषु मैत्रीं गुणिषु प्रमोदं
क्लिष्टेषु जीवेषु कृपापरत्वम् ।
मध्यस्थभावं विपरीतवृत्तौ
सदा ममात्मा विदधातु देव ! ॥ १

शरीरतः कर्तुमनन्तशक्तिं
विभिन्नमात्मानमपास्तदोषम् ।
जिनेन्द्र ! कोषादिव खड्गयष्टिं
तव प्रसादेन ममास्तु शक्तिः ॥ (उपेन्द्रवज्रा) २

दुःखे सुखे वैरिणि बन्धुवर्गे
योगे वियोगे भवने वने वा ।
निराकृताशेषममत्वबुद्धेः
समं मनो मेऽस्तु सदापि नाथ ! ॥ ३

मुनीश ! लीनाविव कीलिताविव
स्थिरैर्निखाताविव बिम्बिताविव ।
पादौ त्वदीयौ मम तिष्ठतां सदा
तमो धुनानौ हृदि दीपकाविव ॥ ४

एकेन्द्रियाद्या यदि देव ! देहिनः
प्रमादिना सञ्चरता यतस्ततः ।
क्षता विभिन्ना मलिता निपीडिता
ममास्तु मिथ्या दुरनुष्ठितं तदा ॥ ५

विमुक्तिमार्गप्रतिकूलवर्तिना
मया कषायाक्षवशेन दुर्धिया ।
चारित्र्यशुद्धेर्यदकारि लोपनं
तदस्तु मिथ्या मम दुष्कृतं प्रभो ! ॥ ६

विनिन्दनालोचनगर्हणैरहं
मनोवच:कायकषायनिर्मितम् ।
निहन्मि पापं भवदु:खकारणं
भिषग् विषं मन्त्रगुणैरिवाखिलम् ॥ (वंशस्थ) ७

अतिक्रमं यं यमपि व्यतिक्रमं
जिनातिचारं स्वचरित्रकर्मण: ।
व्यधामनाचारमपि प्रमादत:
प्रतिक्रमं तस्य करोमि शुद्धये ॥ (वंशस्थ) ८

क्षतिं मन:शुद्धिविधेरतिक्रमं
व्यतिक्रमं शीलवृतेर्विलङ्घनम् ।
प्रभोऽतिचारं विषयेषु वर्तनं
वदन्त्यनाचारमिहातिशक्तिताम् ॥ (वंशस्थ) ९

यदर्थमात्रापदवाक्यहीनं
मया प्रमादादिह किञ्चनोक्तम् ।
तन्मे क्षमित्वा विदधातु देवी
सरस्वती केवलबोधलब्धिम् ॥ १०

बोधि: समाधि: परिणामबुद्धि:
स्वात्मोपलब्धि: शिवसौख्यसिद्धि: ।

चिन्तामणिं चिन्तितवस्तुदाने
त्वां वन्दमानस्य ममाऽस्तु देव ! ॥ (इन्द्रवज्रा) ११

यः स्मर्यते सर्वमुनीन्द्रवृन्दै-
र्यः स्तूयते सर्वनरामरेन्द्रैः ।
यो गीयते वेदपुराणशास्त्रैः
स देवदेवो हृदये ममास्ताम् ॥ १२

यो दर्शनज्ञानसुखस्वभावः
समस्तसंसारविकारबाह्यः ।
समाधिगम्यः परमात्मसञ्ज्ञः
स देवदेवो हृदये ममास्ताम् ॥ १३

निषूदते यो भवदुःखजालं
निरीक्षते यो जगदन्तरालम् ।
अन्तर्गतो योगिनिरीक्षणीयः
स देवदेवो हृदये ममास्ताम् ॥ १४

विमुक्तिमार्गप्रतिपादको यो
यो जन्ममृत्युव्यसनव्यतीतः ।
त्रिलोकलोकीविकलोऽकलङ्कः
स देवदेवो हृदये ममास्ताम् ॥ १५

क्रोडीकृताशेषशरीरिवर्गा
रागादयो यस्य न सन्ति दोषाः ।
निरिन्द्रियो ज्ञानमयोऽनपायः
स देवदेवो हृदये ममास्ताम् ॥ १६

यो व्यापको विश्वजनीनवृत्तिः
सिद्धो विबुद्धो धुतकर्मबन्धः ।
ध्यातो धुनीते सकलं विकारं
स देवदेवो हृदये ममास्ताम् ॥ १७

न स्पृश्यते कर्मकलङ्कदोषै-
र्यो ध्वान्तसङ्घैरिव तिग्मरश्मिः ।
निरञ्जनं नित्यमनन्तमेकं
तं देवमाप्तं शरणं प्रपद्ये ॥ १८

विभासते यत्र मरीचिमाली
न विद्यमाने भुवनाधिभासी ।
स्वात्मस्थितं बोधमयप्रकाशं
तं देवमाप्तं शरणं प्रपद्ये ॥ १९

विलोक्यमाने सति यत्र विश्वं
विलोक्यते स्पष्टमिदं विविक्तम् ।
शुद्धं शिवं शान्तमनाद्यनन्तं
तं देवमाप्तं शरणं प्रपद्ये ॥ २०

येन क्षता मन्मथ-मान-मूर्च्छा-
विषाद-निद्रा-भय-शोक-चिन्ताः ।
क्षयानलेनेव तरुप्रपञ्चस्-
तं देवदेवं शरणं प्रपद्ये ॥ २१

न संस्तरोऽश्मा न तृणं न मेदिनी
विधानतो नो फलकं विनिर्मितम् ।

यतेर्निरस्ताक्षकषायविद्विषः
सुधीभिरात्मैव सुनिर्मलो मतः ॥ (वंशस्थ) २२

न संस्तरो भद्रसमाधिसाधनं
न लोकपूजा न च सङ्घमीलनम् ।
यतस्ततो ध्यानरतो भवानिशं
विमुच्य सर्वामपि बाह्यवासनाम् ॥ (वंशस्थ) २३

न सन्ति बाह्या मम केचनाऽर्था
भवामि तेषां न कदाचनाहम् ।
इत्थं विनिश्चित्य विमुच्य बाह्यं
स्वस्थः सदा त्वं भव भद्र ! मुक्तौ ॥ २४

आत्मानमात्मन्यवलोकमानस्-
त्वं दर्शनज्ञानमयं विशुद्धः ।
एकाग्रचित्तः खलु यत्र तत्र
स्थितोऽपि साधो ! लभसे समाधिम् ॥ २५

एकः सदा शाश्वतिको ममात्मा
विनिर्मलेक्षाधिगमस्वभावः ।
बहिर्भवाः सन्ति परे समस्ता
न शाश्वताः कर्मभवाः स्वकीयाः ॥ २६

यस्यास्ति नैक्यं वपुषाऽपि सार्द्धं
तस्यास्ति किं पुत्रकलत्रमित्रैः ।
पृथक्कृते चर्मणि रोमकूपाः
कुतो हि तिष्ठन्ति शरीरमध्ये ? ॥ २७

संयोगतो दुःखमनेकभेदं
यतोऽश्नुते जन्मवने शरीरी ।
ततस्त्रिधाऽसौ परिवर्जनीयो
यियासुना निर्वृतिमात्मनीनाम् ॥ २८

सर्वं निराकृत्य विकल्पजालं
संसारकान्तारनिपातहेतुम् ।
विविक्तमात्मानमवेक्षमाणो
निलीयसे त्वं परमात्मतत्त्वे ॥ २९

स्वयं कृतं कर्म यदात्मना पुरा
फलं तदीयं लभते शुभाशुभम् ।
परेण दत्तं यदि लभ्यते स्फुटं
स्वयं कृतं कर्म निरर्थकं तदा ॥ (वंशस्थ) ३०

निजार्जितं कर्म विहाय देहिनो
न कोऽपि कस्यापि ददाति किञ्चन ।
विचारयन्नेवमनन्यमानसः
परो ददातीति विमुञ्च शेमुषीम् ॥ (वंशस्थ) ३१

इति द्वात्रिंशता वृत्तैः परमात्मानमीक्षते ।
अनन्यगतचेतस्को यात्यसौ पदमव्ययम् ॥ (अनुष्टुप्) ३२

यैः परमात्माऽमितगतिविद्यः सर्वविविक्तो भृशमनवद्यः ।
शश्वदधीतो मनसि लभन्ते मुक्तिनिकेतं विभवजरं ते ॥ ३३
(मौक्तिकमाला)

## १५. ॥ श्रीपरमानन्द-पञ्चविंशतिका-स्तोत्रम् ॥

(अनुष्टुप्)

परमानन्द-संयुक्तं, निर्विकारं निरामयम् ।
ध्यानहीना न पश्यन्ति निजदेहे व्यवस्थितम् ॥ १

अनन्तसुख-सम्पन्नं, ज्ञानामृत-पयोधरम् ।
अनन्तवीर्य-सम्पन्नं दर्शनं परमात्मनः ॥ २

निर्विकारं निराधारं सर्वसङ्गविवर्जितम् ।
परमानन्द-सम्पन्नं शुद्धचैतन्य-लक्षणम् ॥ ३

उत्तमाऽध्यात्मचिन्ता च, मोहचिन्ता च मध्यमा ।
अधमा कामचिन्ता च, परचिन्ताऽधमाधमा ॥ ४

निर्विकल्पसमुत्पन्नं, ज्ञानमेव सुधारसम् ।
विवेकमञ्जलिं कृत्वा, तं पिबन्ति तपस्विनः ॥ ५

सदानन्दमयं जीवं, यो जानाति स पण्डितः ।
स सेवते निजात्मानं, परमानन्द-कारणम् ॥ ६

नलिन्यां च यथा नीरं, भिन्नं तिष्ठति सर्वदा ।
अयमात्मा स्वभावेन, देहे तिष्ठति सर्वदा ॥ ७

द्रव्यकर्म-विनिर्मुक्तं, भावकर्म-विवर्जितम् ।
नोकर्म-रहितं विद्धि, निश्चयेन चिदात्मनम् ॥ ८

अनन्तब्रह्मणो रूपं निजदेहे व्यवस्थितम् ।
ध्यानहीना न पश्यन्ति, जात्यन्धा इव भास्करम् ॥ ९

तद्ध्यानं क्रियते भव्यै, र्येन कर्म विलीयते ।
तत्क्षणं दृश्यते शुद्धं, चिच्-चमत्कारलक्षणम् ॥ १०

चिदानन्दमयं शुद्धं, निराकार–निरामयम् ।
अनन्त–सुखसम्पन्नं, सर्वसङ्गविवर्जितम् ॥ ११

लोकमात्रप्रमाणो हि, निश्चये न हि संशयः ।
व्यवहारे देहमात्रं, कथयन्ति मुनीश्वराः ॥ १२

यत्क्षणं दृश्यते शुद्धं, तत्क्षणं गतविभ्रमम् ।
स्वस्थचित्तं स्थिरीभूतं, निर्विकल्पं समाधिना ॥ १३

स एव परमं ब्रह्म, स एव जिनपुङ्गवः ।
स एव परमं तत्त्वं, स एव परमो गुरुः ॥ १४

स एव परमं ज्योतिः, स एव परमं तपः ।
स एव परमं ध्यानं, स एव परमात्मकम् ॥ १५

स एव सर्वकल्याणं, स एव सुखभाजनम् ।
स एव शुद्धचिद्रूपं, स एव परमं शिवम् ॥ १६

स एव ज्ञानरूपो हि, स एवात्मा न चाऽपरः ।
स एव परमा शान्तिः, स एव भवतारकः ॥ १७

स एव परमानन्दः, स एव सुखदायकः ।
स एव घन–चैतन्यं, स एव गुण–सागरः ॥ १८

परमाह्लादसम्पन्नं, राग–द्वेषविवर्जितम् ।
सोऽहं तु देहमध्यस्थो, यो जानाति स पण्डितः ॥ १९

आकार–रहितं शुद्धं, स्वस्वरूपे व्यवस्थितम् ।
सिद्धमष्टगुणोपेतं, निर्विकारं निरञ्जनम् ॥ २०

तत्समं तु निजात्मानं, यो जानाति स पण्डितः ।
सहजानन्द–चैतन्यं, प्रकाशयति महीयसे ॥ २१

पाषाणेषु यथा हेमं, दुग्ध–मध्ये यथा घृतम् ।
तिल–मध्ये यथा तैलं देह–मध्ये तथा शिवः ॥ २२

काष्ठमध्ये यथा वह्निः, शक्तिरूपेण तिष्ठति ।
अयमात्मा शरीरेषु, यो जानाति स पण्डितः ॥ २३

आनन्द–रूपं परमात्मतत्त्वं,
समस्तसङ्कल्पविकल्प–मुक्तम् ।
स्वभावलीना निवसन्ति नित्यं,
जानाति योगी स्वयमेव तत्त्वम् ॥ (उपजाति) २४

ये धर्मशीला मुनयः प्रधानास्,
ते दुःखहीना नियतं भवन्ति ।
सम्प्राप्य शीघ्रं परमात्मतत्त्वं,
व्रजन्ति मोक्षं क्षणमेकमध्ये ॥ (उपजाति) २५

## ९६. ॥ श्रीजिन–षट्पदीगीतम् ॥

(..........)

भविक जन भज जिनवरचरणं, नखशशिविभाविभूषित–
परिकर–सहितसमवसरणम् भविकजन०

स्फुरद्बोधवैभवबाधितजन–कृतसमुचितशरणम् ।
निजसमक्षशङ्कासङ्कुलजन–कृतशङ्काहरणम् ॥ १

चतुःषष्ठिसपरिकरसुराधिप–विरचितवरवरणम् ।
मधुरमहोदयलाभलसितजन–पुङ्गवपरमधनम् ॥ २

आगमनिगमवेदिबुधपुङ्गव–गणधरगीतगुणम् ।
समुचितसविधिसुभगसेवकजन–बोधिदाननिपुणम् ॥ ३

व्यन्तररचितकनकमयकोमल–कमलकृताक्रमणम् ।
निजदर्शनबाधितसेवकजन–भाविभवभ्रमणम् ॥ ४

स्वस्तिकचक्रप्रभृतिरेखागण–लसितममलमरुणम् ।
प्राणिमात्रप्रतिबोधदक्षमति–कलितमहाकरुणम् ॥ ५

मङ्गलमूलमभितनतिमूलं सर्वसिद्धिसदनम् ।
वर्षानन्दविहितहितगीतं कुरुकण्ठाभरणम् ॥ ६

## ९७. ॥ शयनसमये स्मरणीयं स्तोत्रम् ॥

(अनुष्टुप्)

विघ्नव्रातलतानेमिं, श्री नेमिं मनसि स्मरन् ।
स्वापकाले नरो नैवं, दुःस्वप्नैः परिभूयते ॥ १

अश्वसेनावनिपाल, वामादेवी तनुरुहम् ।
श्रीपार्श्वं संस्मरन्नित्यं, दुःस्वप्नान्नैव पश्यति ॥ २

श्रीलक्ष्मणाङ्गसम्भूतं, महासेन–नृपाङ्गजम् ।
चन्द्रप्रभं स्मरंश्चित्ते, सुखं निद्रां लभेत वै ॥ ३

सर्वविघ्नहरं स्तोत्रं, सर्वसिद्धिकरं परम् ।
ध्यायन् शान्तिजिनं नैति, चौरादिभ्यो भयं नरः ॥ ४

## १८. ॥ नमो जिनाय स्तोत्रम् ॥

(इन्द्रवज्रा)

नागेन्द्र-देवेन्द्र-नमस्कृताय, रागादिशत्रुक्षयकारकाय ।
कर्माष्ट-विध्वंसनतत्पराय, तस्मै नकाराय नमो जिनाय ॥ १

मानक्षयेषूग्रपराक्रमाय, संसारसिन्धोः जनतारकाय ।
देवाधिदेवाय भवान्तकाय, तस्मै मकाराय नमो जिनाय ॥ २

जैनं त्रिलोके परिवर्तकाय, अष्टप्रतिहार्यविभूषिताय ।
श्रीवीतरागाय गुणातिगाय, तस्मै जकाराय नमो जिनाय ॥ ३

नाथाधिनाथाय महाबलाय, इन्द्रादिपूज्याय महेश्वराय ।
नाकाधिपैः सेवितपत्केजाय, तस्मै नकाराय नमो जिनाय ॥४

योगीन्द्रवन्द्याय सुखप्रदाय, सर्वज्ञदेवाय यशोधनाय ।
त्रैलोक्यनाथाय शुभङ्कराय, तस्मै यकाराय नमो जिनाय ॥ ५

पञ्चाक्षरमिदं स्तोत्रं, यः पठेत् जिनसन्निधौ ।
स शीघ्रं मोक्षमाप्नोति, चिदानन्देन मोदति ॥ (अनुष्टुप्) ६

# ९९. ॥ श्रीसर्वजिनस्तवः ॥

(द्रुतविलम्बित)

जिनपते ! द्रुतमिन्द्रियविप्लवं दमवतामवतामवतारणम् ।
वितनुषे भववारिधितोऽन्वहं सकलया कलया कलयाकया ॥१

तव सनातनसिद्धिसमागमं विनयतो नयतो न यतो जनम् ।
जिनपते ! सविवेकमुदित्वाराधि-
कमला कमला कमलासयेत् ॥ २

भवविवृद्धिकृते कमलागमो जिनमतो नमतो न मतो मम ।
न रतिदाऽमरभूरुहकामधुक् सुरमणीरमणीरमणीयता ॥ ३

किल यशःशशिनि प्रसृते शसी नरकतारकतारकतामितः ।
व्रजति शोषमतोऽपि महानहो विभवतो भवतो भवतोयधिः ॥४

न मनसो मम येन जिनेश ! ते रसमयः समयः समयत्यसौ ।
जगदभेदि विभाव्य ततः क्षणादुपरता परता परतापकृत् ॥ ५

त्वयि बभूव जिनेश्वर ! भास्वती शममता ममता मम तादृशी ।
यतिपते ! तदपि क्रियते न किं शुभवता भवता भवतारणम् ॥६

भवति यो जिननाथ ! मनः शमाञ्चित ! नुते तनुते तनुतेजसि ।
किमिव नो भविनस्तमतां सुख-
प्रसविता सविता सवितारयेत् ॥ ७

परमया रमया रमयात् तवाङ्घ्रिकमलं कमलं कमलम्भयम् ।
न नतमानत मानतमां नमन् वरविभारविभारविभासुर ! ॥ ८

अमरसामरसामरनिर्मिता जिन ! नुतिर्ननु तिग्मरुचेर्यथा ।
रुचिरसौ चिरसौख्यपदप्रदा निहतमोहतमोरिपुवीर ! मे ॥ ९

## १००. ॥ श्रीमदर्हतः चैत्यवन्दनम् ॥

(अनुष्टुप्)

एकस्माद् रणरणकः, परस्माच्च न नैपुणम् ।
स्तोत्रे ते भव्यशक्तिभ्यां, चेतो दोलायते मम ॥ १

तथापि त्वां यथाशक्ति, नाथ ! स्तुतिपथं नये ।
मशकोपि किमु व्योम, नोत्प्लवेत स्ववेगतः ॥ २

कथं तवामितदातु-र्मितदाः स्वर्द्रुमादयः ।
उपमामुपयान्तीति, नोपमेयोऽसि केनचित् ॥ ३

न प्रसीदसि कस्यापि, न ददासि च किञ्चन ।
तदप्याराध्यसे सर्वै-रहो ते रीतिरद्भुता ॥ ४

निर्ममोपि जगत्त्राता, निःसङ्गोपि जगत्प्रभुः ।
लोकोत्तरस्वरूपाय, निरूपाय नमोऽस्तु ते ॥ ५

## १०१. ॥ श्रीजिनस्तवनम् ॥

(मालिनी)

शिवशिरसि निवासं यः सदाशाविकाशं,
जनयति जिनचन्द्रः प्रत्तपापाबु(म्बु?)तन्द्रः ।
सततमुदयकर्तृत्वेन तं गुप्तकर्तृ-
प्रभृतिरचनतोऽहं नौमि भक्त्या तमोहम् ॥ १

जननमृतितरङ्गापारसंसारवार्द्धे-
स्त्रिभुवनजनतारं यानपात्रानुकारम् ।

जिनगुणगणरम्यं त्वां निरीक्ष्योत्सुकत्वं,
किमु न भजति सिद्धिद्वीपसंप्राप्तिहेतोः ॥ २

विमलविपुलभास्वत्केवलालोकलक्ष्मी-
प्रकटितभुवन ! त्वं देव ! सद्यः प्रसद्य ।
शमितविततरोष ! ध्वस्तनिःशेषदोष !,
प्रणतसुरहरिद्रो ! दुःखिने देहि मन्यम् ॥ ३

प्रणमदमरनाथप्रार्थ्यमानांह्रिसेव !
स्फुटमशिवमियन्तं नाथ ! कालं विनाथः (?) ।
प्रशमितभवतापं ध्वस्तभावारिवारा-
ऽजनिषि पुनरिदानीं सर्वथाऽहं सनाथः ॥ ४

नतहितशतकारी त्वं भुवि ज्ञानभाभिः
परम इति सतृष्णं नाथ ! विज्ञप्यमानः ।
प्रवितर शिवशर्माऽनन्तदुःकर्ममर्मा-
ऽचलकुलिशविलम्बं मा स्म कार्षीरिहाऽर्थे ॥ ५

मदमदनकषायोद्दामदावानलार्चिः-
प्रशमनघन ! मन्ये पुण्यवानद्य नाऽन्यः ।
सदतिशयसनाथस्त्वं प्रभो ! भाग्यलभ्यः,
स्फुरसि हृदि मदीये यत् परात्मस्वरूपः ॥ ६

सुरनरवरहंसश्रेणिसंसेवनीयं,
सकलभुवनलक्ष्मीकेलिसद्मांह्रिपद्मम् ।
निखिलसुखमरन्दास्वादसानन्दचेता-
स्त्रिजगदधिपतेऽहं भृङ्गवत् संश्रयामि ॥ ७

किमु दधति विधिज्ञाः सस्पृहं मानसं स्वं,
शमघनजिनराज ! न्यस्तदोषानुभावम् ।
सकलकुवलयैकोल्लासकं वीक्ष्य हर्षात्,
तव वदनमजस्रं श्रीश्रितं गोऽभिरामम् ॥ ८

जिनवर ! हरहासोल्लासिकीर्ति ममार्ति,
बहुविधविबुधार्च्य ! त्वं वशं ब्रह्मशर्म ! ।
तनुरुचिनिचयास्तध्वान्त ! तत्त्वावबोधः,
शुभशमदमधामा सादरं प्रार्थनेऽस्मिन् ॥ ९

यः श्रीसर्वज्ञमेवं त्रिभुवनविनुतं प्राज्यपुण्योपलभ्यं,
हासोत्त्रासादिदोषप्रमथनमुपमातीतरूपातिकम्रम् ।
कामस्थामप्रमाथं विनयनुतजनस्वान्तरं जीवसूर्यं,
स्तौति प्रीतान्तरात्मा श्रयति न स कथं मोक्षलक्ष्मीं वरिष्ठाम्॥१०
(स्रग्धरा)

## १०२. ॥ द्विस्वरत्रिव्यञ्जनयुक्ता षट्श्लोकी ॥

(अनुष्टुप्)

स रसासारसंसारं, संसारं तरसा रसात् ।
ततार तरसा तारं, ससतां तारसारराः ॥ १

तान्तासात रसं तान्ता-सातान्तं सन्ततातत ।
सारसारसतारान्त-रससारसरः सताम् ॥ २

सारतां रसता तारं, तारताररसारत ।
तातारारसतां तात-तारातरसतः सतः ॥ ३

रसरासासरसासा–सारसारससारसम् ।
रसासाररसासारं, रसं सरससारसम् ॥ ४

रसासारं सतां तार–रतं संसरतां सताम् ।
संसारान्तररं सा त – ततारं सारसं ततः ॥ ५

सान्तान्तरारराररा, रसारसस सन्तत ।
सान्तरान्तरान्तान्तं तं, रससारतरान्तर ॥ ६

## १०३. ॥ अष्टप्रकारजिनपूजाष्टकम् ॥

काश्मीरैर्मलयोद्भवैर्मृगमदैः कर्पूरपूरैः परै–
र्गन्धैर्गन्धविलुब्धमत्तमधुपश्रेणीभिरासेवितैः ।
कल्याणैकमहोदधेर्जिनपतेः सद्भक्तिरोमाञ्चितः
पूजां गन्धवतीं करोमि नितरां स्वर्गापवर्गेच्छया ॥ (गन्धपूजा)१
(शा.वि.)

मन्दारैः सिन्धुवारैः सुरभिशतदलैः पारिजातैरशोकैः
पुन्नागैर्नागकुन्दैर्विचकिलबकुलैश्चम्पकैर्जातिपत्रैः ।
कल्हारैः काञ्चनारैः सुरभिसुमनसैर्गन्धलुब्धालिश्लिष्टै–
र्भक्त्या पादारविन्दं भवभयमथनं पूजयामो जिनस्य ॥ २
(पुष्पपूजा)(स्रग्धरा)

सद्गन्धद्रविणप्रयोगरचिता(तं) स्वर्गप्रियं चूर्णितं
सत्कृष्णागुरुकुन्दुरुष्कसहितं वह्नौ परिक्षेपितम् ।

गन्धोत्कर्षविलुब्धषट्पदकुलव्यालोलधूमोत्करं
धूपं तीर्थकृतः प्रमोदवसतेरुद्वाहयाम्यादरात् ॥ (धूपपूजा) ३
(शा.वि.)

सच्छुभ्रैः कान्तिमद्भिः शशिकरनिकरोद्भासिभिर्दुग्धवर्णै-
र्गन्धाढ्यैरग्रपूर्णैर्मधुलिहपटलोद्भ्रान्तिझात्काररम्यैः ।
अन्तःसारैः पवित्रैर्जननयनमनोहारिभिः पावनात्मा
कुर्वेऽहं लोकबन्धो क्रमकमलपुरस्तन्दुलैः स्वस्तिकाद्यम् ॥ ४
(अक्षतपूजा)(स्रग्धरा)

सद्गन्धोद्धुरसर्पिषा परिमितं पक्वं नवान्नं परं
पक्वान्नं परमान्नखण्डसहितं दध्याज्यदुग्धैर्युतम् ।
भक्त्या तीर्थपतेर्जिनस्य पुरतो नैवेद्यमत्यद्भुतं
सर्वोपद्रवहारि विस्मयकरं यच्छाम्यहं(?) श्रेयसे ॥ ५
(नैवेद्यपूजा) (शा.वि.)

स्वर्न्नादेयैः सरै(रे?)वैः सुरभिसुमनसैर्वासितैः कान्तिमद्भि-
र्दुग्धाम्भोधिप्रसूतैः विधुकरधवलैः पावनैः स्वच्छशीतैः ।
शस्वल्लोकैकभर्तुः क्रमकमलपुरो वारिभिः पूरयित्वा
हैमं कुम्भं विधास्ये स्मितकमलमुखोद्भासितं भूरिशोभम् ॥ ६
(जलपूजा)(स्रग्धरा)

सच्छ्रीकान् स्वर्णवर्णान् बहलपरिमलालीढमत्तालिमालान्
सद्यो वृक्षप्रमुक्तान् सरसरसभृतान् वृत्तवृन्तोपयुक्तान् ।
अव्यङ्गान् पत्रपूर्णान् विविधसुरवधूदत्तहस्तान् मनोज्ञान्
भक्त्या लोकैकभर्तुः क्रमयुगलपुरो ढौकयामः फलादीन् ॥ ७
(फलपूजा) (स्रग्धरा)

मिथ्यात्वध्वान्तराशेर्नवतरणिनिभं श्रेयसां धाम चित्रं
मित्रं सन्मुक्तिलक्ष्म्यास्तरुणमणिशिखासोदरं भाप्रभूतम् ।
रम्यं विश्वैकभर्तुश्चरणयुगपुरः प्राज्यपूर्णं मनोज्ञं
संसाराम्भोधिभीताः परमविनयतो बोधयामः प्रदीपम् ॥ ८

(दीपपूजा)(स्रग्धरा)

## १०४. ॥ श्रीवीतरागस्तोत्रम् ॥

(अनुष्टुप्)

श्री वीतरागसर्वज्ञ जिनेश ! परमेश्वर ! ।
भगवँस्त्रिजगन्नाथ ! जय तारक ! पारग ! ॥ १

निर्द्वेषि ! विगतद्वेष ! जय निर्दम्भ ! निर्मद ! ।
निरीह ! निरहङ्कार ! करुणारससागर ! ॥ २

जय निर्माय ! निर्मान ! कर्माष्टकविवर्जित ! ।
निस्सङ्गरङ्ग ! गम्भीर ! प्रभो ! निर्भय ! निर्भव ! ॥ ३

बुद्धस्तीर्थकरः सिद्धो बोधिदोऽभयदो जिना(नः) ।
त्रिकालवेदी स्याद्वादी निर्ममो मम नायकः ॥ ४

सुप्रभातं सुदिवसं कल्याणं मेऽद्य मङ्गलम् ।
यद्वीतराग ! दृष्टोऽसि त्वं त्रैलोक्यदिवाकरः ॥ ५

अद्य छिन्ना मोहपासा(शा) अद्य रागादयो जिताः ।
अद्य मोक्षसुखं जातं अद्य तीर्णो भवार्णवः ॥ ६

मनः प्रसन्नं सम्पन्नं नेत्रे पीयूषपूरिते ।
अहं स्नातः सुधाकुण्डे सर्वज्ञ ! तव दर्शने ॥ ७

नत्वा स्तुत्वा पूजयित्वा स्नानं कृत्वा जिनेश्वरः ।
परमात्मान्मयो[नमु]न्माद्य(?) पुण्यपात्रं पवित्रितः ॥ ८

सुलब्धं मेऽद्य मानुष्यं कृतार्थं मेऽद्य जीवितम् ।
धन्योऽस्मि कृतपुण्योऽस्मि यत्प्राप्तं जिनशासनम् ॥ ९

त्वमेव देवः त्वं त्राता त्वं मित्रं त्वं च जीवितम् ।
त्वं गतिस्त्वं मतिः स्वामिन् ! श्रीसर्वज्ञ ! त्वमेव मे ॥ १०

दिवा रात्रौ सुखे दुःखे जीविते मरणे भवे ।
भवेतां वीतरागस्य चरणे शरणं मम ॥ ११

श्रीवीतराग ! सर्वज्ञ ! त्वं मे जानासि भावनाम् ।
निःकृत्रिमा यदि भक्तिस्तत् प्रसादं विधेहि मे ॥ १२

नाभ्यर्थये स्वर्गसुखं न राज्यं मानुष्यकान्नैव च कामभोगान् ।
भवान्तरेऽपि त्वयि वीतराग !
साह्लादभक्तिर्मम कम्ब(केव)ला स्यात् ॥ (उपजाति) १३

## १०५. ॥ यमकबन्धमयः श्रीजिनस्तवः ॥

(द्रुतविलम्बित)

असमसम्मददायिवचःप्रथं, सततपूरितविश्वमनोरथम् ।
नवितुमीशमनुत्तरसंविदं, जिनवरं समलाम-तमोभिदम् ॥ १

मदनसूदन ! सूदय ! देहिनां, भवभयं जिन ! सूदय सत्वरम् ।
भुवनबान्धव ! सूदय ! भाविनां,
महिममन्दिर ! सूदय मानसे ॥ २

विमल ! ते पदपङ्कजयामलं, विमलते हृदि यो जिन ! यामलम्।
विम ! लसद्गुण सोऽयतयामलं,
विमलमोक्षसनातनयामलम् ॥ ३

विभव ये वचनं विनिशम्य ते,
विभ ! वमन्ति महोद ! यमायिनः ।
विभवबान्धवमोहममोह ! ते, विभवमन्ति महोदयमायिनः ॥४

प्रभवतीह विभो ! त्वयि नित्यशः, प्रभवतीव रिपुर्मम मन्मथः।
प्रभव ! तीर्थपते ! सुमते रमा-
प्र ! भवतीरद ! माऽव नतं ततः ॥ ५

सुकरवाम तवाऽसमशासनं, सुक ! रवाम गुणस्तवनं तव ।
सुकर ! वाम सदा तव दासतां, सुकरवामजयाः प्रभवामह ! ॥६

सुकलयाम विभो ! तव सेवनं, सुकल ! याम मतं तव सन्ततम्।
सुकलयाम सदा भवदागमात्, सुकल ! यामभरं समवामह ॥७

हततमार ! भवान् भविनामनी-ह ! तत माऽरभ नूनमुपेक्षणम् ।
हततमा रभसा पततां भवे-ऽहतत ! मारमतङ्गजकेसरी ॥ ८

समत तारयशोभर ! मत्सरा-स ! मततार ! विभो ! मम मानसे।
समततारभिदाशु भवान्महा-
समत ! तारय माऽसम ! सेवकम् ॥ ९

कमल कामद ! देव ! सदाऽपि
सत्कमलकाऽमद ! दातुमनुत्तरम् ।
कमल ! कामद ! कोपदवानले-
ऽकमलकाऽऽमद भव्यतनूमताम् ॥ १०

समर ! मोदितविष्टपरिष्टपाऽसमरमोऽदित शं भविनां भवान् ।
समरमो दितमोह ! तमोहराऽसमरमोदितपः सुगुणातत ! ॥११

विनयवामनवासवसन्तते !, विनयवामनराऽनुपलक्षित ! ।
विनय ! वामनमारभवं भयं, विनयवामनगाऽमरपायुध ! ॥१२

हृदय मोदितदेवनरावली-हृदय ! मोदित ! देव ! सदा सताम् ।
हृदयवज्जनसंस्तुत ! मोहभी-
हृदयवज्जनयाऽऽश्रितमण्डलम् ॥ १३

परम ! मा नय माभवमीश्वरा-ऽपर ! ममाऽऽनय संयममञ्जसा॥
परम मानय मा निजसेवकं, परममानय मे गुणसम्पदम् ॥१४

समदयोदय देव ! तवाऽरते-ऽसमद ! यो दयते हृदयं मते ।
समद ! योदय ईरितसंसृते ! - ऽसमदयोदयतेऽस्य निरन्तरम्॥१५

एवं श्रीशुभराशिदं दरहरं जिष्णुः प्रमादद्विषं
सार्वं देवमदूष्यमुत्तरविभं नम्रावलीरक्षकम् ।
स्तौत्याबद्धरसं कृती नरवरस्तथ्याशयः सूक्तिभि-
र्योऽसौ सुन्दरमातनोति रयतोऽवश्यां विसारिश्रियम् ॥ १६
(शार्दूलविक्रीडित)

## १०६. ॥ नन्दिक्रिया-स्तुतयः ॥

अर्हंस्तनोतु स श्रेयः श्रियं यद् ध्यानतो नरैः ।
अप्यैन्द्री सकलाऽत्रैहि, रंहसा सह सौच्यत ॥ (श्लोक) १
(आर्या)

ओमिति मन्ता यच्छासनस्य, नन्ता सदा यदंह्रींश्च ।
आश्रीयते श्रिया ते, भवतो भवतो जिनाः पान्तु ॥ २

नवतत्त्वयुता त्रिपदीश्रिता रुचिज्ञानपुण्यशक्तिमता ।
वरधर्मकीर्तिविद्याऽऽनन्दाऽऽस्या जैनगीर्जियात् ॥ ३

श्रीशान्तिः श्रुतशान्तिः, प्रशान्तिकोऽसावशान्तिमुपशान्तिम् ।
नयतु सदा यस्य पदाः, सुशान्तिदाः सन्तु सन्ति जिने ॥ ४

सकलार्थसिद्धिसाधनबीजोपाङ्गा सदा स्फुरदुपाङ्गा ।
भवतादनुपहतमहातमोपहा द्वादशाङ्गी वः ॥ ५

वद वदति न वाग्वादिनि !
भगवती ! कः ? श्रुतसरस्वती ! गमेच्छुः ! ।
रङ्गत्तरङ्गमतिवरतरणिस्तुभ्यं नम इतीह ॥ ६

उपसर्गवलयविलयननिरता जिनशासनावनैकरताः ।
द्रुतमिह समीहितकृते स्युः शासनदेवता भवताम् ॥ ७

सङ्केऽत्र ये गुरुगुणौघनिधे सुवैया-
वृत्त्यादिकृत्यकरणैकनिबद्धकक्षाः ।
ते शान्तये सह भवन्तु सुराः सुरीभिः
सद्दृष्टयो निखिलविघ्नविघातदक्षाः ॥ (वसन्ततिलका) ८

## १०७. ॥ श्रीअर्हद्विभूतिस्तवः ॥

(विषमवृत्तम्)

नित्यं निःस्वेदत्वं निर्मलता क्षीरगौररुधिरत्वं च ।
स्वाद्याकृतिसंहनने सौरूप्यं सौरभं च सौलक्ष्यम् ॥ १

अप्रतिमवीर्यता च प्रियहितवादित्वमन्यदमितगुणस्य ।
प्रथिता दशसङ्ख्याता स्वतिशयधर्माः स्वयम्भूवो देहस्य ॥२

गव्यूतिशतचतुष्टसुभिक्षतागगनगमनमप्राणिवधः ।
भुक्त्युपसर्गाभावश्चतुरास्यत्वं च सर्वविद्येश्वरता ॥ ३

अच्छायत्वमपक्ष्मस्पन्दश्च समप्रसिद्धनखकेशत्वम् ।
स्वतिशयगुणा भगवतो घातिक्षयजा भवन्ति तेऽपि दशैव ॥४

सार्वार्धमागधीया भाषा मैत्री च सर्वजनताविषया ।
सर्वत्र फलस्तबकप्रवालकुसुमोपशोभिततरुपरिणामा ॥ ५

आदर्शतलप्रतिमा रत्नमयी जायते मही च मनोज्ञा ।
विहरणमन्वेत्यनिलः परमानन्दश्च भवति सर्वजनस्य ॥ ६

मरुतोऽपि सुरभिगन्धव्यामिश्रा योजनान्तरं भूभागम् ।
व्युपशमितधूलिकण्टकतृणकीटकशर्करोपलं प्रकुर्वन्ति ॥ ७

तदनु स्तनितकुमारा विद्युन्मालाविलासहासविभूषाः ।
प्रकिरन्ति सुरभिगन्धिं गन्धोदकवृष्टिमाज्ञया त्रिदशपतेः ॥ ८

वरपद्मरागकेसरमतुलसुखस्पर्शहेममयदलनिचयम् ।
पादन्यासे पद्मं सप्त पुरः पृष्ठतश्च सप्त भवन्ति ॥ ९

फलभारनम्रशालिव्रीह्यादिसमस्तसस्यधृतरोमाञ्चा ।
परिहृषितेव च भूमिस्त्रिभुवननाथस्य वैभवं पश्यन्ती ॥ १०

शरदुदयविमलसलिलं सर इव गगनं विराजते विगतमलम् ।
जहति च दिशस्तिमिरिकां विगत-
रजः प्रभृतिजिह्मताभावं सद्यः ॥ ११

एतेनेति त्वरितं ज्योतिर्व्यन्तरदिवौकसाममृतभुजः ।
कुलिशभृदाज्ञापनया कुर्वन्त्यन्ये समन्ततो व्याह्वानम् ॥ १२

स्फुरदसहस्ररुचिरं विमलमहारत्नकिरणनिकरपरीतम् ।
प्रहसितकिरणसहस्रद्युतिमण्डलमग्रगामि धर्मसुचक्रम् ॥ १३

इत्यष्टमङ्गलं च स्वादर्शप्रभृति भक्तिरागपरीतैः ।
उपकल्प्यन्ते त्रिदशैरेतेऽपि निरुपमातिविशेषाः ॥ १४

वैडूर्यरुचिरविटपप्रवालमृदुपल्लवोपशोभितशाखः ।
श्रीमानशोकवृक्षो वरमरकतपत्रगहनबहलच्छायः ॥ १५

मन्दारकुन्दकुवलयनीलोत्पलकमलमालतीबकुलाद्यैः ।
समदभ्रमरपरीतैर्व्यामिश्रा पतति कुसुमवृष्टिर्नभसः ॥ १६

कटककटिसूत्रकुण्डलकेयूरप्रभृतिभूषिताङ्गौ स्वङ्गौ ।
यक्षौ कमलदलाक्षौ परिनिक्षिपतः सलीलचामरयुगलम् ॥१७

आकस्मिकमिव युगपद्दिवसकरसहस्रमपगतव्यवधानम् ।
भामण्डलमविभावितरात्रिन्दिवभेदमतितरामाभाति ॥ १८

प्रबलपवनाभिघातप्रक्षुभितसमुद्रघोषमन्द्रध्वानम् ।
दन्ध्वन्यते सुवीणावंशादिसुवाद्यदुन्दिभिस्तालसमम् ॥ १९

त्रिभुवनपतितालाञ्छनमिन्दुत्रयतुल्यमतुलमुक्ताजालम् ।
छत्रत्रयं च सुबृहद्वैडूर्यविक्लृप्तदण्डमधिकमनोज्ञम् ॥ २०

ध्वनिरपि योजनमेकं प्रजायते श्रोत्रहृदयहारिगभीरः ।
ससलिलजलधरपटलध्वनितमिव प्रविततान्ताशावलयम् ॥२१

स्फुरितांशुरत्नदीधितिपरिविच्छरितामरेन्द्रचापच्छायम् ।
ध्रियते मृगेन्द्रवर्यैः स्फटिकशिलाघटितसिंहाविष्टरमतुलम् ॥२२

यस्येह चतुस्त्रिंशत्प्रवरगुणाः प्रातिहार्यलक्ष्म्यश्चाष्टौ ।
तस्मै नमो भगवते त्रिभुवनपरमेश्वरार्हते गुणमहते ॥ २३

# १०८. ॥ श्रीवीतरागाष्टकम् ॥

(भुजङ्गप्रयात)

शिवं शुद्धबुद्धं परं विश्वनाथं,
न देवो न बन्धुर्न कर्म न कर्त्ता ।
न अङ्गं न सङ्गं न चेच्छा न कामं,
चिदानन्दरूपं नमो वीतरागम् ॥ १

न बन्धो न मोक्षो न रागादिलोकं,
न योगं न भोगं न व्याधिर्न शोकम् ।
न क्रोधं न मानं न माया न लोभं
चिदानन्दरुपं नमो वीतरागम् ॥ २

न हस्तौ न पादौ न घ्राणं न जिह्वा,
न चक्षुर्न कर्णं न वक्त्रं न निद्रा ।
न स्वादं न खेदं न वर्णं न मुद्रा
चिदानन्दरुपं नमो वीतरागम् ॥ ३

न जन्म न मृत्यु र्न मोदं न चिन्ता,
न क्षुद्रो न भीतो न कृश्यं न तुन्दा ।
न स्वामी न भृत्यं न देवो न मर्त्याः
चिदानन्दरुपं नमो वीतरागम् ॥ ४

त्रिदण्डे त्रिखण्डे हरे विश्वनाथं,
ऋ(हृ)षीकेश-विध्वस्त-कर्मारिजालम् ।
न पुण्यं न पापं न अक्षा न प्राणं
चिदानन्दरुपं नमो वीतरागम् ॥ ५

न बालो न वृद्धो न तुच्छो न मूढो,
न छेदं(द्यं) न भेदं(द्यं) न मूर्त्तिर्न मेहा ।
न कृष्णं न शुक्लं न मोहं न तन्द्रा
चिदानन्दरूपं नमो वीतरागम् ॥ ६

न आद्यं न मध्यं न अन्तं न मा(म)न्या,
न द्रव्यं न क्षेत्रं न दृष्टो न भावा ।
न गुरवो (रु र्न) न शिष्यो न हीनं न दीनं
चिदानन्दरुपं नमो वीतरागम् ॥ ७

इदं ज्ञानरुपं स्वयं तत्त्ववेदी;
न पूर्णं न शुन्यं न चैतन्यरूपम् ।
न अन्योऽन्यभिन्नं न परमार्थमेकं
चिदानन्दरुपं नमो वीतरागम् ॥ ८

आत्माराम-गुणाकरं गुणनिधिं चैतन्यरत्नाकरं,
सर्वे भूतगतागते सुख-दुःखे ज्ञाते त्वया सर्वगे ।
त्रैलोक्याधिपते स्वयं स्वमनसा ध्यायन्ति योगीश्वरा,
वन्दे तं हरिवंशहर्षहृदयं श्रीमान् हृदाभ्युद्यतं ॥ (शा.वि.) ९

## १०९. ॥ श्रीजिनेन्द्रस्तुतिः ॥

(पृथ्वी)

अताम्रनयनोत्पलं सकलकोपवह्नेर्जयात्
कटाक्षशरमोक्षहीनमविकारतोद्रेकतः ।
विषादमदहानितः प्रहसितायमानं सदा
मुखं कथयतीव ते हृदयशुद्धिमात्यन्तिकीम् ॥ १

निराभरणभासुरं विगतरागवेगोदयात्
निरम्बरमनोहरं प्रकृतिरूपनिर्दोषतः ।
निरायुधसुनिर्भयं विगतहिंस्यहिंसाक्रमात्
निरामिषसुतृप्तिमद्विविधवेदनानां क्षयात् ॥ २

मितस्थितनखाङ्गजं गतरजोमलस्पर्शनम्
नवाम्बुरुहचन्दनप्रतिमदिव्यगन्धोदयम् ।
रवीन्दुकुलिशादिदिव्यबहुलक्षणालङ्कृतम्
दिवाकरसहस्रभासुरमपीक्षणानां प्रियम् ॥ ३

हितार्थपरिपन्थिभिः प्रबलरागमोहादिभिः
कलङ्कितमना जनो यदभिवीक्ष्य शोशुध्यते ।
सदाभिमुखमेव यज्जगति पश्यतां सर्वतः
शरद्विमलचन्द्रमण्डलमिवोत्थितं दृश्यते ॥ ४

तदेतदमरेश्वरप्रचलमौलिमालामणि-
स्फुरत्किरणचुम्बनीयचरणारविन्दद्वयम् ।
पुनातु भगवज्जिनेन्द्र ! तव रूपमन्धीकृतम्
जगत्सकलमन्यतीर्थगुरुरूपदोषोदयैः ॥ ५

## ११०. ॥ श्रीजिनेद्रस्तुतिः ॥

प्राचीमेकां पुनाना मिह सुरसरितं वीक्ष्य कारुण्य-धाम्ना
धृत्वा मूर्तीश्चतस्रः परम-हिमवता येन गङ्गाचतुष्कम् ।
आविश्चक्रे चतुदिक् समुदितजनता शुद्धये शुद्धवर्णो
व्याख्या वाणीविलासैः स दिशतु कुशलं श्रीयुगादीश देवः ॥१

(स्रग्धरा)

सम्यक्पश्यन्तमन्तःसमवसृतिजुषो यस्य रूपस्वरूपं
शक्रं लेखा अशेषा दशशतनयनं नान्वमन्यन्त धन्यम् ।
द्रष्टुं दृष्टिद्वयेनाखिलमपि युगपन्नैव तत्पारमन्तः
स श्रीमान् शान्तिनाथः प्रथयतु मम तां भूयसीं सौख्यलक्ष्मीम्॥२

(स्रग्धरा)

स ध्यानज्वलने ज्वलत्यविकलं यस्येन्द्रनीलच्छवे-
र्देहस्य द्युत एव केवलवधूपाणिग्रहं कुर्वतः ।
तन्वन्ति स्म समन्ततः प्रसृमरा माङ्गल्य-दुर्वाङ्कुर-
श्रेणीकार्यमसौ मुदं वितनुतां श्रीपार्श्वनाथः प्रभुः ॥(शा.वि.) ३

(उपजाति)

सिध्यङ्गनोद्वाह विधौ सतृष्णो निष्णातचेतास्तुरगाधिरूढः ।
प्रौढाप्सरःसंहतिगीयमानगुणः श्रिये वीरवरो जिनोऽस्तु ॥ ४

भवाब्धिजाताः सुगुणावदातवृत्तस्वभावा हृदि पुण्यभाजाम् ।
ये हारमुक्ता इव संवसन्ति दिशन्तु तेऽन्येऽपि जिनाः सुखानि॥५

ये बीजमात्रां त्रिपदीं निधाय मनोवनौ बुद्धिजलेन सिक्ताम् ।
चित्रं क्षणात्कोटिगुणामकार्षुस्तन्वन्तु तोषं गणधारिणस्ते ॥ ६

## १११. ॥ श्रीजिनचैत्यवन्दनम् ॥

(अनुष्टुप्)

जगन्नाथ ! जगत्रात !, कृपाकर ! कृपापद ! ।
शरण्य ! भक्तसाधार ! शृणु विज्ञप्तिकां मम ॥ १

नाथोऽसि त्वमनाथानां, जन्तूनां भवतारकः ।
ममोद्धर्ता किलेदानी-मेकस्त्वमसि वा परः ॥ २

यदहं किञ्चिद् ज्ञाना-द्विपरीतं तवागमत् ।
ब्रवीमि मध्ये लोकानां, तत्र त्वं मम साक्षिकः ॥ ३

त्वत्तः परं न देवं, मनसा ध्यायामि सर्वथा नाथ ! ।
वचसापि न स्तवीमि, प्रणमामि न मस्तकेनाहम् ॥ ४

भावविशुद्धिं स्वामिन् !, मम विज्ञाता त्वमेव सर्वज्ञः ।
किं बहुना गदितेन, प्रभुरेको मे त्वमेवासि ॥ ५

## ११२. ॥ श्रीजिनस्तुतिः ॥

(हरिणी)

जयति भगवान् हेमाम्भोजप्रचारविजृम्भिता-
वमरमुकुटच्छायोद्गीर्णप्रभापरिचुम्बितौ ।
कलुषहृदया मानोद्भ्रान्ताः परस्परवैरिणः
विगतकलुषाः पादौ यस्य प्रपद्य विशश्वसुः ॥ १

तदनु जयति श्रेयान्धर्मः प्रवृद्धमहोदयः
कुगतिविपथक्लेशाद्योऽसौ विपाशयति प्रजाः ।
परिणतनयस्याङ्गीभावाद्विविक्तविकल्पितम्
भवतु भवतस्त्रातृ त्रेधा जिनेन्द्रवचोऽमृतम् ॥ २

तदनु जयताज्जैनी वित्तिः प्रभङ्गतरङ्गिणी
प्रभवविगमध्रौव्यद्रव्यस्वभावविभाविनी ।
निरुपमसुखस्येदं द्वारं विघट्य निरर्गलम्
विगतरजसं मोक्षं देयान्निरत्ययमव्ययम् ॥ ३

# ११३. ॥ सुप्रभाताष्टकम् ॥

(वसन्ततिलका)

सर्वज्ञ ! सर्वहित ! सर्वद ! सर्वदर्शिन् !,
सर्वार्थवाग्विभव ! बोधितसर्वसत्त्व ! ।
नित्यं चतुःसुरनिकायकृतांह्रिसेव !,
दृष्टोऽसि देव ! मम सम्प्रति सुप्रभातम् ॥ १

लोकत्रयीनयनषट्पदपीयमान-
लावण्यसान्द्रमकरन्दरसं सुहृद्यम् ।
दृष्टं जिनेश ! भवतो वदनारविन्द-
मानन्दकारि ! मम सम्प्रति सुप्रभातम् ॥ २

अभ्रविलासमतरङ्गितहावभाव-
मभ्रान्ततारकमचञ्चलपक्ष्ममालम् ।
दृष्टं प्रसन्नशुचिलोचनचञ्चरीक-
युग्मं तवेश ! मम सम्प्रति सुप्रभातम् ॥ ३

उत्तानपाणिचरणं तव मोक्षलक्ष्मी-
विस्तीर्णपद्मशयनासनसन्निवेशम् ।
पद्मासनं मदनमर्दनयन्त्रकल्पं
दृष्टं महेश ! मम सम्प्रति सुप्रभातम् ॥ ४

घोणाग्रसङ्घटितदृष्टिरकम्प्रमूर्ति-
शान्ताशमोदयमुदारमुदीरयन्ती ।
दृष्टा प्रमोदपदवी तव योगमुद्रा
योगीन्द्रनाथ ! मम सम्प्रति सुप्रभातम् ॥ ५

सेवागतानतसुरेन्द्रकिरीटकोटि-
रत्नोल्लसत्किरणकुङ्कुममञ्जरीभिः ।
अभ्यर्चितं चरणयोर्युगलं तवाद्य
दृष्टं शरण्य ! मम सम्प्रति सुप्रभातम् ॥ ६

किङ्किल्लिभावलयचामरचारुपीठ-
दिव्यध्वनित्रिदशदुन्दुभिनादहृद्यः ।
छत्रत्रयीतिलकितः सुरपुष्पकीर्णो
दृष्टस्त्वदीयमहिमा मम सुप्रभातम् ॥ ७

दृष्टं मुमुक्षुमुनिवृन्दमुखोपदिष्ट-
धर्माऽमृतश्रवणनिर्वृतभव्यलोकम् ।
देव ! त्वदायतनमायतनादघण्टा-
टङ्कारहारि मम सम्प्रति सुप्रभातम् ॥ ८

प्रातर्जिनं प्रतिदिनं मनसि स्मरन्तो
ये सुप्रभातमिदमस्खलितं पठन्ति ।
ते सर्वदैव दिवसान् परमप्रमोद-
कल्याणकल्पितगुणान् गुणिनो नयन्ति ॥ ९

## ११४. ॥ सुप्रभातस्तोत्रम् ॥

यत्स्वर्गावतरोत्सवे यद भवज्जन्माभिषेकोत्सवे
यद्दीक्षाग्रहणोत्सवे यदखिलज्ञानप्रकाशोत्सवे ।
यन्निर्वाणगमोत्सवे जिनपतेः पूजाद्भुतं तद्भवैः
सङ्गीतस्तुतिमङ्गलैः प्रसरतां मे सुप्रभातोत्सवः ॥ १

श्रीमन्नतामरकिरीटमणिप्रभाभि-
रालीढपादयुगदुर्धरकर्मदूर ।
श्रीनाभिनन्दनजिनाजितशम्भवाख्य !
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ २

छत्रत्रयप्रचलचामरवीज्यमान-
देवाभिनन्दनमुने सुमते ! जिनेन्द्र ! ।
पद्मप्रभारुणमणि-द्युतिभासुराङ्ग !
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ ३

अर्हन् सुपार्श्वकदलीदलवर्णगात्र-
प्रालेयतारगिरिमौक्तिकवर्ण गौर ।
चन्द्रप्रभस्फटिकपाण्डुर-पुष्पदन्त
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ ४

सन्तप्तकाञ्चनरुचे ! जिन-शीतलाख्य !
श्रेयान्विनष्ट-दुरिताष्टकलङ्कपङ्क ! ।
वन्धूकबन्धुररुचे ! जिनवासुपूज्य !
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ ५

उद्दण्डदर्पकरिपो विमलामलाङ्ग !
स्थेमन्ननन्तजिदनन्तसुखाम्बुराशे ! ।
दुष्कर्मकल्मषविवर्जित ! धर्मनाथ !
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ ६

देवामरीकुसुमसन्निभ ! शान्तिनाथ !
कुन्थो ! दयागुणविभूषणभूषिताङ्ग ! ।
देवाधिदेव ! भगवन्नरतीर्थनाथ !
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ ७

यन्मोहमल्लमदभञ्जनमल्लिनाथ !
क्षेमङ्करावितथशासनसुव्रताख्य ! ।
यत्सम्पदा प्रशमितो नमिनामध्येय !
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ ८

तापिच्छगुच्छरुचिरोज्ज्वल ! नेमिनाथ !
घोरोपसर्गविजयन् जिन ! पार्श्वनाथ ! ।
स्याद्वाद-सूक्तिमणिदर्पणवर्द्धमान ! ॥
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ ९

प्रालेय नीलहरितारुणपीतभासं-
यन्मूर्तिमव्ययसुखावसथं मुनीन्द्राः ।
ध्यायन्ति सप्ततिशतं जिन ! वल्लभानां
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ १०

सुप्रभातं सुनक्षत्रं माङ्गल्यं परिकीर्तितम् ।
चतुर्विंशतितीर्थानां सुप्रभातं दिने दिने ॥ ११

सुप्रभातं सुनक्षत्रं श्रेयः प्रत्यभिनन्दितम् ।
देवता ऋषयः सिद्धाः सुप्रभातं दिने दिने ॥ १२

सुप्रभातं तवैकस्य वृषभस्य महात्मनः ।
येन प्रवर्तितं तीर्थं भव्यसत्त्वसुखावहम् ॥ १३

सुप्रभातं जिनेन्द्राणां ज्ञानोन्मीलित-चक्षुषाम् ।
अज्ञानतिमिरान्धानां नित्यमस्तमितो रविः ॥ १४

सुप्रभातं जिनेन्द्रस्य वीरः कमललोचनः ।
येन कर्माटवी दग्धा शुक्लध्यानोग्रवह्निना ॥ १५

सुप्रभातं सुनक्षत्रं सुकल्याणं सुमङ्गलम् ।
त्रैलोक्यहितकर्तृणां जिनानामेव शासनम् ॥ १६

# ११५. ॥ अद्याष्टकस्तोत्रम् ॥

अद्य मे सफलं जन्म, नेत्रे च सफले मम ।
त्वमद्राक्षं यतो देव, हेतुमक्षयसम्पदः ॥ १

अद्य संसारगम्भीरपारावारः सुदुस्तरः ।
सुतरोऽयं क्षणेनैव जिनेन्द्र ! तव दर्शनात् ॥ २

अद्य मे क्षालितं गात्रं नेत्रे च विमले कृते ।
स्नातोऽहं धर्मतीर्थेषु जिनेन्द्र ! तव दर्शनात् ॥ ३

अद्य मे सफलं जन्म प्रशस्तं सर्वमङ्गलम् ।
संसारार्णवतीर्णोऽहं जिनेन्द्र ! तव दर्शनात् ॥ ४

अद्य कर्माष्टकज्वालं विधूतं सकषायकम् ।
दुर्गतेर्विनिवृत्तोऽहं जिनेन्द्र ! तव दर्शनात् ॥ ५

अद्य सौम्या गृ(ग्र)हाः सर्वाः शुभाश्चैकदशास्थिताः ।
नष्टानि विघ्नजालानि जिनेन्द्र ! तव दर्शनात् ॥ ६

अद्य नष्टो महाबन्धः कर्मणां दुःखदायकः ।
सुखसङ्गः समापन्नो जिनेन्द्र ! तव दर्शनात् ॥ ७

अद्य कर्माष्टकं नष्टं दुःखोत्पादनकारकम् ।
सुखाम्भोधिनिमग्नोऽहं जिनेन्द्र ! तव दर्शनात् ॥ ८

अद्य मिथ्यान्धकारस्य हन्ता ज्ञानदिवाकरः ।
उदितो मच्छरीरेऽस्मिन् जिनेन्द्र ! तव दर्शनात् ॥ ९

अद्याहं सुकृती भूतो निर्धूताशेषकल्मषः ।
भुवनत्रयपूज्योऽहं जिनेन्द्र ! तव दर्शनात् ॥ १०

चिदानन्देकरूपाय जिनाय परमात्मने ।
परमात्मप्रकाशाय नित्यं सिद्धात्मने नमः ॥ ११

अन्यथा शरणं नास्ति त्वमेवशरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष जिनेश्वर ! ॥ १२

न हि त्राता न हि त्राता न हि त्राता जगत्त्रये ।
वीतरागात्परो देवो न भूतो न भविष्यति ॥ १३

जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने ।
सदा मेऽस्तु सदा मेऽस्तु सदा मेऽस्तु भवे भवे ॥ १४

जिनधर्मविनिर्मुक्तो मा भुवं चक्रवर्त्यपि ।
स्यां चेटोऽपि दरिद्रोऽपि जिनधर्मानुवासितः ॥ १५

## ११६. ॥ श्रीमङ्गलाष्टकस्तोत्रम् ॥

(शार्दूलविक्रीडित)

श्रीमन्नम्रसुरासुरेन्द्रमुकुटप्रद्योतिरत्नप्रभा,
भास्वत्पादनखेन्दवः प्रवचनाम्भोधौ व्यवस्थापिनः ।
ये सर्वे जिनसिद्धसूरिसुगतास्ते पाठकाः साधवः,
स्तुत्या योगिजनैश्च पञ्चगुरवः कुर्वन्तु मे मङ्गलम् ॥ १

सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनं,
मुक्तिश्रीनगरायनं जिनपतेः स्वर्ग्गापवर्ग्गप्रदः ।
धर्म्मः सुक्तिसुधाश्च चैत्यमखिलं जैनालयं श्र्यालयं,
प्रोक्तं तत्त्रिविधं चतुर्विधममी कुर्वन्तु मे मङ्गलम् ॥ २

नाभेयादिजिनाधिपा-स्त्रिभुवने ख्याताश्चतुर्विंशतिः,
श्रीमन्तो भरतेश्वरप्रभृतयो ये चक्रिणो द्वादश,
ये विष्णु प्रतिविष्णु लाङ्गलधराः सप्ताधिकाविंशती,
त्रैलोक्येऽभयदा त्रिषष्टिपुरुषाः कुर्वन्तु मे मङ्गलम् ॥ ३

कैलाशे वृषभस्य निर्वृतिमही वीरस्य पावापुरी,
चम्पायां वसुपूज्य सज्जिनपतेः सम्मेतशैलेऽर्हताम् ।
शेषाणामपि चोज्जयन्तशिखरे नेमीश्वरस्यार्हतो,
निर्वाणावनयः प्रसिद्ध-विभवाः कुर्वन्तु मे मङ्गलम् ॥ ४

ज्योति-र्व्यन्तर-भवनामरगृहे मेरौ कुलाद्रौ स्थिता,
जम्बू-शाल्मलि-चैत्यशाखिषु तथा वक्षार-रूप्पादिषु ।
इक्ष्वाकारगिरौ च कुण्डलनगे द्वीपे च नन्दीश्वरे,
शैले ये मनुजोत्तरे जिनगृहाः कुर्वन्तु मे मङ्गलम् ॥ ५

यो गर्भावतरोपि जयत्यर्हतां जन्माभिषेकोत्सवे,
यो जातः परिनिक्रमे वचभवो[नदो] यः केवलज्ञानभाक् ।
यः कैवल्यपुरप्रवेश महिमासम्भावितः स्वर्गिभिः
कल्याणानि च तानि पञ्च सततं कुर्वन्तु मे मङ्गलम् ॥ ६

ये पञ्चौषधिऋद्धयः श्रुततपो ऋद्धिङ्गता पञ्च ये,
ये चाष्टाङ्गमहानिमित्तकुशला येऽष्टौ विद्याश्चारणा ।
पञ्चज्ञानधराश्च येपि बलिनो ये बुद्धि ऋद्धिश्वरा,
सप्तैते सकलाश्च ते गणभृतः कुर्वन्तु मे मङ्गलम् ॥ ७

देव्याश्चाष्ट जयादिका द्विगुणिता विद्यादिका देवता,
श्री-तीर्थङ्कर-मातृकाश्च जनका यक्षाश्च यक्षेश्वराः ।

द्वात्रिंशत् त्रिदशा ग्रहा निधिसुरा दिक्कन्यकाश्चाष्टधा,
दिक्पाला दश इत्यमी सुरगणाः कुर्वन्तु मे मङ्गलम् ॥ ८

इत्थं श्रीजिनमङ्गलाष्टकमिदं कल्याणकालेर्हतां,
पूर्वाह्णेऽपि महोत्सवेऽपि सततं श्रीसौख्यसम्पत्करम् ।
ये शृण्वन्ति पठन्ति तैश्च मनुजैर्धर्मार्थकामान्विता,
लक्ष्मीराश्रयते विपायरहिताः कुर्वन्तु मे मङ्गलम् ॥ ९

## ११७. ॥ श्रीवीतरागस्तोत्रम् ॥

भज सर्वज्ञं भज सर्वज्ञं, भज सर्वज्ञं मूढमते !
शिवपदसौख्यं यदि तव भोक्तुं, वाञ्छा कर्म विमोक्तुं रे ॥ १
भज सर्वज्ञं०

अशरणशरणं भवभयहरणं, शिवसुखकरणं तरणं रे ।
जन्मजरामरणादिनिवारं, भव्यजनौघाधारं रे, भज सर्वज्ञं ॥२

सकलसुरासुरसेवितचरणं, कर्मविनाशनकरणं रे ।
जन्तूद्धरणे प्रवहणतुल्यं, दूरीकृतबहुशल्यं रे ॥ भज. ३

न हि ते माता न हि ते भ्राता, न हि ते सौख्यविधाता रे ।
न हि ते जनको न हि ते भार्या, न हि ते वर्या चर्या रे, ॥भज.४

न हि ते शत्रुर्न हि ते मित्रं, न हि ते चामर-छत्रं रे ।
न हि ते बन्धुः स्वजनसबन्धी, सर्वस्वार्थनिबन्धी रे ॥भज.५

त्वमेव कर्ता त्वमेव भोक्ता, त्वमेव कर्मविमोक्ता रे ।
त्वमेव भोगी त्वमेव रोगी, त्वमेव शोकी योगी रे ॥ भज. ६

त्वमेव वेत्ता त्वमेव नेता, त्वमेव नृणां पाता रे ।
दुष्प्रापं भववारिधिभ्रमता, लब्धं नृजन्म भवता रे ॥ भज. ७

क्षरति यथाञ्जलिप्राप्तं नीरं, क्षणेन भवत्यधीरं रे ।
गच्छत्यायुः प्रतिदिनमेवं, तस्मात् सेवय देवं रे ॥ भज. ८

इह संसारे विद्युच्चपला, दुःखनिदानं कमला रे ।
अभ्रच्छायावत्तारुण्यं, झटिति गमिष्यति निपुणं रे ॥ भज. ९

तृणैस्तुल्या भोगाः कामाः,
स्थु(स्थ)लजलतुल्या (प्राणा) वामा रे ।
बुद्बुद्तुल्या देहप्रकृति- र्वारं-वारं यस्यां विकृति रे ॥भज.१०

खलेन सार्द्धं यादृक् प्रीति-स्तादृक् स्नेहे रीति रे ।
त्यजानुरागं मलमूत्राढ्ये कुरु तं धर्मधनाढ्ये रे ॥ भज. ११

बाल्ये विहिता विपुला क्रीडा,
कापि न कृता[त्वयका] व्रीडा रे।
तारुण्येऽपि च सोढा पीडा,
कृता न तीर्थकृदीडा रे ॥ भज. १२

एवं बहुधा नेहानीतो-ऽधुनापि शृणु सुविनीतं रे ।
चित्तं पापाद् दूरे कार्यं, धर्मं मुदा च धार्यं रे ॥ भज. १३

शुद्धे पात्रे दानं देयं, जिनवरवचनं ज्ञेयं रे ।
दुर्गतिदं त्याज्यं दुःशीलं, धार्यं मनसि सुशीलं रे ॥भज. १४

भावयुतं तपउररीकरणं, मुक्तिप्रमदावरणं रे ।
प्रभुगुणचन्द्रं दृष्ट्वा नव्यं, भव्याः प्रणमत सेव्यं रे ॥भज.१५

# ११८. ॥ श्रीजिनचतुस्त्रिंशदतिशयस्तवः ॥

(उपजाति)

निरामयं निर्मलरूपमङ्गं
क्षीरोज्ज्वले ते रुधिरामिषे च ।
आहारनीहारविधिर्जनाना-
मदृश्य ये(ए)व स्व(श्व)सितं सुगन्धम् ॥ १

गव्यूतयुग्मे नरदेवकोटी-
कोटीस्थितिर्योजनगा च वाणी ।
दुर्भिक्ष्यमारीतिभयामया ना-
तिवृष्टिवृष्टी न च विग्रहो(ऽ)पि ॥ २

भामण्डलं चामरधर्म्मचक्री(क्रा)-
तय(प)त्रवप्रत्रया (?य) चैत्यवृक्षा(ः) ।
चत्वारि रूपाणि नवाम्बुजानि
ध्वजोन्तर(रि)क्षे मणिसिंहपीठम् ॥ ३

दुमत्फणामः पथि कण्टकाना-
मधा(धो)मुखत्वं पवनोऽनुकूल(ः) ।
गन्धाम्बुसेक(ः)सुरकोटिसेवा
पुष्फो(ष्पो)त्करो दुन्दुभिनाद उच्चैः ॥ ४

प्रदक्ष(क्षि)णा पक्षगणा नखादै-
रवृद्धरर्क्ष(?)त्वनुकूलता च ।
भिधाम्बुधिस्थाणत चेन्द संख्या
जयन्ति विश्वे(ऽ)तिशया जिनेन्द्रो(द्रो) ॥ ५

पू.आ.श्री वर्धमानसूरिप्रणितम्

# ११९. ॥ कुसुमाञ्जलि-काव्यम् ॥

## ( १ ) चन्दन-कुसुमाञ्जलिः

(स्रग्धरा)

लक्ष्मीरद्यानवद्य-प्रतिभ-परिनिगद्याद्यपुण्यप्रकर्षो-
त्कर्षैराकृष्यमाणा करतलमुकुलारोहमारोहति स्म ।
शश्वद्विश्वातिविश्वोपशम-विशदतोद्भासविस्मापनीयं,
स्नात्रं सुत्रामयात्रा-प्रणिधि जिनविभोर्यत् समारब्धमेतत् ॥ १

कल्याणोल्लास-लास्यप्रसृमर-परमानन्दकन्दायमानं,
मन्दामन्दप्रबोधप्रतिनिधि-करुणाकारकन्दायमानम् ।
स्नात्रं श्रीतीर्थभर्तुर्घनसमयमिवात्मार्थकं दायमानं,
दद्याद् भक्तेषु पापप्रशमनमहिमोत्पादकं दायमानम् ॥ २

देवादेवाधिनाथ-प्रणमन-नवनानन्त-सानन्तचारि-
प्राणप्राणावयान-प्रकटित-विकट-व्यक्ति-भक्तिप्रधानम् ।
शुक्लं शुक्लं च किञ्चिच्चिदधिगमसुखं सत्सुखं स्नात्रमेतन्,
नन्द्यान्नन्द्या प्रकृष्टं दिशतु शमवतां सन्निधानं निधानम् ॥ ३

विश्वात् सम्भाव्यलक्ष्मीः क्षपयति दुरितं दर्शनादेव पुंसा-
मासन्नो नास्ति यस्य त्रिदशगुरुरपि प्राज्यराज्यप्रभावे ।
भावान् निर्मुच्य शोच्यानजनि जिनपतिर्यः समायोगयोगी,
तस्येयं स्नात्रवेला कलयतु कुशलं कालधर्मप्रणाशे ॥ ४

नालीकं यन्मुखस्याप्युपमितिमलभत् क्वापि वार्त्तान्तराले,
नालोकं येन किञ्चित् प्रवचन उदितं शिष्यपर्षत्-समक्षम् ।

नालीकं चापशक्त्या व्यरचयत न वै यस्य सद्रोहमोहं,
नालीकं तस्य पादप्रणतिविरहितं नोऽस्तु तत्स्नात्रकाले ॥ ५

फणिनिकरविवेष्टनेऽपि येनोज्झितमतिशैत्यमनारतं न किञ्चित्।
मलयशिखरिशेखरायमाणं, तदिदं चन्दनमर्हतोऽर्चनेऽस्तु ॥ ६

ऊर्ध्वाधोभूमिवासि-त्रिदशदनुसुतक्ष्मास्पृशां घ्राणहर्षात्,
प्रौढि-प्राप्तप्रकर्षः क्षितिरुहरसजः क्षीणपापावगाहः ।
धूपोऽकूपारकल्प-प्रभवमृतिजरा-कष्टविस्पष्टदुष्ट-
स्फूर्जत्-संसारपाराधिगममतिधियां विश्वभर्तुः करोतु ॥ ७

## ( २ ) केसर-कुसुमाञ्जलिः

(शार्दूलविक्रीडित)

कल्पायुः(ल्याण) स्थिति-कुम्भ-कोटिविटपैः सर्वैस्तुराषाड्गणैः,
कल्याण-प्रतिभासनाय वितत-प्रव्यक्त-भक्त्यानतैः ।
कल्याण-प्रसरैः पयोनिधिजलैः शक्त्याऽभिषिक्ताश्च ये,
कल्याणप्रभवाय सन्तु सुधियां ते तीर्थनाथाः सदा ॥ १

रागद्वेषज - विग्रह-प्रमथनः सङ्क्लिष्टकर्मावली-
विच्छेदादपविग्रहः प्रतिदिनं देवासुरश्रेणिभिः ।
सम्यक् चर्चितविग्रहः सुतरसा निर्धूतमिथ्यात्वदृक्,
तेजःक्षिप्तपविग्रहः स भगवान् भूयाद्भवोच्छित्तये ॥ २

सङ्क्षिप्ताश्रव-विक्रियाक्रमणिका - पर्युल्लसत्संवरं,
षण्मध्य - प्रतिवासि - वैरिजलधि-प्रष्टम्भने संवरम् ।
उद्यत्काम-निकाम - दाह - हुतभुग्विध्यापने संवरं,
वन्दे श्रीजिननायकं मुनिगण-प्राप्त - प्रशंसं वरम् ॥ ३

श्रीतीर्थेश्वरमुत्तमैर्निजगुणैः संसारपाथोनिधेः,
कल्लोलप्लवमानवप्रवरता–सन्धानविध्यापनम् ।
वन्देऽनिन्द्यसदागमार्थकथन–प्रौढप्रपञ्चैः सदा–
कल्लोलप्लवमानवप्रवरता–सन्धान–विध्यापनम् ॥ ४

स्नात्रं तीर्थपतेरिदं सुजनता–खानिः कलालालसं,
जीवातुर्जगतां कृपाप्रथनकृत् क्लृप्तं सुराधीश्वरैः ।
अङ्गीकुर्म इदं भवाच्च बहुलस्फूर्तेः प्रभावैर्निजैः,
स्नात्रं तीर्थपतेरिदं सुजनताखानिः कलालालसम् ॥ ५

दूरीकृतो भगवताऽऽन्तरसंश्रयो यो,
ध्यानेन निर्मलतरेण स एव रागः ।
मुक्त्यै सिषेविषुरमुं जगदेकनाथ–
मङ्गे विभाति निवसन् घुसृणच्छलेन ॥ (वसन्ततिलका) ६

## ( ३ ) यक्षकर्दम–कुसुमाञ्जलिः

(शिखरिणी)

प्रभोः पादद्वन्द्वेऽवतरित–सुधाभुक् शिखरिणी–
वसम्भूतश्रेयो हरिमुकुटमाला–शिखरिणी ।
विभाति प्रश्लिष्टा समुदयकथावैशिखरिणी,
न तेजःपुञ्जाढ्या सुखरसनकाङ्क्षाशिखरिणी ॥ १

जगद्वन्द्या मूर्तिः प्रहरणविकारैश्च रहिता,
विशालां तां मुक्तिं सपदि सुददानाऽविजय ते ।
विशालान्तां मुक्तिं सपदि सुददाना विजयते,
दधाना संसारच्छिदुरपरमानन्दकलिता ॥ २

भवाभाः संसारं हृदिह रणकम्पं प्रतिनयन्,
कलालं वः कान्त–प्रगुण–गणनासादकरणः ।
भवाभासं सारं हृदि हरणकम्पं प्रतिनयन्,
कलालम्बः कान्तप्रगुणगणनासादकरणः ॥ ३

जयं जीवं भानुं बलिनमनिशं सङ्गत इला–
विलासः सत्कालक्षितिरलसमानो विसरणे ।
जयं जीवं भानुं बलिनमनिशंसं गत इला–
ऽविलासः सत्कालक्षितिरलसमानो विसरणे ॥ ४

अमाद्यद्द्वेषोऽर्हन् नवनमनतिक्रान्तकरणै–
रमाद्यद्द्वेषोऽर्हन्नवनमनतिक्रान्तकरणैः ।
सदारागत्यागी विलसदनवद्यो विमथनः,
सदारागत्यागी विलसदनवद्यो विमथ नः ॥ ५

घ्राणतर्पण–समर्पणापटुः क्लृप्तदेवघटनागवेषणः ।
यक्षकर्दम इनस्य लेपनात्, कर्दमं हरतु पापसम्भवम् ॥ ६
(रथोद्धता)

## ( ४ ) कर्पूर–कुसुमाञ्जलिः

(मन्दाक्रान्ता)

आनन्दाऽऽयप्रभव ! भगवन्नङ्ग सङ्गावसान !,
आनन्दाय प्रभव ! भगवन्नङ्ग–सङ्गावसान ! ।
आनंदाय प्रभव ! भगवन्नङ्गऽसङ्गाऽवसाऽऽन !,
आनन्दाय प्रभव ! भगवन्नङ्ग–सङ्गावसान ! ॥ १

लाभप्राप्त–प्रसृमरमहाभाग ! निर्मुक्तलाभं,
देवव्रात–प्रणतचरणाम्भोज ! हे देवदेव ! ।

जातं ज्ञानं प्रकटभुवनत्रातसज्जन्तुजातं,
हंसश्रेणी–धवलगुणभाक् ! सर्वदा ज्ञातहंस ! ॥ २

जीवन्नन्तर्विषमविषयच्छेदक्लृप्तासिधार !,
जीवस्तुत्यप्रथितजननाम्भौनिधौ कर्णधारः ।
जीवप्रौढिप्रणयन–महासूत्रणासूत्रधार !,
जीव स्पर्धारहितशिशिरेन्दोऽपमेयाब्दधार ! ॥ ३

पापाकाङ्क्षामथन ! मथनप्रौढिविध्वंसहेतो !,
क्षान्त्याद्यास्था–निलयनिलयश्रान्तिसम्प्राप्ततत्क ! ।
साम्यक्राम्यन्नयन ! नयनव्याप्तिजातावकाश !,
स्वामिन्नन्दाशरणशरण ! प्राप्तकल्याणमाल ! ॥ ४

जीवाः सर्वे रचितकमल ! त्वां शरण्यं समेताः,
कोधाभिख्य–ज्वलनकमल ! क्रान्तविश्वारिचक्र ! ।
भव्यश्रेणीनयन–कलम–प्राग्विबोधैकभानो !,
मोहासौख्य–प्रजनकमलच्छेदमस्मासु देहि ॥ ५

निरामयत्वेन मलोज्झितेन, गन्धेन सर्वप्रियताकरेण ।
गुणैस्त्वदीयातिशयानुकारी, तवाङ्गमां गच्छतु देव ! चन्द्रः ॥६

(उपजाति)

## ( ५ ) वास-कुसुमाञ्जलिः

(वसन्ततिलका)

संसारवारिनिधितारण ! देवदेव !,
संसारनिर्जितसमस्तसुरेन्द्रशैल ! ।
संसारबन्धुरतया जितराजहंस !
संसारमुक्त ! कुरु मे प्रकटं प्रमाणम् ॥ १

रोगादिमुक्तकरण ! प्रतिभाविलास !
कामप्रमोदकरणव्यतिरेकघातिन् ! ।
षष्ठाष्टमादिकरणप्रतपःप्रवीण !
मां रक्ष पातकरणश्रमकीर्णचितम् ॥ २

त्वां पूजयामि कृतसिद्धिरमाविलासं,
नम्रक्षितीश्वरसुरेश्वरसद्विलासम् ।
उत्पन्नकेवलकलापरिभाविलासं,
ध्यानाभिधानमय ! चञ्चदनाविलासम् ॥ ३

गम्यातिरेकगुण ! पापभरावगम्या,
न व्याप्नुते विषयराजिरपारनव्या ।
सेवाभरेण भवतः प्रकटे रसे वा-
ऽतृष्णा कुतो भवति तुष्टिमतां च तृष्णा ॥ ४

वन्दे त्वदीयवृषदेशनसद्म देव !
जीवातुलक्षितिमनन्तरमानिवासम् ।
आत्मीयमानकृतयोजनविस्तराढ्यं,
जीवातुलक्षितिमनन्तरमानिवासम् ॥ ५

नैर्मल्यशालिन इमेऽप्यजडा अपिण्डाः,
सम्प्राप्त-सद्गुणगणा विपदां निरासाः ।
त्वज्ज्ञानवज्जिनपते ! कृतमुक्तिवासा,
वासाः पतन्तु भविनां भवदीयदेहे ॥ ६

## ( ६ ) मृगमद-कुसुमाञ्जलिः

(मालिनी)

सुरपतिपरिक्लृप्तं त्वत्पुरो विश्वभर्तुः,
कलयति परमानन्दक्षणं प्रेक्षणीयम् ।
न पुनरधिकरागं शान्तचित्ते विधत्ते,
कलयति परमानन्दक्षणं प्रेक्षणीयम् ॥ १

सदयसदयवार्ता-नर्तितामर्त्यहर्षा,
विजयविजयपूजाविस्तरे सन्निकर्षा ।
विहितविहितबोधादेशना ते विशाला,
कलय कलयमुच्चैर्मय्यनत्यार्द्रचित्ते ॥ २

विरचितमहिमानं, महिमानन्दरूपं,
प्रतिहत-कलिमानं कालिमानं क्षिपन्तम् ।
जिनपतिमभिवन्दे माभिवन्देतिघातं,
सुविशदगुणभारं गौणभारङ्गसारम् ॥ ३

सुभवभृदनुकम्पानिर्विशेषं विशेषं,
क्षपितकलुषसङ्घातिप्रतानं प्रतानम् ।
पदयुगमभिवन्दे ते कुलीनं कुलीनम्,
उपगतसुरपर्षत्सद्विमानं विमानम् ॥ ४

किरणकिरणदीप्तिर्विस्तरागोऽतिरागो,
विधुतविधुतनूजाक्षान्तिसाम्योऽतिसाम्यः ।
विनयविनययोग्यः सम्परायोपरायो,
जयति जयतिरोधानैकदेहः कदेहः ॥ ५

श्रितफणपतिभोगः क्लृप्तसर्वाङ्गयोगः,
श्लथित-सुदृढरोगः श्रेष्ठनासोपभोगः ।
सुरवपुषितरोगः सर्वसम्पन्नभोगः,
स्फुटमृगमदभोगः सोऽस्तु सिद्धोपयोगः ॥ ६

## (७) कालागुरु-कुसुमाञ्जलिः

(भुजङ्गप्रयात)

यशश्चार-शुभ्रीकृतानेकलोकः,
सुसिद्धान्त-सन्तर्पितच्छेकलोकः ।
महातत्त्व-विज्ञायिसंवित्कलोकः,
प्रतिक्षिप्तकर्मारिवैपाकलोकः ॥ १

विमानाधिनाथस्तुतांह्रिद्वयश्री-
विमानातिरेकाशयः काशकीर्तिः ।
विमानाप्रकाशैर्महोभिः परीतो,
विमानायितैर्लक्षितो नैव किञ्चित् ॥ २

क्षमासाधनानन्तकल्याणमालः,
क्षमासज्जनानन्तवन्द्याङ्घ्रियुग्मः ।
जगद्भावनानन्तविस्तारितेजाः,
जगद्व्यापनानन्तपूःसार्थवाहः ॥ ३

वपुः सङ्करं सङ्करं खण्डयन्ती,
सहासं यमं संयमं सन्तनोति ।
कलालालसं लालसं तेजसे तं,
सदाभावनं भावनं स्थापयामि ॥ ४

विशालं परं संयमस्थं विशालं,
विशेषं सुविस्तीर्णलक्ष्मीविशेषम् ।
नयानन्दरूपं स्वभक्तान्नयानं,
जिनेश-स्तुतं स्तौमि देवं जिनेशम् ॥ ५

देवादेवाद्यभीष्टः परमपरमहानन्ददाताऽददाता,
कालः कालप्रमाथी विशरविशरणः सङ्गतश्रीगतश्रीः ।
जीवाजीवाभिमर्शः कलिलकलिलता-खण्डनार्होऽडनार्हो,
द्रोणाद्रोणास्यलेपः कलयति लयतिग्मापवर्गं पवर्गम् ॥ ६
(स्रग्धरा)

## (८) पुष्पालङ्कारावतारण-कुसुमाञ्जलिः

(वंशस्थ)

विधूतकर्मारिबलः सनातनो,
विधूतहारावलितुल्यकीर्तिभाक् ।
प्रयोगमुक्तातिशयोर्जितस्थितिः,
प्रयोगशाली जिननायकः श्रिये ॥ १

सुपुण्यसन्दानित-केशवप्रियः, सदैव सन्दानितपोविधानकः ।
सुविस्तृताशोभनवृत्तिरैन्द्रकस्तिरस्कृताशोभनपापतापनः ॥ २

स्थिता ततिः पुण्यभृतां क्षमालया,
पुरोऽपि यस्य प्रथिताक्षमालया ।
तमेव देवं प्रणमामि सादरं, पुरोपचीर्णेन महेन सादरम् ॥ ३

कलापमुक्तव्रतसङ्ग्रहक्षमः, कलापदेवासुरवन्दितक्रमः ।
कलापवादेन विवर्जितो जिनः कलापमानं वितनोतु देहिषु ॥४

निदेशसम्भावित-सर्वविष्टपः, सदाप्यदम्भावितदस्युसंहतिः ।
पुराजनुर्भावितपोमहोदयः, सनामसम्भावित-सर्वचेष्टितः ॥५

विभूषणोऽप्यद्भुतकान्तविभ्रमः सुरूपशालो धुतभीरविभ्रमः ।
जिनेश्वरो भात्यनघो रविभ्रमः, प्रसादकारी महसातिविभ्रमः ॥६

## ( ९ ) स्नपनपीठक्षालन-कुसुमाञ्जलिः

(इन्द्रवंशा)

प्रासङ्गताप्तं जिननाथ ! चेष्टितं, प्रासङ्गमत्यद्भुतमोक्षवर्त्मनि ।
प्रासङ्गतात्यक्तभवाश्रयाशये, प्रासङ्गवीराद्यभिदे नमांसि ते ॥१

कल्याणकल्याणकपञ्चकस्तुतः, सम्भारसम्भारमणीयविग्रहः ।
सन्तानसन्तानवसंश्रितस्थितिः, कन्दर्पकन्दर्पभराञ्जयेज्जिनः ॥२

विश्वान्धकारैककरापवारणः क्रोधेभविस्फोटकरापवारणः ।
सिद्धान्तविस्तारकरापवारणः, श्रीवीतरागोऽस्तु करापवारणः ॥३

सम्भिन्न-सम्भिन्ननयप्रमापणः, सिद्धान्तसिद्धान्तनयप्रमापणः।
देवाधिदेवाधिनयप्रमापणः, सञ्ज्ञातसञ्ज्ञातनयप्रमापणः ॥ ४

कालापयानं कलयन् कलानिधिः,
कालापरश्लोकचिताखिलक्षितिः ।
कालापवादोज्झितसिद्धिसङ्गतः,
कालापकारी भगवान् श्रियेऽस्तु नः ॥ ५

प्रकृतिभासुरभाऽऽसुरसेवितो, धृतसुराचलराऽचलसंस्थितिः ।
स्नपनपेषणपेषणयोग्यतां, जहतु सम्प्रति सम्प्रति विष्टरः ॥६

(द्रु. वि.)

## ( १० ) बिम्बमार्जन-कुसुमाञ्जलिः

(द्रुतविलम्बित)

निहतसत्तमसत्तमसंश्रयं, ननु निरावरणं वरणं श्रियाम् ।
धृतमहः करणं करणं धृते-र्नमत लोकगुरुं कगुरुं सदा ॥ १

सदभिनन्दननन्दनशेष्यको, जयति जीवनजीवनशैत्यभाक् ।
उदित-कन्दलकन्दल-खण्डनः, प्रथितभारतभारतदेशनः ॥ २

वृषविधापनकार्यपरम्परा-सुसदनं सदनं सदनं भुवि ।
अतिवसौ स्वकुले परमे पदे, दकमलं कमलं कमलं भुवि ॥३

तव जिनेन्द्र ! विभाति सरस्वती, प्रवरपारमिता प्रतिभासिनी ।
न यदुपान्तगताऽवति बुद्धगीः, प्रवरपारमिताऽप्रतिभासिनी ॥४

सदनुकम्पन ! कम्पनवर्जित !, क्षतविकारणकारण ! सौहृद ! ।
जय कृपावन ! पावन ! तीर्थकृत् !, विमलमानस ! मानससद्यशः॥५

नहि मलभरो विश्वस्वामिन् ! त्वदीयतनौ क्वचि-
द्विदितमिति च प्राज्ञैः पूर्वैरथाप्यधुनाभवैः ।
स्नपनसलिलं स्पृष्टं सद्भिर्महामलमान्तरं,
नयति निधनं मार्ज्यं बिम्बं वृथा तव देव ! हि ॥(हरिणी) ६

## ( ११ ) बिम्बशिरसि पुष्पारोपण-कुसुमाञ्जलिः

(रथोद्धता)

संवरः प्रतिनियुक्तसंवरोऽविग्रहः प्रकमनीयविग्रहः ।
संयतः सकलुषैरसंयतः पङ्कहृद् दिशतु शान्तिपङ्कहृत् ॥ १

जम्भजित् प्रणतसूरजम्भजित्, सङ्गतः शिवपदं सुसङ्गतः ।
जीवनः सपदि सर्वजीवनो, निर्वृतिर्भविकदत्तनिर्वृतिः ॥ २

निर्जरप्रतिनुतश्च निर्जरः पावनः श्रितमहात्रपावनः ।
नायको जितदयाविनायको, हंसगः सविनयोरुहंसगः ॥ ३

धारित-प्रवरसत्कृपाशयः, पाशयष्टिधरदेवसंस्तुतः ।
संस्तुतो दमवतां सनातनो, नाऽतनः कुगतिमङ्गभृन्मुधा ॥ ४

लोभकारि-परिमुक्तभूषणो, भूषणो विगतसर्वपातकः ।
पातकः कुमनसां महाबलो, हावलोपकरणो जिनः श्रिये ॥ ५

कार्यं कारणमीश ! सर्वभुवने युक्तं दरीदृश्यते,
त्वत्पूजाविषये द्वयं तदपि न प्राप्नोति योगं क्वचित् ।
यस्मात् पुष्पममीभिरर्चकजनैस्त्वन्मस्तके स्थाप्यते,
तेषामेव पुनर्भवी शिवपदे स्फीतं फलं प्राप्नुयात् ॥(शा.वि.)६

## ( १२ ) फल-ढौकन-कुसुमाञ्जलिः

महामनोजन्मिनिषेव्यमाणो-ऽनन्याययुक्तोत्थित एव मर्त्यैः ।
महामनोजन्मनिकृन्तनश्च, न न्याययुग्रक्षिततीर्थनाथः ॥ १
(उपेन्द्रवज्रा)

कामानुयातो निधनं विमुञ्चन्, प्रियानुलापावरणं विहाय ।
गतो विशेषान्निधनं पदं यः, स दुष्टकर्मावरणं भिनत्तु ॥ २
(उपजाति)

मृदुत्वसन्त्यक्त-महाभिमानो, भक्तिप्रणम्रोरुसहस्रनेत्रः ।
अम्भोजसंलक्ष्यतमाभिमानः, कृतार्थतात्मस्मृतिघस्रनेत्रः ॥ ३
(उपजाति)

समस्तसम्भावनयाऽवियुक्त-प्रतापसम्भावनयाऽभिनन्दन् ।
अलाऽलसं भावनयाऽनकाङ्क्षी,
वरिष्ठ-सम्भावनया न काङ्क्षी ॥ (उपेन्द्रवज्रा) ४

समस्तविज्ञानगुणावगन्ता, गुणावगन्ता परमाभिरामः ।
रामाभिरामः कुशलविसर्पः, शिलावसर्पो जयताज्जिनेन्द्रः ॥५
(उपजाति)

रम्यैरनन्तगुणषड्रस-शोभमानैः,
सद्वर्णवर्णिततमैरमृतोपमेयैः ।
स्वाङ्गैरवाद्यफलविस्तरणैर्जिनार्चा-
मर्चामि वर्चसि परैः कृतनित्यचर्चः ॥ (वसन्ततिलका) ६

## ( १३ ) अगुरु-कुसुमाञ्जलिः

(मञ्जुभाषिणी)

करवाल-पात-रहितां जयश्रियं,
करवालपात-रहिताञ्जय श्रियम् ।
विनयन्नयापदसुचारिसंयमो,
विनयन्नयापदसुचारिसंयमः ॥ १

इनमन्धतामसहरं सदासुखं,
प्रणमामि कामितफलप्रदायकम् ।
इनमन्धतामसहरं सदा सुखं,
विजये च तेजसि परिष्ठितं चिरम् ॥ २

निजभावचौरदमनं दयानिधिं,
दमनं च सर्वमुनिमण्डलीवृतम् ।
मुनिमञ्जसा भवलसत्पयोनिधौ,
निलसत्कवीर्यसहितं नमामि तम् ॥ ३

बहुलक्षणौघकमनीयविग्रहः,
क्षणमात्रभिन्नकमनीयविग्रहः ।

कमनीयविग्रहपदावतारणो,
भवभुक्तमुक्तकुपदावतारणः ॥ ४

सुरनाथमानहरसम्पदञ्चितः,
क्षतराजमानहरहासकीर्तिभाक् ।
विगतोपमानहरणोद्धृताशयो,
विगताभिमानहरवध्यशातनः ॥ ५

धाराधाराभिमुक्तोद्रसबलसबलक्षोदकाम्यो दकाम्यो,
भिक्षाभिक्षाविचारस्वजनित ! जनितप्रातिमानोऽतिमानः ।
प्राणप्राण-प्रमोदप्रणयननयनं घातहं घातहन्ता,
श्रीदः श्रीदप्रणादी स्वभवनभवनः काकतुण्डः कतुण्डः ॥ ६
(स्रग्धरा)

## ( १४ ) वासधूप-कुसुमाञ्जलिः

(चन्द्रवर्त्म)

ज्ञानकेलिकलितं गुणनिलयं, विश्वसारचरितं गुणनिलयम् ।
कामदाहदहनं परममृतं, स्वर्गमोक्षसुखदं परममृतम् ॥ १

स्वावबोधरचनापरमहितं, विश्वजन्तुनिकरे परमहितम् ।
रागसङ्गिमनसां परमहितं, दुष्टचित्तसुमुचां परमहितम् ॥ २

भव्यभावजनतापविहननं, भव्यभावजनतापविहननम् ।
जीवजीवभवसारविनयनं, जीवजीवभवसारविनयनम् ॥ ३

कालपाशपरिघातबहुबलं, कालपाशकृतहारविहरणम् ।
नीलकण्ठसखिसन्निभनिनदं, नीलकण्ठहसितोत्तमयशसम् ॥४

न्यायबन्धुरविचारविलसनं, लोकबन्धुरविचारिसुमहसम् ।
शीलसारसनवीरतनुधरं, सर्वसारसन-वीरमुपनये ॥ ५

विनयविनयवाक्यस्फारयुक्तोरयुक्तः,
पुरुषपुरुषकाराद् भावनीयोऽवनीयः ।
जयतु जयतुषारो दीप्रमादे प्रमादे
सपदि सपदि भङ्क्ता वासधूपः सधूपः ॥ (मालिनी) ६

## ( १५ ) जलपूजा-कुसुमाञ्जलिः

(स्वागता)

आततायिनिकरं परिनिघ्नन्नाततायिचरितः परमेष्ठी ।
एकपादरचनासुकृताशीरेकपाददयिताकमनीयः ॥ १

वर्षदानकरभाजितलक्ष्मी-श्चारुभीरु-करिभाजित-वित्तः ।
मुक्तशुभ्रतर-लालसहारो, ध्वस्तभूरितरलालसकृत्यः ॥ २

युक्तसत्यबहुमानवदान्यः, कल्पितद्रविणमानवदान्यः ।
देशनारचितसाधुविचारो, मुक्तताविजितसाधुविचारः ॥ ३

उक्तसंशयहरोरुकृतान्त-स्तान्तसेवकपलायकृतान्तः ।
पावनीकृत-वरिष्ठकृतान्त-स्तान्तथागिरमवेत्य कृतान्तः ॥ ४

यच्छतु श्रियमनर्गलदानो, दानवस्त्रिदशपुण्यनिदानः ।
दानवार्दकरिविभ्रमयानो, यानवर्जितपदोऽतिदयानः ॥ ५

अमृतविहितपोषं, शैशवं यस्य पूर्वा-
दमृतपथनिदेशाद् दुर्धरा कीर्तिरासीत् ।
अमृतरचितभिक्षा यस्य वृत्तिर्व्रतादो-
रमृतममृतसंस्थस्यार्चनायास्तु तस्य ॥ (मालिनी) ६

# ( १६ ) अक्षतारोपण-कुसुमाञ्जलिः

(प्रहर्षिणी)

विश्वेशः क्षितिलसमानमानमानः,
प्रोद्योती मरुदुपहारहारहारः ।
सन्त्यक्त - प्रवरवितानतानतानः,
सामस्त्याद्विगतविगानगानगानः ॥ १

विस्फूर्जन् मथितविलास-लासलासः,
सङ्क्षेपक्षपितविकारकारकारः ।
सेवार्थव्रजितविकालकालकाल-
श्चारित्रक्षरितनिदानदानदानः ॥ २

पूजायां प्रभवदपुण्यपुण्यपुण्य-
स्तीर्थार्थं विलसदगण्यगण्यगण्यः ।
सद्ध्यानैः स्फुरदवलोकलोकलोलो,
दीक्षायां हतभवजालजालजालः ॥ ३

स्मृत्यैव क्षतकरवीरवीरवीरः, पादान्तप्रतिनतराजराजराजः ।
सद्विद्याजितशतपत्रपत्रपत्रः, पार्श्वस्थप्रवर-विमानमानमानः ॥४

नेत्रश्रीजितजल-वाहवाहवाहो, योगित्वामृतघनशीतशीतशीतः ।
वैराग्यादधृतसुबालबालबालो, नामार्थोत्थितमुदधीरधीरधीरः॥ ५

क्षणनताडनमर्दनलक्षणं, किमपि कष्टमवाप्य तितिक्षितम् ।
त्रिभुवनस्तुतियोग्य ! यदक्षतै-स्तव तनुष्व जने फलितं हि तत्॥६

(द्रुतविलम्बित)

## ( १७ ) पञ्चाङ्गरक्षा-कुसुमाञ्जलिः

(मत्तमयुर)

तारं तारङ्गामलनैः स्यादवतारं,
सारं सारङ्गेक्षणनार्यक्षतसारम् ।
कामं कामं घातितवन्तं कृतकामं,
वामं वामं विद्रुतमुज्झितगतवामम् ॥ १

देहं देहं त्याजितनम्रोरुविदेहं,
भावं भावं मोचितवेगं द्रुतभावम् ।
नारं नारं शुद्धभवन्तं भुवनारं,
मारं मारं विश्वजयन्तं सुकुमारम् ॥ २

देवं देवं पादतलालं नरदेवं,
नाथं नाथं चान्तिकदीप्यत्सुरनाथम् ।
पाकं पाकं संयमयन्तं कृतपाकं,
वृद्धं वृद्धं कुड्मलयन्तं सुरवृद्धम् ॥ ३

कारं कारम्भाविरसानामुपकारं,
काम्यं काम्यं भाविरसानामतिकाम्यम् ।
जीवञ्जीवं भाविरसानामुपजीवं,
वं देवं देऽभाविरसानामभिवन्दे ॥ ४

सर्वैः कार्यैः सङ्कुलरत्नं कुलरत्नं,
शुद्धस्फूर्त्या भाविवितानं विवितानम् ।
वन्दे जातत्राससमाधिं ससमाधिं,
तीर्थाधीशं सङ्गतसङ्गं गतसङ्गम् ॥ ५

स्वामिन् ! जायेताखिललोकोऽभयरक्षो,
नामोच्चारात् तीर्थकराणामनघानाम् ।

यत्तद्बिम्बे रक्षणकर्म व्यवसेयं,
तत्र प्रायः श्लाघ्यतमः स्याद् व्यवहारः ॥ ६

## ( १८ ) निरुञ्छनकरण-कुसुमाञ्जलिः

(स्रग्विणी)

